explanation and the authority for understanding the word in a particular sense. He does not name and define figures of speech or the metres nor the Rīti nor the deeper import except in a few cases. Occasionally, he notes the variant readings but does not discuss as to which of them deserves to be accepted and why. He rarely quotes from the Science of Erotics which has been fully pressed into service by Jayadeva in describing the amours of Rādhā and Kṛṣṇa. But we need not blame Mānāṅka for not having treated of these various points for he was not out to write a full-fledged commentary as King Kumbha was, but his explicit aim was to write a gloss only for the benefit of the readers who are novices. It would be wrong to say that he was incapable of writing a very learned commentary. We should judge his Ṭippaṇikā in the light of his express aim and appreciate his performance, especially keeping in view that he was also a king.

**Acknowledgement**: I express my indebtedness to all the scholars whose works I have consulted and used. I am particularly thankful to Pt Dalsukh Malvania, Director, L. D. Institute of Indology, Ahmedabad for his keen interest in me and my research work. It was at his suggestion only, that this work was entrusted to me. I am grateful to him for his sympathetic understanding of my many personal difficulties and the patience with which he extended the time allotted for the editing work. But for his kindness I would not have been able to finish through this work. I express my sincere thanks to professor R. B. Athavale for his kind help in correctly presenting the verses giving the rāgas and tracing some parallel verses from works on the science of music, and to professor M. G. Kothari for his help in tracing Mānāṅka's grammatical citations. I have to express my deep gratitude to Pt Balacharya Khuperkar Shastri, who has throughout taken a very kindly and helpful interest in this work and has read the press-copy and made valuable suggestions for improvement. In conclusion, I have to thank my friend professor ( Dr. ) G. S. Bedagkar for carefully going through the Introduction and suggesting improvements. For any imperfections still found in this edition, I am, however, entirely responsible.

I crave the indulgence of readers for the misprints that have crept in, notwithstanding my best efforts to avoid them. I should be failing in my duty if I did not record here my hearty thanks to Pt Ambalal P. Shah who read the proofs.

**V. M. Kulkarni**

Rajaram College,
Kolhapur.
August 15, 1965

महाकविश्रीजयदेवविरचितं

# गी त गो वि न्द का व्य म्

सटीकम् ।

॥ श्रीः ॥

महाकविश्रीजयदेवविरचितं

# गीतगोविन्दकाव्यम्

मानाङ्केन महीभुजा कृतया टिप्पणिकया संवलितम् ।

## प्रथमः सर्गः ।

सामोददामोदरः ।

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥ १ ॥

॥ [1]ॐ नमः श्रीवासुदेवाय ॥

चराणां स्थावराणां च येन सृष्टिः कृता पुरा ।
सर्वज्ञाय नमस्तस्मै ज्ञानदात्रेऽच्युतात्मने ॥ १ ॥

[2]कवीनां मतिमालोक्य सतां च सुखबुद्धये ।
कृता टिप्पणिका मुख्या [3]मानाङ्केन महीभुजा ॥ २ ॥

प्रीतये वासुदेवस्य सद्यः पापपनुत्तये ।
[4]गीतगोविन्दकं काव्यं जयदेवश्चकार ह ॥ ३ ॥

राधामाधवयोः रहःकेलयः निर्जनस्थानक्रीडाः जयन्ति सर्वोत्कर्षेण वर्तन्ते। राधा कापि गोपाङ्गना मुख्या । माधवः कृष्णरूपी नारायणः। सा च स च तौ तयोः । व्यभिचरति चेतिवशात् अर्चितपदस्य [न] पूर्वनिपातः । यथा [5]नरनारायणौ उमामहेश्वरौ काकमयूरावित्यादि। यमुना नदी। तस्याः कूलं तटं तस्मिन् । आधारे सप्तमी । किंभूतयोः प्रत्यध्वकुञ्जद्रुमं चलितयोः गतयोः । अध्वनि अध्वनि प्रति कुञ्जे कुञ्जे प्रति द्रुमे द्रुमे प्रति । वीप्सायामव्ययीभावः।

1) A श्रीमते रामानुजाय नमः, B श्रीगणेशाय नमः ॥

2) A कवीनां मनसालोक्य ।

3) A मामाङ्केन, B मानाकेन

4) A, B जयदेवश्चकारेदं काव्यं गीतगोविन्दकम् ॥

5) B लक्ष्मीनारायणौ ।

अध्वकुञ्जद्रुमं कामुकानां [1]रमणीयं सङ्केतस्थानम् । कस्माद्गतयोः नन्दनिदेशतः । नन्दो गोपः सर्वाभीरमुख्यो यमुनातटवृन्दावनगोष्ठस्थितः सन् बालकभयहेतुमाकलय्य दध्यादिक्रयविक्रयादिनाऽहर्निशं भयहीनां राधां आदिदेश । कथम् । इत्थम् । इत्थं कथम् । हे राधे तत्तस्माद्धेतोः इमं बालकं गृहं प्रापय । नीत्वा गृहं गच्छ । स्वमनोवाञ्छितं गोप्तुकामान्तर्गताभिप्रायेण यद्येवं राधा वदति । [2]ततः कस्मात् । यतो नक्तं रात्रौ अयं भीरुः बाल्यभावादतिशयेन भीत इति । पुनः राधायाः स्वगतमेवम् । अहो आश्चर्यमेतत् । दिनमणौ विद्यमानेऽपि कथं नक्तलक्षणम् । तदाह । मेघैर्जलधरैरम्बरमाकाशं मेदुरं व्याप्तं छन्नं नेत्रभीषणम् । तमालद्रुमैस्तापिच्छतरुभिर्गाढाञ्जनसंनिभैर्वनभुवोऽरण्यभूमयः श्यामा निबिडान्धकारतुल्याः । अनेन हेतुना नक्तलक्षणं विनापि बालकोऽज्ञानत्वाद् वने बिभेति । विद्यमाने भयहेतौ पुनः किम् । अतो मातुरन्तिकं नयेत्यर्थः ॥१॥

सरस्वत्याः प्रसादं विना कथं मनसीप्सितो ग्रन्थः करणीय इत्याह । वाग्देवतेत्यादि—

वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्ती ।
श्रीवासुदेवरतिकेलिकथासमेत-
मेतं करोति जयदेवकविः प्रबन्धम् ॥ २ ॥

एतं प्रबन्धं जयदेवकविः करोति । किंभूतं प्रबन्धम् । श्रीवासुदेवरतिकेलिकथासमेतम् । श्रीः लक्ष्मी राधारूपिणी । वसुदेवस्यापत्यं वासुदेवः कृष्णः [3]कंसदैत्यविनाशाय आद्यः अजन्मा मानवावतारे मनुजरूपी । रतिश्च प्रीतिः । केलिः क्रीडा च [4]अनुभृत(?अनुभूत)कर्म आलये श्रीश्च वासुदेवश्च तयोः रतिकेलिकथास्ताभिः समेतं संयुक्तम् । कथंभूतो जयदेवकविः । पद्मावतीचरणचारणचक्रवर्ती । पद्मावती लक्ष्मीः तस्याः चरणौ । तयोश्चारणं शुश्रूषाराधनं तत्र चक्रवर्ती सेवकाधिराजः । अथवा पद्मावती तस्य ब्राह्मणी तस्याः नृत्यकलाचक्रवर्ती । पुनः किंभूतः । वाग्देवताचरितचित्रितचित्रसद्मा । वाक् चासौ देवता चेति । तस्याश्चरितं तेन चित्रितं विचित्रीकृतं चित्तमेव सद्म गृहं यस्य स तथा । अनेन लक्ष्मीसरस्वत्योर्जयदेवो निष्णातः शृङ्गारी च सूचितः ।

[5]जयदेवस्य कवेः कोऽपि कविः स्पर्धी स्पर्धावान्— समानोऽधिको वा न विश्रुतः न ख्यातः । ननु उमापतिधरादयः सन्तीत्याह । वाच इति—

1) B रमणीयरतिस्थानम् ।
2) A ततः कस्माद् भयम् ।
3) A कंसदैत्यविनाशायाष्टमावतारिमनुजरूपी, (? कंसदैत्यविनाशाय अष्टमावतारी मनुजरूपी)
B कंसदैत्यवधायाष्टमावतारमनुजरूपी ।
4) A अनुन्नकर्मालये, P अनुभवकर्मालये ।
5) This introductory remark is placed by P after the verse वाचः etc.

वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते ।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धन-
स्पर्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः ॥ ३ ॥

उमापतिधरो वाचः पल्लवयति केवलं कोमलां वाचं विस्तारयतीत्यर्थः । न तु गिरां वाणीनां संदर्भशुद्धिं जानीते । तथा शरणः कविः श्लाघ्यः प्रशस्तः । कस्मिन् विषये । दुरूहद्रुते । दुःखेन अप्यूहितुं शक्यत इति दुरूहः । दुरूहं च द्रुतं च तं तस्मिन् । अतिशीघ्रं वक्तुं समर्थ इत्यर्थः । तथा आचार्यो गोवर्धनः श्लाघ्यः । कैः शृङ्गारोत्तरसत्प्रमेयरचनैः । शृङ्गारोत्तराणि शृङ्गारप्रधानानि च सत्प्रमेयानि उत्कृष्टप्रमेयानि च तेषां रचनानि । शृङ्गारोत्तरसत्प्रमेयरचनानि तैः । तथा धोयी नाम कविक्ष्मापतिः कविराजः श्रुतिधरः श्रुत्या श्रवणेन धारयतीत्यर्थः । अस्य श्लोकस्य कविः क्ष्मापतिः राजा लक्ष्मणसेनः ।

अस्मिन् ग्रन्थे किं वक्तव्यं [1]जनप्रवर्तनप्रयोजनं तदाह । यदीत्यादि—

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम् ।
मधुरकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम् ॥ ४ ॥

हरिस्मरणे श्रीकृष्णानुचिन्तने यदि मनो हृदयं सरसं सरागं तवास्ति । यदि च विलासकलासु तव कुतूहलमस्ति । विपूर्वो लस् कान्तौ धातुः । विलासानां कलाः तासु । 'कौतूहलं कौतुकं च कुतुकं च कुतूहलम्' इत्यमरः । तदा हे बुधजन ! जयदेवस्य कवेः सरस्वतीं वाणीं शृणु आकर्णय । कथंभूतां सरस्वतीम् । मधुरकोमलकान्तपदावलीम् । मधुरं स्वादु कर्णपेयम् । कोमलं स्निग्धम् । कान्तं कमनीयम् । एतैर्गुणैरुपेता पदावली पदपङ्क्तिर्यस्याः सा तथा ताम् ।

प्रलयेत्यादि—

## अष्टपदी १ ।

[2]मालवरागरूपकताले ।

प्रलयपयोधिजले धृतवानसि वेदं
विहितवहित्रचरित्रमखेदम् ।
केशव धृतमीनशरीर जय जगदीश हरे ॥ ध्रुपदम् ॥ १ ॥

---

1) A जनप्रवृत्तिप्रयोजने किंवा । यदीत्यादिना, B जनप्रवृत्तिप्रयोजने किं च, यदीत्यादि ।

2) A मालवरागे रूपकताले, B गौडमालरागेण गीयते रागलक्षणात् । B adds here the definition of the Malava-raga and the Rupaka-tala. These and such other definitions will be given separately in an appendix.

हे केशव धृतमीनशरीर। धृतं मीनस्य शरीरं येन स तथा। तस्य संबोधनम्। हे धृतमीनशरीर। अखेदं यथा स्यात्तथा त्वं वेदं धृतवानसि। कस्मिन्। प्रलयपयोधिजले। प्रलये संवर्तकाले पयोधिरर्णवस्तस्य जलं तस्मिन्। महाप्रलयकाले परमेश्वरो वेदं स्वीकृत्य ब्रह्माणमुत्पाद्य तस्मै प्रयच्छति। 'यो ब्रह्माणं विदधाति पूर्वं [1]योऽसौ वेदांश्च प्रहिणोति तस्मै।' (श्वेताश्वतर ६. १८) इति श्रुतिः। किंभूतं वेदम्। विहितवहित्रचरित्रम्। विहितं कृतं वहित्रस्य पोतस्य चरित्रं आचरितं येन स तथा। वहित्रं सागरतारकं भवति। वेदोऽपि नित्यनैमित्तिककर्मप्रतिपादनद्वारेण संसारसागरतारको भवतीत्यर्थः। जगन्ति ईष्टे नियमयतीति जगदीशः। तस्य संबोधनं हे जगदीश। हे हरे स्मृतः सन् हरति संसारक्लेशमिति हरिः तस्य संबोधनं। हे हरे। त्वं जय। स्वमायया शत्रुसंहरणद्वारेण स्वभक्तपरिपालनेन सर्वोत्कृष्टो भव।

क्षितिरित्यादि—

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे
धरणिधरणकिणचक्रगरिष्ठे।
केशव धृतकच्छपरूप जय जगदीश हरे॥ २॥

हे केशव धृतकच्छपरूप। धृतं कच्छपस्य रूपं येन स तथा संबुद्धिः। तव पृष्ठे क्षितिः पृथ्वी तिष्ठति। किंभूते। अतिविपुलतरे। अतिशयेन विपुलं विस्तीर्णं तस्मिन्। पुनः किंभूते। धरणिधरणकिणचक्रगरिष्ठे। धरण्याः भूमेर्धरणं तेन किणः मृतरक्तग्रन्थिः। स एव [2]चक्रं चक्राकारः तेन गरिष्ठं गुरुतरम्। तस्मिन्। जगदीश! हरे! इति सर्वत्र योज्यम्।

वसतीत्यादि—

वसति दशनशिखरे धरणी तव लग्ना
शशिनि कलङ्ककलेव निमग्ना।
केशव धृतशूकररूप जय जगदीश हरे॥ ३॥

तव दशनशिखरे दन्तस्याग्रे लग्ना धरणी पृथ्वी वसति तिष्ठति। दशनस्य शिखरं तस्मिन्। कस्मिन् केव। शशिनि चन्द्रे निमग्ना कलङ्ककलेव। कलङ्कस्य कला कलङ्ककला।

तव करेत्यादि—

तव करकमलवरे नखमद्भुतशृङ्गं
दलितहिरण्यकशिपुतनुभृङ्गम्।
केशव धृतनरहरिरूप जय जगदीश हरे॥ ४॥

---

1) B यो वै; - This reading is found in the printed text of the Upanisad.

2) P A चक्रः।

हे केशव । धृतनरहरिरूप । नरहरिर्नृसिंहः । धृतं नरहरेः रूपं येन स तथा । तव करकमलवरे नखं तिष्ठति । कर एव कमलवरं पद्मश्रेष्ठं तस्मिन् । किंभूतं नखम् । अद्भुतशृङ्गम् । अद्भुतमाश्चर्यजनकं शृङ्गं अग्रभागो यस्य तत् । अदृष्टपूर्वमित्यर्थः । पुनः किंभूतम् । दलितहिरण्यकशिपुतनुभृङ्गम् । हिरण्यकशिपोस्तनुः शरीरं सैव श्यामत्वाद् भृङ्गः । दलितो विदारितो हिरण्यकशिपोस्तनुभृङ्गो येन स तथा तत् ।

छलयसीत्यादि—

छलयसि विक्रमणे बलिमद्भुतवामन
पदनखनीरजनितजनपावन ।
केशव धृतवामनरूप जय जगदीश हरे ॥ ५ ॥

हे केशव । धृतवामनरूप । धृतं वामनं रूपं येन स तथा तस्य संबोधनम् । हे अद्भुतवामन[1] । त्वं बलिं छलयसि प्रवञ्चयसि । कस्मिन् विषये । विक्रमणे । विः पक्षी विरुद्धः तस्याक्रमणं तस्मिन् इति ध्वनिः । विक्रमणविषये हे पदनखनीरजनितजनपावन । पदस्य नखाः पदनखाः तेषां नीरं जलं तेन जनितं उत्पादितं जनाय पावनं पवित्रीभावो येन स तथा तस्य संबोधनम् ।

क्षत्रियेत्यादि—

क्षत्रियरुधिरमये जगदपगतपापं
स्नपयसि [2]पयसि शमितभवतापम् ।
केशव धृतभृगुपतिरूप जय जगदीश हरे ॥ ६ ॥

हे केशव धृतभृगुपतिरूप । धृतं भृगुपतेः रूपं येन सः । भृगुपतिः परशुरामः । तस्य संबोधनम् । त्वं जगत् संसारं स्नपयसि स्नानं कारयसि । कस्मिन् । पयसि पानीये । किंभूते । क्षत्रियरुधिरमये । क्षत्रियाणां रुधिरं तदेव स्वरूपं यस्य तत्तथा [3]तस्मिन् । किंभूतं जगत् । अपगतपापम् । स्नानमात्रेण अपगतं नष्टं पापं यस्य तत्तथा । पुनः किंभूतम् । शमितभवतापम् । शमितः शान्तिं प्रापितो भवस्य संसारस्य तापो येन तत्तथा ।

वितरसीत्यादि—

वितरसि दिक्षु रणे दिक्पतिकमनीयं
दशमुखमौलिबलिं रमणीयम् ।
केशव [4]धृतरघुपतिरूप जय जगदीश हरे ॥ ७ ॥

---

1) B adds अद्भुतः अदृष्टपूर्वः दैत्यानां(?दैत्यान्) वामयतीति वामनः अद्भुतश्चासौ वामनश्च तस्य संबोधने हे अद्भुतवामन ।

2) P, B drop पयसि ।

3) B drops from तस्मिन्......पापं यस्य तत्तथा ।

4) B धृतहलशरीरः but in the body of the text of the commentary it reads correctly: धृतरघुपतिरूप ।

हे केशव । धृतरघुपतिरूप । धृतं रघुपतेः [1]श्रीरामस्य रूपं येन स तथा तस्य संबोधनम् । हे धृतरघुपतिरूप । त्वं रणे संग्रामे दिक्षु [2]आशासु दशमुखमौलिबलिं वितरसि ददासि । दशमुखानि [3]यस्य तस्य मौलयः मूर्धानः स एव बलिः पूजोपहारस्तम् । किंभूतम् । दिक्पतिकमनीयम् । दिशां पतयः इन्द्रादयः तेषां कमनीयं अभिलषणीयं तम् । पुनः किंभूतम् । रमणीयं शोभनम् ।

वहसीत्यादि—

वहसि वपुषि विशदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभम् ।
केशव धृतहलधररूप जय जगदीश हरे ॥ ८ ॥

हे केशव । धृतहलधररूप । धृतं हलधरस्य बलभद्रस्य रूपं येन स तथा । तस्य संबोधने हे धृतहलधररूप । त्वं विशदे निर्मले वपुषि शरीरे वसनं दुकूलं वहसि । किंभूतं वसनम् । जलदाभम् । जलदो नीलमेघः तस्य आमेव आभा दीप्तिर्यस्य तत्तथा । पुनः किंभूतम् । हलहतिभीतिमिलित यमुनाभम् । हलेन हतिः हननं तस्याः भीतेर्भयात् मिलिता आगता सा चासौ यमुना च तस्याः आमेव आभा दीप्तिर्यस्य तत्तथा ।

निन्दसीत्यादि—

निन्दसि यज्ञविधेरहह श्रुतिजातं
सदयहृदयदर्शितपशुघातम् ।
केशव धृतबुद्धशरीर जय जगदीश हरे ॥ ९ ॥

हे केशव । धृतबुद्धशरीर । धृतं बुद्धस्य शरीरं येन तस्य संबोधनम् । हे धृतबुद्धशरीर । त्वं श्रुतिजातं वेदार्थतत्त्वं निन्दसि । कस्य । यज्ञविधेः यज्ञानां विधिर्विधानं तस्य । किंभूतम् । दर्शितपशुघातम् । दर्शितः पशुघातो मारणं येन तत्तथा तत् । अथवा किंभूतं श्रुतिजातम् । सदयहृदयदर्शितपशुघातम् । सदयहृदया ब्राह्मणाः तेषां दर्शितः पशुघातो मारणं येन तत्तथा तत् । कथं निन्दसि । अहहेति खेदे । गवादिपशुघातं धिगिति । तस्य संबोधने । बौद्धागमशास्त्रे अहिंसा परमो धर्म इति न्यायात् ।

म्लेच्छनिवहेत्यादि—

म्लेच्छनिवहनिधने कलयसि करवालं
धूमकेतुमिव किमपि करालम् ।
केशव धृतकल्किशरीर जय जगदीश हरे ॥ १० ॥

1) B रामचन्द्रस्य । 2) B दिशासु ।
3) A यस्य मौलयः, B यस्य समौलय मूर्धानः ।

हे केशव । धृतकल्किशरीर । धृतं कल्किशरीरं येन तस्य संबोधने । त्वं किमपि अद्भुतं यथा स्यात्तथा करवालं खड्गं कलयसि धारयसि । कस्मिन् निमित्ते म्लेच्छनिवहनिधने । म्लेच्छानां पापिष्ठानां निवहः [1]व्यूहः । तस्य निधनं विनाशस्तस्मिन् । किंभूतम् । करालं भयङ्करम् । कमिव । धूमकेतुमिव ।

श्रीजयदेवेत्यादि—

श्रीजयदेवकवेरिदमुदितमुदारं
शृणु सुखदं शुभदं भवसारम् ।
केशव धृतदशविधरूप जय जगदीश हरे ॥ ११ ॥

हे पण्डितजन श्रीजयदेवकवेः उदितं उदारं सुन्दरं त्वं शृणु । किंभूतम् । सुखदं श्रुतिमात्रेण । पुनः किंभूतम् । शुभदं कल्याणदम् । पुनः किंभूतम् । भवसारम् । [2]भवे संसारे सारभूतम् ।

गीतार्थं श्लोकेन गृह्णाति । वेदानित्यादि—

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥१२॥

हे देव ! तुभ्यं नमः । नमस्कारोऽस्तु । किंभूताय तुभ्यम् । कृष्णाय । "कृषिर्भूवाचकः शब्दो नश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥" तस्मै परब्रह्मणे कृष्णाय । [3]पुनः कथंभूताय । मायावशेन दशाकृतिकृते । दश च ता आकृतयः शरीराणि च ताः करोतीति दशाकृतिकृत् तस्मै । दशाकृतित्वं प्रतिपादयति । पुनः किंभूताय । उद्धरते । [4]उद्धरतीति उद्धरन् तस्मै । कान् । वेदान् । पुनः किंभूताय । वहते । वहतीति वहन् तस्मै । कानि । जगन्ति लोकान् । पुनः किंभूताय । उद्बिभ्रते । उद्बिभ्रतीति उद्बिभ्रन् तस्मै । किम् । भूगोलं पृथ्वीम् । पुनः किंभूताय । दारयते दारयतीति दारयन् तस्मै । कम् । दैत्यम् । हिरण्यकशिपुम् । पुनः किंभूताय । छलयते । छलयतीति छलयन् तस्मै । कम् । बलिम् । पुनः किंभूताय । कुर्वते । करोतीति कुर्वन् तस्मै । कम् । क्षत्रक्षयम् । पुनः किंभूताय । जयते । जयतीति जयन् तस्मै । कम् । पौलस्त्यं रावणम् । पुनः किंभूताय । आतन्वते । आतनोतीति आतन्वन् तस्मै । किम् । कारुण्यम् । पुनः किंभूताय । मूर्च्छयते । मूर्च्छ-

---

1) B समूहः ।
2) भवसागरे ।
3) P and A drop पुनः कथंभूताय ।
4) B drops this as well as other etymological explanations in this portion of the commentary.

यतीति मूर्च्छयन् तस्मै । कान् । म्लेच्छान् । जय । स्वशरणागतसकलजनरमणत्वेन सर्वोत्कृष्टतया वर्तस्व । [1]जयजयेति यदुक्तिरादरे । एकैकस्य वीप्सायामित्यादि ।

[2]श्रितेत्यादि—

[3]गुर्जरीरागे प्रतिताले ध्रुवपदमिदम् ।

श्रितकमलाकुचमण्डल धृतकुण्डल ए
कलितललितवनमाल जय जय देव हरे ॥ १ ॥

हे देव हे हरे त्वं जय जय । स्वशरणागतसकलजनरमण त्वं सर्वोत्कृष्टतया वर्तस्व । हे श्रितकमलाकुचमण्डल । श्रितमाश्रितं कमलायाः लक्ष्म्याः कुचमण्डलं कुचाभोगः येन स तथा तस्य संबोधने । हे श्रितकमलाकुचमण्डल । पुनः किंभूत । हे धृतकुण्डल । धृतं कुण्डलं येन स तथा तस्य संबोधने । पुनः किंभूत । हे कलितललितवनमाल । कलिता स्वीकृता ललिता मनोहरा वनमाला येन स तथा तस्य संबोधने । हे कलितललितवनमाल । हे हरे हे देव जय जय जययुक्तो भव । सर्वोत्कर्षेण वर्तस्व ।

दिनमणिमण्डलमण्डन भवखण्डन ए
मुनिजनमानसहंस जय जय देव हरे ॥ २ ॥

किंभूत । हे दिनमणिमण्डलमण्डन । [4]दिनस्याह्नो मणिः सूर्यः तस्य मण्डलं तद् मण्डयतीति तस्य संबोधने । पुनः किंभूत । हे भवखण्डन । आत्मभक्तानां सेवकानां भवो जन्म खण्डयतीति तस्य संबोधने । मुक्तिं ददातीत्यर्थः । पुनः किंभूत । हे मुनिजनमानसहंस । मुनयश्च ते जनाश्च तेषां मानसानि तत्र हंसः तस्य संबोधने । स्वच्छतया शुद्धभावेन हृदयस्य मानससरोवरस्य शब्दच्छलेन तुल्यता । जय जय देव हरे [5]प्रतिपदयोजनेयमित्यर्थः ।

कालियेत्यादि—

कालियविषधरगञ्जन जनरञ्जन ए
यदुकुलनलिनदिनेश जय जय देव हरे ॥ ३ ॥

---

1) This sentence is found at this place in both the MSS. P and A. The MS B places it, however after गुर्जरी......गीयते रसे । Its rightful place appears to be just before हे श्रितकमलाकुचमण्डल ।
2) P and A drop श्रितेत्यादि ।
3) B गुर्जरीरागेण गीयते ।
4) B दिनस्य । अहोमणिः सूर्यः ।
5) A प्रतिपदे योजनीयमित्यर्थः, B adds जय जय देव हरे प्रतिपदयोजनीयमित्यर्थः ।

किंभूत । कालियविषधरगञ्जन । कालियश्चासौ विषधरश्च व्यालः । तं गञ्जयतीति तस्य संबोधनम् । पुनः किंभूत । जनरञ्जन । जनं स्वभक्तं रञ्जयतीति तस्य संबोधने । पुनः किंभूत । यदुकुलनलनदिनेश यदूनां कुलं वंशः तदेव नलिनं तस्य दिनेशः सविता प्रकाशकः ।

मधुमुरेत्यादि—

मधुमुरनरकविनाशन गरुडासन ए
सुरकुलकेलिनिदान जय जय देव हरे ॥ ४ ॥

किंभूत । हे मधुमुरनरकविनाशन । मधुश्च मुरश्च नरकश्च मधुमुरनरकाः दैत्यविशेषास्तान् विनाशयतीति तस्य संबोधने । पुनः किंभूत । गरुडासन । गरुड एव आसनं यानं यस्य तस्य संबोधनम् । पुनः किंभूत । सुरकुलकेलिनिदान । सुराणां कुलं समूहः तस्य केलिः क्रीडा तस्याः अनुग्रहद्वारेण निदानम् आदिकारणं तस्य संबोधने[1] ।

अमलेत्यादि—

अमलकमलदललोचन भवमोचन ए
त्रिभुवनभवननिधान जय जय देव हरे ॥ ५ ॥

हे अमलकमलदललोचन । अमलं शुद्धं यत् कमलं तस्य दलं तद्वल्लोचने यस्य तस्य संबोधने । पुनः किंभूत । भवमोचन । भवात् संसारान्मोचयतीति मुक्तिं प्रापयतीति तस्य संबोधनम् । पुनः किंभूत । त्रिभुवनभवननिधान । त्रयाणां भुवनानां समाहारस्त्रिभुवनं तस्य भवनम् उत्पत्तिः तस्य या[2] अविद्या तया परिकल्पितं तस्य निधानम् आधारः तस्य संबोधनम् । अथवा त्रिभुवनमेव भवनमिव भवनम् आश्रयः ।

जनकसुतेत्यादि—

जनकसुताकृतभूषण जितदूषण ए
समरशमितदशकण्ठ जय जय देव हरे ॥ ६ ॥

हे जनकसुताकृतभूषण । जनकस्य सुता सीता तस्याः कृतं शोकनिवृत्तिकादिभूषणमलङ्करणं येन स तथा तस्य संबोधनम् । पुनः किंभूत । जितदूषण । जितो दूषणो राक्षसो येन स तथा तस्य संबोधनम् । पुनः किंभूत । समरशमितदशकण्ठ । समरे संग्रामे शमितः शान्तिं प्रापितो दशकण्ठो रावणो येन स तथा तस्य संबोधनम्

1) B adds निदानं त्वादिकारणमित्यमर(:) ।
2) A या विद्या ।

अभिनवेत्यादि—

अभिनवजलधरसुन्दर धृतमन्दर ए
श्रीमुखचन्द्रचकोर जय जय देव हरे ॥ ७ ॥

पुनः किंभूत । अभिनवजलधरसुन्दर । अभिनवो [1]नवीनश्चासौ जलधरश्चेति तद्वत् सुन्दरः श्यामः तस्य संबोधनम् । पुनः किंभूत । धृतमन्दर । अमृतोन्मथने धृतः पृष्ठे मन्दराचलो येन स तथा तस्य संबोधनम् । पुनः किंभूत । श्रीमुखचन्द्रचकोर । श्रियो लक्ष्म्या मुखं तदेव चन्द्रः तस्य चकोरः तस्य संबोधनम् । चकोरो हि चन्द्ररश्मिपानं करोति । अयमपि श्रीमुखाधरपानं [2]करोतीत्यर्थाभिप्रायः ।

[3]श्रीजयदेवेत्यादि—

श्रीजयदेवकवेरिदं कुरुते मुदम् ए
मङ्गलमुज्ज्वलगीतं जय जय देव हरे ॥ ८ ॥

श्रीजयदेवकवेः इदम् उज्ज्वलेत्यभिप्रायं प्रकटयति श्लोकः ।

[4]पद्मेत्यादि—

पद्मापयोधरतटीपरिरम्भलग्नकाश्मीरमुद्रितमुरो [5]मधुसूदनस्य ।
व्यक्तानुरागमिव खेलदनङ्गखेदस्वेदाम्बु[6]पूरमनुपूरयतु प्रियं वः ॥ १ ॥

मधुसूदनस्य मुरारेः उरो वक्षो वो युष्माकं प्रियम् अपेक्षितम् अनुपूरयतु । करोत्वित्यर्थः । किंभूतम् उरः । पद्मापयोधरतटीपरिरम्भलग्नकाश्मीरमुद्रितम् । पद्मायाः लक्ष्म्याः पयोधरौ तयोस्तटी परिसरः पार्श्वभागः तस्याः परिरम्भः उपगूहनं तेन लग्नं च तत् काश्मीरं कुङ्कुमं च तेन[7] मुद्रितम् । तत्स्तनाकारमण्डलाकृतिचिह्नितम् । ममेदं मुरारेरुरो न त्वन्यस्याः इत्यभिप्रायेण मुद्रितं चिह्नितम् । अन्योऽपि स्ववस्तुनि द्रव्ये[8] वा ग्रन्थिमुद्राङ्कलक्षं करोतीत्यर्थः ।

---

1) B नवश्च आसा(षा)ढजलधरश्चेति । 2) B करोतीत्यर्थः ।

3) B reads the following verse between verse no. 7 and verse no. 8:—

तव चरणं (?चरणे) प्रणता वयमिति भाव[य] ए ।
कुरु कुशलं प्रणतेषु जय जय देव हरे ॥

It is to be noted, however, that B does not have any comment on it.

4) A श्री । । P पद्मेति.

5) P मुरसूदनस्य । 6) P पूरमुपपूरयतु । ) 7: B adds चेति ।

8) द्रव्येन ग्रन्थिमुद्राङ्कलक्षं करोतीत्यर्थः । B द्रव्ये वा ग्रन्थं तमुद्रां (?) करोति इत्यर्थः ।

किंभूतमिव । व्यक्तानुरागमिव । अन्तःस्थितः सन् बहिर्निःसृत्य व्यक्तः आविर्भूतः अनुरागः प्रेम यस्मिन् तत्तथा तदिव । पुनः किंभूतम् । खेलदनङ्गखेदस्वेदाम्बुपूरम् । खेलत् क्रीडंश्चासौ अनङ्गश्च तेन खेदः प्रयासः तेन स्वेदाम्बु स्वेदरूपं नीरं तस्य पूरः [1]प्रवाहः समूहो यत्र तत्तथा तस्मिन् तत् । गीतार्थं श्लोकेन सूचयति ।

वसन्तेत्यादि—

वसन्ते वासन्तीकुसुमसुकुमारैरवयवै-
भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम् ।
अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
[2]वलद्बाधां राधां सरसमिदमूचे सहचरी ॥ २ ॥

राधां प्रति सहचरी सखी सरसं यथा स्यात्तथा यदग्रे गीतेन वक्ष्यमाणं [3]इदमेव ऊचे उवाच । रसेन सह वर्तत इति सरसम् । तत्क्रियाविशेषणं द्वितीयान्तं नपुंसकमेव । किंभूताम् राधाम् । वलद्बाधां वलन्ती वर्धमाना बाधा व्यथा यस्यास्ताम् । कस्मिन् काले । वसन्ते । किंभूताम् भ्रमन्तीं चलन्तीम् । कस्मिन् । कान्तारे दुर्गे पथि मार्गे । कैरवयवैः । चरणादिभिः । किंभूतैः । वासन्तीकुसुमसुकुमारैः । वासन्ती माधवीलता[4] । तस्याः कुसुमानि । तद्वत् सुकुमारा मृदुलाः तैः । पुनः किंभूताम् । बहुविहितकृष्णानुसरणाम् । बहुधा अनेकप्रकारेण अथवा बहुवारं विहितं कृतं कृष्णानुसरणं कृष्णान्वेषणं यया सा तथा ताम् । कया हेतुभूतया । अमन्दं अत्यर्थं यथा स्यात्तथा कन्दर्पज्वरजनितचिन्ताकुलतया । दाहहेतुत्वात् कन्दर्प एव ज्वरः अथवा कन्दर्पेण ज्वरस्तेन जनिता प्रादुर्भूता जीवनचिन्ता तया आकुला व्याकुला तस्याः भावस्तया ।

ललितेत्यादि—

[5]वसन्तरागे रूपकताले ।

ललितलवङ्गलता[6]परिशीलनकोमल[ मल ]यसमीरे
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे ।

---

1 ) P, A प्रवाहसमूहो
2 ) A चलद्बाधां
3 ) A च यत् तदूचे; B इद( ?दं ) यत्तदूचे.
4 ) A adds इत्यमरः ।
5 ) A drops रूपकताले; B ) वसंतरागेण गीयते रूपकताले । रागलक्षणात् ।
6 ) B °परिशीतल°

विहरति हरिरिह सरसवसन्ते नृत्यति
युवतिजनेन समं सखि विरहिजनस्य दुरन्ते ॥ ध्रुवपदम् ॥१॥

हे सखि राधे इह अस्मिन् सरसवसन्ते हरिः श्रीकृष्णः विरह( हर )ति क्रीडति। सकलपुष्पादिरसेन सह वर्तत इति सरसः सरसश्चासौ वसन्तश्चेति। तस्मिन्। न केवलं विहरति नृत्यति च। कथम्। समं साधम्। केन युवतिजनेन। युवतिश्चासौ जनश्चेति। जात्यभिप्रायेण एकवचनम्। साकं सार्द्धं समं सह। तृतीया सहयोगे। किम्भूते वसन्ते। दुरन्ते। दुःखेन प्राप्यते अन्तं अवसानं समाप्तिर्यस्य स तथा तस्मिन्। कस्य विरहिजनस्य। स्वच्नमदायाः सकाशाद् विरहो विश्लेषो यस्यास्तीति स विरही स चासौ जनश्चेति। तस्य विरहिजनस्य दुरन्तत्वं दर्शयति। पुनः किंभूते। ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे। ललिता रमणीयाश्च ता लवङ्गलताश्च तासां [1]परिशीलनं स्पर्शः तेन कोमलो मन्दो मलयसमीरः चन्दनाचलवायुर्यत्र संस्तथा तस्मिन्। पुनः किम्भूते। मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे। मधुकराणां भ्रमराणां निकरः समूहः तेन करम्बिता मिश्रिताश्च ते कोकिलाश्च तेषां कूजितं शब्दितं कुञ्जकुटीरं यस्मिन् स तथा तस्मिन्। कुञ्जान्येव कुटीराणि ह्रस्वमन्दिराणि।

उन्मदेत्यादि—

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे।
अलिकुलसङ्कुलकुसुमसमूहनिराकुलबकुलकलापे ॥ २ ॥

पुनः किंभूते[1]। उन्मदमदनमनोरथपथिकवधूजनजनितविलापे। [2]उन्मदमदनश्च उद्गतौ हर्षकामौ यत्र। एवंविधो मनोरथः कामुकस्पृहा। तया युक्तानां पथिकवधूजनानां जनितो विलापः परिदेवनं यस्मिन् वसन्ते येन वा स तथा तस्मिन्। अथवा पथिकानां वधूजनानां उत्कृष्टो मदो येन स तथा चासौ मदनश्च तेन मनो[ रथः ] प्रियसङ्गमाभिलाषो येषां ते तथा ते च पथिकवधूजनाश्च तैर्जनितः कृतः विलापः परिदेवनं यत्र स तथा तस्मिन्। पुनः किम्भूते। अलिकुलसङ्कुलकुसुमसमूहनिराकुलबकुलकलापे। अलीनां भ्रमराणां कुलं समूहस्तेन सङ्कुलो व्याप्तः स चासौ कुसुमसमूहश्च तेन निरन्तरं आकुला व्याप्ताः बकुलानां कलापाः समूहा यत्र स तथा तस्मिन्।

'वकुलो वञ्जुलोऽशोके समौ करकदाडिमौ' इत्यमरः।

---

1 ) B adds वसन्ते.

2 ) B reads उत् अधिकं मदो यस्य स उन्मदमदनश्चासौ मनोरथश्चेति उद्गतो हर्षकामो यत्र एवं मनोरथः.

मृगमदेति—

मृगमदसौरभरभसवशंवदनवदलमालतमाले ।
युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ॥ ३ ॥

पुनः [1]किम्भूते । मृगमदसौरभरभसवशंवदनवदलमालतमाले । मृगमदः कस्तूरी तस्य सौरभम् आमोदः तस्य रभसः आधिक्यं तस्य वशंवदानि अनुसारीणि सदृशानि तद्वत्सुगन्धीनि तानि च नवदलानि [2]नूतनपर्णानि तेषां माला समूहो यस्मिन् तादृशस्तमालो यत्र स तथा तस्मिन् । पुनः किम्भूते । युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले । युवानो तरुणाश्च ते जनाश्च तेषां हृदयानि तेषां विदारणं तस्मै । मनसिज-नखाः कन्दर्प-करजाः तेषां रुचिरिव दीप्तिर्येषां तानि तथा तानि च नवकिंशुकानि पलाशकुसुमानि च तेषां जालं समूहो यस्मिन् स तथा तस्मिन् ।

मदनेत्यादि—

मदनमहीपतिकनकदण्डरुचिकेसरकुसुमविकाशे ।
मिलितशिलीमुखपा[3]टलिपटलकृतस्मरतूणविलासे ॥४॥

पुनः किंभूते[4] । मदनमहीपतिकनकदण्डरुचिकेसरकुसुमविकाशे । मदनश्चासौ महीपती राजा च । तस्य कनकदण्डश्छत्रं तस्य रुचिरिव रुचिः येषां तानि तथा । तानि च केसरकुसुमानि नागकेसरकुसुमानि तेषां विकाशो विकसनं यस्मिन् स तथा तस्मिन् । पुनः किंभूते । मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे । मिलिताः शिलीमुखाः षट्पदाः यस्मिन् तत्तथा । तच्चत्पाटलिपटलं पाटलिकुसुमनिवहं च तेन कृत्वा कृतः स्मरतूणविलासः स्मरस्य मदनस्य तूणीरस्य शोभाकारो यस्मिन् स तथा । तस्मिन् ।

विगलितेत्यादि—

विगलितलज्जितजगदव[5]लोकनतरुणकरुणकृतहासे ।
विरहिनिकृन्तनकुन्तमुखाकृतिके[6]तकदन्तुरिताशे ॥५॥

पुनः किंभूते । विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे । विगलिता गता लज्जा यस्य निर्लज्जवदित्यर्थः । तच्च तज्जगच्च तस्यावलोकनं तस्मात्तरुणैः नवैः करुणतरुभिः कृतो हासः पुष्पलक्षणो यस्मिन् स तथा । अथवा अवलोकनेन तरुणकरुणानि नवीनकरुणकुसुमान्येव कृतो हासो येन वसन्तेन स तथा तस्मिन् । पुनः किंभूते । विरहिनिकृन्तनकुन्तमुखाकृतिकेतकि(की)दन्तुरिताशे । विरहिणां वियोगिनां निकृन्तनं छेदनं तस्मै कुन्तः [7]अस्त्रविशेषः कामप्रासः

---

1) B कथंभूते वसन्ते. 2) B नूतनपत्राणि. 3) A B पाटलपटल 4) B adds वसन्ते.
5) P ०लोकित. 6) A केतकि(की) B केतकी. 7) A, B आयुधविशेषः

तस्य मुखमग्रभागः तस्याकृतिरिवाकारो येषां तानि तथा तानि च केतकि(की)दन्तुरितानि च तानि आशासु दिक्षु यस्मिन् स तथा तस्मिन्। [1]दन्तुरितस्येव आचरितानि केतकीनां दन्तुरितानि मुकुलानि । अथवा कुन्तमुखस्येवाकृतिर्यासां तास्तथा । ताश्च ताः केतक्यः केतकीमुकुलानि च ताभिर्दन्तुरिता आशा दिशो यस्मिन् स तथा ।

माधविकेत्यादि—

माधविकापरिमलललिते नवमालतिजातिसुगन्धौ ।
मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ ॥६॥

पुनः किंभूते । माधविकापरिमलललिते । माधविकायाः कुसुमितवासन्त्याः परिमलो गन्धः तेन ललितः रमणीयः तस्मिन्[3] । पुनः किंभूते । [4]नवमालति-जातिसुगन्धौ । नवा नूतनाश्च ता मालत्यश्च तासां जातिः प्रादुर्भावः । [5]जनी प्रादुर्भावे इत्यस्य जादेशे तिप्रत्ययः । तथा शोभनो गन्धो यस्मिन् स तथा अथवा [6]नवमालिकया [7]कारणभूतया पुष्पविशेषेण अतिसुगन्धौ । नवा च मालिका चेति तया । पुनः किंभूते । मोहनकारिणि । [8]मोहनं वैचित्यं कर्तुं शीलमस्येति स तथा तस्मिन् । केषां । मुनिमनसामपि । मुनयो जितेन्द्रियाः वनवासिनो विकारहीनाः नित्यनैमित्तिकादिव्रताचारवन्तस्तेषामपि । पुनः किंभूते । तरुणाकारणबन्धौ । तरुणानां युवजनानां अकारणेन उपकारं विनैव बन्धुः हितकारी कुटुम्बसहायः कामोद्दीपनत्वात् । तस्मिन् ।

स्फुरदतीत्यादि—

स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते ।
वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥७॥

पुनः किंभूते । स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते । स्फुरन्ती पुष्पवन्ती चासौ अतिमुक्तलता च वासन्ती । तस्याः परिरम्भणं [9]कर्तरि षष्ठी । तेन मुकुलितः पुलकितः रोमोद्गमश्च चूत आम्रवृक्षो यत्र स तथा तस्मिन् । कस्मिन् स्थाने हरिर्विहरति । वृन्दावनविपिने । वृन्दावनाख्यं यद्विपिनं वनं तत्तस्मिन् । पुनः [10]किंभूते । परिसरपरिगतयमुनाजलपूते । परिसरे समीपे परिगतं समन्ताद्गतं तच्च तद्यमुनाजलं च तेन पूते पवित्रीभूते तस्मिन् ।

1) B reads: दन्तुरितान्येव आचरितानि केतकीनामाचरितानि दन्तुरितानि मुकुलानि ।
2) P मालिक; B मल्लिका. 3) B adds वसन्ते 4) P मालिक B मालति.
5) B drops जनी...प्रत्ययः । 6) B नवमल्लिकया 7) P, B करणभूतया.
8) B मोहन्यां वैर्चित्यम् ?
9) B drops कर्तरि षष्ठी. 10) B कथंभूते वसन्ते ।

श्रीजयदेवेत्यादि—

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारम् ।
सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम् ॥८॥

इदं गीतं श्रीजयदेवभणितम् । उदयति राजते । [1]किम्भूतम् । हरिचरणस्मृतिसारम् । हरेश्चरणौ, तयोः स्मृतिः स्मरणम्, तत्र सारं [2]मुख्यसेवनभूतम् । पुनः किम्भूतम् । अनुगतमदनविकारम् । अनुगतोऽनुस्फुरितो [3]मदनेन विकारो यस्मिन् । [4]पथिकवधूजनजनितविलापे इत्यस्याभिप्रायं वसन्ते श्लोकाभ्यां स्पष्टयति ।

दरविदलितेत्यादि—

दरविदलितमल्लीवल्लिचञ्चत्पराग-
प्रकटितपटवासैर्वासयन् काननानि ।
इह हि दहति चेतः केतकीगन्धबन्धुः
प्रसरदसमबाणप्राणवद्गन्धवाहः ॥१॥

हे राधे । गन्धवाहः मलयजो वायुः इह वसन्ते विरहिणीनां [ विरहिणां ] चेतो दहति । किं कुर्वन् । वासयन् [5]सुगन्धयन् । कानि । काननानि । कैः कृत्वा । दरविदलितमल्लीवल्लिचञ्चत्परागप्रकटितपटवासैः । दरविदलिता ईषद्विकसिताश्च ता मल्लीवल्ल्यश्च । तासु चञ्चन्तः इतस्ततो गच्छन्तः ते च ते परागाश्च [6]पुष्परेणवश्च सुगन्धिवस्तुचूर्णानि च । अथवा तैः परागैः प्रकटितपटुवासाः प्रकटिताश्च पटु(? पटवः) उत्कृष्टाश्च ते वासाश्च तैः । [7]तनु विरहिणां दहति । किम्भूतः । प्रसरदसमबाणप्राणवत् । प्रसरंश्चासौ असमबाणः कन्दर्पश्चेति तस्य प्राण इव समान इव भवतीति प्राणवत् । पुनः किम्भूतः । केतकीगन्धबन्धुः । केतकीनां गन्धः तस्य बन्धुः सहवासी ।

उन्मीलनेत्यादि—

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकली[8]कलकलैरुद्गीर्णकर्णज्वराः ।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥२॥

---

1) B इति किम् 2) B मुख्यं सेवभूतम् ।
3) B मदनस्य 4) B drops the whole sentence (from पथिक to स्पष्टयति)
5) E गन्धयन्. 6) B पुष्परसा च ते प्रकटितपटवासाश्च सुगन्धिसुपूर्णानि च अथवा तैः प्रकटिताश्च ते पटुवत्कृष्टाश्च ते वासाश्च तैः । 7) B drops the sentence. 8) B कलरवै०

अमी वासन्तिका वासरा दिवसाः कथं कथमपि नीयन्ते । कैः । पथिकैः प्रवासिभिः । किंविशिष्टाः । उद्गीर्णकर्णज्वराः । उद्गीर्ण(र्णाः)जनिताः कर्णज्वरा कर्णसन्तापा येषु ते तथा । कैः । उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर(र) क्रीडत्कोकिलकाकलीकलकलैः । उन्मीलन्तः उद्भवन्तश्च ते मधुगन्धाश्च पुष्परसवासाश्च तत्र लुब्धा आसक्तास्ते च ते मधुपाश्च तैर्व्याधूता आन्दोलितास्ते च ते चूताङ्कुराः आम्रपल्लवाः तेषु क्रीडन्तश्च ते कोकिलाश्च तेषां काकल्यः स्फुट-सूक्ष्मध्वनयः तासां कलकलाः कोलाहलाः तैः । तत्र मरणाशङ्का व्या(?आ)पादिता । कैः साधनैः कृत्वा नीयन्ते । ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैः । [1]गृहस्थितध्याने अथवा 'ध्या(? ध्यै)' चिन्तनेत्यर्थे तस्य क्षणस्तस्मिन् प्राप्तां(? प्राप्तं) नष्टपुत्रादिदर्शनम् । ईक्षिताश्च ताः प्राणसमाः प्राणेन तुल्याः स्वकीयाङ्गनाश्च तासां समागमा भोगाश्च तैः रसाः सुखानि तैरुल्लासाः परितोषाः तैः अथवा किंभूतैर्नीयन्ते । ध्यानेति । रसाः सुखानि तैरुल्लासाः परितोषा येषां तेस्तथा[2] । उत्तरगीतं श्लोकेन सूचयति ।

अनेकेत्यादि—

अनेकनारीपरिरम्भसंभ्रमस्फुरन्मनोहारिविलासलालसम् ।
मुरारिमारादुपदर्शयन्त्यसौ सखी समक्षं पुनराह राधिकाम् ॥१॥

असौ सखी राधां प्रति पुनराह अब्रवीत् । किं कुर्वती सती । आरात् समीपे समक्षं सखीनामग्रे प्रत्यक्षं यथा स्यात्तथा मुरारिं श्रीकृष्णम् उपदर्शयन्ती । किंभूतम् । अनेकनारीपरिरम्भसंभ्रमम् अनेकाश्च ताः नार्यश्च तासां परिरम्भः आश्लेषः तत्र संभ्रमो यस्य स तथा । पुनः किम्भूतम् । स्फुरन्मनोहारिविलासलालसम् मनो हर्तुं शीलमस्य स तथा । विलासो हासः तत्र लालसः कामो यस्य स तथा स्फुरंश्चासौ मनोहारी विलासलालसश्च तम् अनेकनारीपरिरम्भसंभ्रमस्फुरन्मनोहारिविलासलालसम् ।

चन्दनेत्यादि—

[3]रामगिरीरागे यतिताले

चन्दनचर्चितनीलकलेवरपीतवसनवनमाली ।
केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली ॥१॥
हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे । ध्रुवं पदम् ॥

1) B गृहस्थितः ध्यानेः । अथवा ध्यानचिन्तनार्थं तस्य क्षणस्व(स्त)स्मिन् । पुत्रादिप्राप्तपुत्रादि दर्शनं ईक्षताश्च ताः । 2) B reads here the verse नित्योत्सङ्गवसद्भुजङ्ग etc occurring towards the end of this canto (with the variant reading अद्योत्सङ्गवसद्भुजङ्ग॰) and adds the gloss. 3) B रामगरीरागेण गीयते । रागलक्षणात् । ...... रामकली प्रदी(दि)ष्टा । रूपकताले ।

इह मुग्धवधूनिकरे हरिः कृष्णो विलसति क्रीडति। मुग्धाः मनोहारिण्यश्च ताः वध्वश्चेति तासां निकरः कदम्बकस्तस्मिन्। किम्भूते। विलासिनि। विलासः शृङ्गारजनितो विकारोऽस्यास्तीति तथा तस्मिन्। किम्भूतो हरिः। चन्दनचर्चितनीलकलेवरपीतवसनवनमाली। नीलं च तत् कलेवरं शरीरं चेति। चन्दनेन चर्चितमनुलिप्तं यस्य स तथा। पीतं वसनं दुकूलं यस्य स तथा। वनमालास्यास्तीति वनमाली। पुनः कथम्भूतः। केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली। केल्या चलती व्यालोले च ते मणिकुण्डले रत्नैर्युक्तकुण्डले च ताभ्यां मण्डितं गण्डयुगं यस्य स तथा। स चासौ स्मितशाली च ईषद्धास्ययुक्तः।

पीनपयोधरेत्यादि—

पीनपयोधरभारभरेण हरिं परिरभ्य सरागम्।
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम् ॥२॥

तथा काचिद्गोपवधूः अनुगायति। उदञ्चितपञ्चमरागम्। उदञ्चितः ऊर्ध्वं गच्छन् स चासौ पञ्चमः पञ्चमाख्यः रागो यत्र तम्। किं कृत्वा। सरागं यथा स्यात्तथा हरिं श्रीकृष्णं प्रेयांसं परिरभ्य गाढा(ढमा)लिङ्ग्य। केन कृत्वा। पीनपयोधरभारभरेण। पीनौ पृथुलौ तौ च पयोधरौ च तावेव भारौ गुरुवस्तुनी। तयोर्भरः आधिक्यं तेन।

कापीत्यादि—

कापि विलासविलोलविलोचनखेलनजनितमनोजम्।
ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम् ॥३॥

कापि [1]प्रौढगोपी अधिकं यथा स्यात्तथा ध्यायति। किम्। मधुसूदनवदनसरोजम्[2]। *मधुदैत्यं सूदितवान् मर्दितवानिति मधुसूदनः तस्य वदनमेव सरोजं* मुखकमलम्। किंविशिष्टम्। विलासविलोलविलोचनखेलनजनितमनोजम्। विलासेन लीलया विलोले च ते विलोचने नयने च ताभ्यां कृत्वा खेलनं तया सह क्रीडा तस्माज्जनितो मनोजः कन्दर्पो येन स तथा तत्।

कापीत्यादि—

कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले।
चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले ॥४॥

तथा कापि नितम्बवती गोपी श्रुतिमूले कर्णमूले किमपि लपितुं भाषितुं मिलिता सती दयितं कृष्णं चारु यथा स्यात्तथा चुचुम्ब। क्व स्थाने। कपोलतले। किम्भूते। अनुकूले। कैः। पुलकैः रोमाञ्चैः।

1) B प्रौढा गोपी आधिक्यं। 2) B adds 'श्रीकृष्णमुखकमलम्' but drops from मधुदैत्यं to मुखकमलम्।

केलिकलेत्यादि—

केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले ।
मञ्जुलवञ्जुलकुञ्जगतं विचकर्ष करेण दुकूले ॥५॥

तथा काचिदङ्गना अमुं श्रीकृष्णं करेण दुकूले विचकर्ष आकृष्टवती। कस्मिन् स्थाने। [1]यमुनाजलकूले। यमुनायाः जलकूलं तीरं तस्मिन् । केन निमित्तेन । केलिकलाकुतुकेन । केलौ [2]कामक्रीडायां कलास्तासु कुतुकं विनोदस्तेन। किम्भूतम्। मञ्जुलवञ्जुलकुञ्जगतम्। [3]मञ्जुलः सुन्दरो यो वञ्जुलः तस्य कुञ्जे स्थितम् ।

करतलेत्यादि—

करतलतालतरलवलयावलिकलितकलस्वनवंशे ।
रासरसे सह नृत्यपरा हरिणा युवतिः प्रशशंसे ॥६॥

[4]रासरसे गोपा[? पी] क्रीडायां कापि युवतिः हरिणा श्रीकृष्णेन प्रशशंसे तुष्टुवे । किम्भूता । तेन सह नृत्यपरा । किम्भूते । करतलतालतरलवलयावलिकलितकलस्वनवंशे । कराणां तलानि तेषां तालाः वाद्यप्रकाराः तैस्तरलाश्चञ्चलाश्च वलयावलयो [5]भूषणविशेषराजयश्च । ताभिः कलितो विशेषितः कलस्वनो मधुरध्वनिर्वंशो यत्र तथा तस्मिन्।

श्लिष्यतीत्यादि—

श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामाम् ।
पश्यति सस्मित[6]चारुतरामपरामनुगच्छति वामाम् ॥७॥

तथा कामपि बालां श्लिष्यति उपगूहति । कामपि बालां चुम्बति । कामपि रामां रमयति क्रीडयति । सस्मितचारु हसितं चारु यथा स्यात्तथा अपराम् अन्यां पश्यति प्रेक्षते। अपराम् अनुगच्छति । गच्छन्तीमनुसरति ।

श्रीजयदेवेत्यादि ।

श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यम् ।
वृन्दावनविपिने [1]ललितं वितनोतु शुभानि यशस्यम् ॥८॥

---

1) B drops from यमुनायाः to तस्मिन् । 2) B क्रीडायां । 3) B मञ्जुलाः सुन्दरास्ते च ते वञ्जुला वेतसास्तेषां कुज[? कुञ्जो] गह्वर(रः) तत्र गतम् । 4) B राशरसे रासक्रीडायां । 5) B भूषणविशेषजालयश्च। 6) P चारुपरा।

श्रीजयदेवभणितमिदम् उदयति शोभते। [1]इदमिति किम्। [2]अद्भुतकेशवकेलि-रहस्यम्। अद्भुताः केशवस्य केलयः क्रीडास्तासां रहस्यम्। किम्भूतम्। यशस्यं यशस्करम्। [3]शुभानि वितनोतु विस्तारयतु। [4]गीतापेक्षितार्थं श्लोकाभ्यां सूचयति।

विश्वेषामित्यादि।

विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर–
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम्।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्तिमानिव मधौ मुग्धो हरिः [5]क्रीडति ॥१॥

हे सखि राधे! मधौ वसन्ते मुग्धो मनोहरो हरिः क्रीडति। [6]यतोऽहरहः अविद्या तत्कार्यं संसारं हरतीति हरिः परमात्मापि सन्। मुग्धोऽविवेकी च। क इव। मूर्तिमान् शृङ्गार इव। किम्भूतः। स्वच्छन्दं यथा स्यात्तथा व्रजसुन्दरीभिर्बल्लवीभिः अभितः पुरतः पृष्ठतश्च आलिङ्गितः। कथम्। प्रत्यङ्गम् अङ्गम् अङ्गं प्रति प्रत्यङ्गम्। किं कुर्वन्। जनयन् उत्पादयन्। किम्। आनन्दं हर्षम्। केषाम्। विश्वेषां जगतां सकलप्राणिनां स्थावर[7]जङ्गमादीनामपि। केन कृत्वा। अनुरञ्जनेन प्रीतिभावेन। पुनः किं कुर्वन्। [8]उपनयन्। कम्। अनङ्गोत्सवम्। अनङ्गस्य कामस्य उत्सवः उत्कर्षः। तम्। कैः कृत्वा। अङ्गैः करादिभिः। किम्भूतैः। इन्दीवरश्रेणीश्यामलकोमलैः। इन्दीवराणां[9] श्रेणयः राजयः तद्वत् श्यामलानि च तानि कोमलानि च तैः।

[10]अद्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं
प्रालेयप्लवनेच्छयानु[11]सरति श्रीखण्डशैलानिलः।
किं च स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदया–
दुन्मीलन्ति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः ॥२॥

हे सखि राधे! अद्य अधुना वसन्तकाले श्रीखण्डशैलानिलः चन्दनाचल-समीरः ईशाचलं हिमवन्तम् अनुसरति। कस्मादिव। उत्सङ्गवसद्भुजङ्गकवल-क्लेशादिव। उत्सङ्गेषु चन्दनतरुकोटरेषु [12]वर्तन्ते ते भुजङ्गाः फणिनः तेषां कवलो

1) A, B चरितं । 2) केशवकेलिरहस्यम्। केशवस्य कृष्णस्य केलयः। B)केशवकेलि-रहस्यं। श्रीकृष्णक्रीडारहस्यम्। 3) P, B drop this sentence.। 4) B गीता-विक्षितार्थं (? गीतापेक्षितार्थं)। 5) B पातु वः। 6) B drops from यतो to मुग्धोऽविवेकी च। 7) A, B जङ्गमानामपि। 8) B अनङ्गोत्सवम् उपनयन्। कैः कृत्वा। 9) B adds नीलकमलानां। 10) A, B नित्योत्सङ्ग०। 11) B चरति। 12) A वसन्तश्च ते; B वसति वर्तते।

प्रसनम् । [1]कर्तरि षष्ठी । तेन क्लेशो यथा तथा । तस्मादिव । कया अनुसरति । प्रालेयप्लवनेच्छया प्रालेयं हिमं तत्र प्लवनं अवगाहः तत्रेच्छा तया । तथा पिकानां कोकिलानां गिरो वाचः उन्मीलन्ति प्रचरन्ति । किंरूपाः । कुहूः कुहूरिति । किंभूताः कलोत्तालाः । कला मधुरा अस्फुटाश्च ताः उत्तालाश्च उच्चाः एताः उत्ताना [2]इति पाठे अयमेवार्थः । कस्मात् । हर्षोदयात् । [3]हर्षस्य आनन्दस्य । उदयः उद्भवः तस्मात् । किं कृत्वा [ आलोक्य ] अवलोक्य । कानि । रसालमौलिमुकुलानि[4] कुसुमकुड्मलानि तानि । अथवा किञ्चित् स्निग्धानि च तानि रसालमौलिमुकुलानि च तानि ।

इदानीं समयकथोपक्रमं [5]परिहाय गायतां शृण्वतां चाशिषमाह—

[6]रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा-
मभ्यर्णं परिरभ्य निर्भरमुरः प्रेमान्धया राधया ।
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति-
व्याजा[7]दुत्कटचुम्बितः स्मितमनोहारी हरिः पातु वः ॥३॥

पातु रक्षतु । कः । हरिः । [8]रोगशोकसन्तापादिकं हरतीति हरिः अर्थाद्भक्तजनस्य । कान् । वः युष्मान् । कथम्भूतो हरिः । [9]उद्भटचुम्बितः उद्भटः सोत्कटं प्रकटं यथा स्यात्तथा चुम्बितः । [10]आत्ममुखेन कृष्णमुख(ख) संयोगि(गी)कृतमित्यर्थः । कया राधया । कथम्भूतया । प्रेमान्धया । प्रेम्णा अन्धा सा तया कृष्णस्यातिप्रीत्या । चक्षुःप्रयोजनाभावादासन्नसखीजनादिकं नावलोकयतीत्यर्थः । कस्मात् । गीतश्रुतिव्याजात् । [11]गीतस्य सम्पूर्णभरतोक्तगुणसहितस्य श्रुतिः श्रवणम् । तस्याः व्याजः छलः तस्मात् अथवा गीतश्रुतिव्याजाद्वा गानप्रशंसाव्याजेन वा । धन्योऽसि भद्रं गायसीति किं कृत्वा । परिरभ्य आलिङ्ग्यः(ङ्ग्य) । किम् । उरो वक्षस्थलम् । [12]'उरो वत्सं च वक्षश्च पृष्ठं तु चरमं तनो'रित्यमरः । कथं यथा स्यात् । निर्भरं गाढं यथा स्यात् । कस्मिन् । अभ्यर्णे निकटे । न केवलं परिरभ्य व्याहृत्य उक्त्वा च । कथम् । इति । इतीतिकथम् । भो कृष्ण, साधु शोभनं यथा भवति तथा त्वद्वदनं मुखं सुधामयं अमृतमयमिति । [13]वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखमित्यमरः । पुनः कथम्भूतो हरिः । स्मितमनोहारी । स्मितेन [ ईषद् हासेन मनो हरतीति ] तस्माच्चुम्बनकुशलमाकलय्य ईषद् हास्येन मनोहरणशील इत्यर्थः ।

इति श्रीगीतगोविन्दटीकायां सामोददामोदरो नाम
प्रथमः सर्गः ।

---

1) B drops कर्तरि षष्ठी । 2) P मिति । 3) B drops this sentence. 4) B adds चेति । but drops from कुसुम॰ to मुकुलानि च तानि । 5) B परिहाय तां । 6) P gives the प्रतीक [ रासोल्लाप(? सभ )रेत्यादि ] only. । 7) A ॰दुत्कटचुम्बितः स्मि । 8) B drops the line रोग॰...॰जनस्य । 9) A, B उत्कट॰ । 10) B drops the sentece आत्म॰...मित्यर्थः । 11) B drops the line गीतस्य...॰...व्याजाद्वा । 12) B drops the line उरो...इत्यमरः । 13) B drops the line वक्त्रा॰त्यमरः ।

# द्वितीयः सर्गः ।

अक्लेशकेशवः ।

उत्तरगीतं श्लोकेनावतारयति । विहरतीत्यादि ।

विहरति वने राधा साधारणप्रणये हरौ
विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः ।
क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली-
मुखरशिखरे लीना दीनाप्युवाच रहः सखीम् ॥१॥

सा राधा रहः एकान्ते सखीं प्रति उवाच । किंभूता । लीना । न केवलं लीना । दीना [1]दुःखिता । कुत्र लीना । क्वचिदपि कस्मिंश्चित् स्थाने वर्तमाने लताकुञ्जे । लताभिर्विहितं कुञ्जं गत्वा तस्मिन् । किम्भूते । गुञ्जन्मधुव्रत-मण्डलीमुखरशिखरे । गुञ्जतां मधुव्रतानां भ्रमराणां मण्डली समूहः तया मुखरं ध्वयुक्तं शिखरं यस्य तत्तथा तस्मिन् । किंभूता गता । क्व । अन्यतः । केन ईर्ष्यावशेन । परोत्कर्षासहनमीर्ष्या । तस्या वशः तेन । कस्मात् । विगलित-निजोत्कर्षात् । विगलितो विभ्रष्टः स चासौ निजः स्वकीयः उत्कर्षश्चेति सौभाग्यं च । तस्मात् । कस्मिन् सति । हरौ कृष्णे अन्याभिः सह वने विहरति क्रीडति सति । किंभूते राधासाधारण[2]प्रणये । [3]राधायां साधारण इत्यन्यविषयः प्रणयः प्रीतिर्यस्य स तथा । किमुवाचे[4]त्याकाङ्क्षायां तमाह ।

संचरेत्यादि ।

[5] गुर्जरीरागे यतिताले ।

संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशं
चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम् ।

---

1) B drops दुःखिता कुत्र लीना । 2) P °प्रिये 3) P राधायां साधारणऽन्यः प्रणयःप्रीतिर्यस्य स तथा । A राधायां साधार इत्यन्यविषयः प्रीतिर्यस्य स तथा । B राधायाः साधारण अतिशय प्रीतिर्यस्य स तथा । 4) B °त्याशङ्कयाह. 5) B गुर्जरीरागेण गीयते । रूपकताले । अत्रापि प्रोषितप्रेयसी नाय(यि)का ।

रासे हरिमिह विहितविलासं
स्मरति मनो मम कृतपरिहासम् ॥ ध्रुवपदम् ॥१॥

हे सखि रासे रासक्रीडायां विहितविलासं कृतक्रीडं हरिं इह निकुञ्जे मम मनः स्मरति। किंभूतम्। [1] कृतपरिहासम्। कृतः परिहासो नर्म येन। [2] स तथा तम्। [3] पुनः किंभूतम्। संचरन् अधरसुधया मधुरो ध्वनिर्यस्य सः मुखरितः शब्दं कारितः मोहनः त्रैलोक्यस्य अवैमनस्यकारी मनोहरो वंशो यस्य तम्। वेणुवादनावस्थां दर्शयति। पुनः किम्भूतम्। चलितदृगञ्चलचञ्चलमौलिकपोविलोलवतंसम्। चलितौ चञ्चलौ दृगन्तौ नेत्रान्तौ यस्य स तथा। चञ्चलो मौलिर्मुकुटो यस्य स तथा। [4] कपोलयोर्विलोले वतंसे कर्णभूषणं(णे) यस्य स तथा। [5]वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। अकारस्य लोपं केचिदिच्छन्ति। चलितदृगञ्चलश्चासौ चञ्चलमौलिश्चासौ कपोलविलोलवतंसश्चेति यस्य स तम्।

चन्द्रकेत्यादि।

चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम्।
प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदि[6]रसुवेशम् ॥२॥

पुनः कथम्भूतम्। चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम्। चन्द्रकाश्च चन्द्राकारास्तैश्चारवः सुन्दराः ते च मयूरशिखण्डका मयूरपिच्छानि तेषां मण्डलं निकरः तेन वलयिता वेष्टिताः केशा यस्य स तथा। पुनः किम्भूतम्। प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदित(र?)सुवेशम्। प्रचुरं विस्तीर्णं च तत् पुरन्दरधनुश्च तेनानुरञ्जितो भूषितः स चासौ मेदुरः स्निग्धः मुदिरो नीलमेघश्च तस्येव वेषो यस्य स तथा तम्। [7]अयं श्यामः पीतवसनेन शक्रचापयुक्तनीलमेघवत्प्रतीयते।

गोपकदम्बेत्यादि।

गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभम्।
बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम् ॥३॥

पुनः किम्भूतम्। गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभम्। लम्बितलोभमिति पाठे एष एवार्थः। गोपानां कदम्बः समुदायः तस्य नितम्बवत्यो

1) B drops कृतपरिहासम्। 2) B drops स तथा तम्। 3) P drops from पुनः …… to वैमनस्यकारी; B drops from पुनः… to दर्शयति। किंभूतम्। 4) B कपोलयोः विलोलो अवतंसो भूषणो यस्य स तथा। 5) A वष्टि भागुरीत्याकारलोपः। स चासौ स चासौ स च सः। B drops from वष्टि… … to दिच्छन्ति। 6) P मुदिरत [?] सुवेशं; the 'प्रतीक, in the commentary, however, reads मुदितसुवेशं; B मुदितसुवेषम्। 7) B drops this sentnc.

नार्यः तासां मुखानि तेषां चुम्बनं तेन लम्भितः प्रापितो लोभो यस्य स तथा तम् । पुनः किम्भूतम् । बन्धुजीवमधुराधरपल्लवकलितदरस्मितशोभम् । बन्धुजीव-वत् रक्तपुष्पवद् मधुरः सुन्दरः स चासौ अधरपल्लवश्च तस्मिन् । कलितं स्वीकृतं तच्च तत् दरस्मितं ईषद्धास्यं तेन शोभा सौन्दर्यं यस्य तथा तम् । [1]उल्लसितस्मितशोभा यस्य स तं तथा। अर्थादधरपल्लव[2] एव उपमालङ्कारः।

विपुलेत्यादि ।

विपुलपुलकभुजपल्लववलयितबल्लवयुवतिसहस्रम् ।
करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिश्र(स्र)म् ॥४॥

पुनः किंभूतम् । विपुलपुलकभुजपल्लववलयितवप[ ° वलयितव ]ल्लवयुवति-सहस्रम् । वल्लवानां गोपानां युवतयो नार्यः तासां सहस्रम् । विपुलाः बहुलाः पुलकावलयो येषु ते तथा । ते च भुजाश्च तेषां पल्लवाः अग्रभागाः तैर्वलयितं आलिङ्गितं वल्लवयुवतिसहस्रं येन स तथा । पुनः किंभूतम् । करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिश्र(स्र)म् । करौ [च] चरणौ च उरश्च कर-चरणोरः । [3]समाहारद्वन्द्वेनैकत्वं तस्मिन्। करचरणोरसि मणीनां गणाः समूहाः तैर्युक्तानि भूषणानि तेषां किरणा अंशवः तैर्विभिन्नं दूरीकृतम् तमिश्रं(स्रं) येन स तथा तम् । अलुप्तसप्तमीसमासः। [4]प्राण्यङ्गमिति विस्तरः ।

जलदेत्यादि ।

जलदपटलवलदिन्दुविनिन्दकचन्दनतिलकललाटम् ।
[5]पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटम् ॥५॥

पुनः किम्भूतम् । जलदपटलवलदिन्दुविनिन्दकचन्दनतिलकललाटम् । जलं ददतीति जलदा मेघाः । तेषां पटलं समूहः तत्र वलत् प्रकटीभवत् योऽसाविन्दुश्चन्द्रः तस्य विनिन्दकस्तिरस्कर्तो(र्ता) चन्दनस्य तिलको ललाटे यस्य स तथा । पुनः किम्भूतम् । पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटम् । पीनाः पीवराश्च ते पयोधराश्चेति तेषां परिसरा निकटप्रदेशाः तेषां मर्दनं निर्दयं दयारहितं हृदयकपाटं यस्य स तथा तम् ।

मणिमयेत्यादि ।

मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम् ।
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम् ॥६॥

1) A अथवा उल्लसितस्मितस्य शोभा यस्य तं तथा; B. उल्लसितस्य [ स्मितस्य ] शोभा यस्य तं तथा । 2) B ° पल्लवे उपमा° । 3) B drops समाहारद्वन्द्वेनैकत्वं । 4) B प्राणाङ्गमिति विस्तारः । 5) P. पीनघनस्तनमण्डल ।

पुनः किम्भूतम् । मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम् । [1]वर-मणिमयेन निर्मिते ये मकराकारे मनोहरे कुण्डले । मणिमये च ते मकरमनोहर-कुण्डले चेति । ताभ्यां मण्डितौ भूषितौ गण्डौ यस्य स तथा तम् । [2]मणि-मयेति पाणिनीयव्याकरणमते प्राचुर्यविकारप्राधान्यादिषु मयट् । तथा उदारं श्रेष्ठम् । पुनः किम्भूतम् । अनुगतमुनिमनुजसुरासुरवरपरिवारम् । मुनयश्च मनुजा मनुष्याश्च सुराश्च असुराश्च मुनिमनुजसुरासुरा अनुगता अनुसारिणश्च ते । ते एव वराः श्रेष्ठाः परिवारा यस्य स तथा तम् ।

विशदकदम्बेति ।

विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तम् ।
मामपि किमपि कुरङ्ग[3]तरङ्गदनङ्गदृशा मनसा रमयन्तम् ॥७॥

पुनः किम्भूतम् । मिलितम् । कस्मिन् । विशदकदम्बतले । कदम्बस्य तलं कदम्बतलम् । विशदं शुद्धं यत् तत् कदम्बतलं चेति तस्मिन् । पुनः किम्भूतम् । शमयन्तं निवर्तयन्तम् । किम् । कलिकलुषभयम् । [4]कलेः कलुषः (? कलुषं) पापम् । तस्मात् भयं तत् । पुनः किम्भूतम् । मामपि किमपि तरङ्गदनङ्गदृशा मनसा रमयन्तम् । किमपि तरङ्गं चञ्चलं यथा स्यात्तथा । दर्शनाभावेन कथं रमयति । तदाह । किम्भूतेन । अनङ्गदृशा अनङ्गं पश्यतीति अनङ्गदृक् । [5]कर्तरि क्विप् तेन सकामेनेत्यर्थः । किम्भूतं हरिम् । मामपि रमयन्तम् । यतः तरङ्गं [6]तरङ्गवन्तं चञ्चलमित्यर्थः । पुनः किम्भूतम् । [[7]किमपि तरङ्गं किमप्यनुकूलं किमप्यलं वस्तु तदपि गच्छतीति किमपि तरङ्गः सर्वव्यापीति ।]? अतो मनसा रमयतीत्यर्थः । किं[8] वितर्के । वितर्के परिप्रश्ने क्षेपे निन्दाप्रकाशयोरिति विस्तरः ।

श्रीजयदेवेति ।

श्रीजयदेवभणित[9]मतिसुन्दरमोहनमधुरिपुरूपम् ।
हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनुरूपम् ॥८॥

---

1) B प्रचुरमणिमयेन । 2) B drops मणिमयेति.........to मयट् । 3) A and B तरङ्गमनङ्गदृशा; the commentary presupposes the reading तरङ्गम् तरङ्गदनङ्गदृशा । 4) P कलिमहानुभूतेन(?)कलुषरवं (? कलुषं) पापम् ; B कलिकलानुभूतेन (?) कलुषं । 5) B drops कर्तरि क्विप् । 6) B drops तरङ्गवन्तं । 7) A किमप्यनुकूलं वस्तु तदपि गछतिरतितरङ्ग(?) सर्वव्यापीत्यतो मनसा रमयतीत्यर्थः । B किमप्यनुकूलवस्तु तदपि गछतीति (?) किमपि तरङ्गः सर्वव्यापो अतो मनसा रमयतीत्यर्थः । 8) A किंचित् (?) वितर्के परिप्रश्ने श्लेषे (?) निंदाप्रकाशयो रत्यमरः । This line is not found in the Amarakosa. B drops from किं वितर्के.........to विस्तरः । 9) P मिति ।

[1]अतिसुन्दरमोहनमधुरिपुरूपम् । अतिसुन्दरं मोहनं च तत् मधुरिपुरूपं चेति । [2]मधुदैत्यस्य रिपुः तस्य रूपम् । पुनः किम्भूतम् । [3]श्रीजयदेवेन भणितम् । [4]तत् संप्रति सततमनुकूलं भवति । केषाम् । पुण्यवतां जनानाम् । कं प्रति । हरिचरणस्मरणं प्रति ।

अनन्यमना नु किमिति स्मरति तदाह गणयतीत्यादि ।

गणयति गुणग्रामं [5]भ्रामं भ्रमादपि नेहते
वहति च परीतोषं दोषं विमुञ्चति दूरतः ।
युवतिषु चलत्तृष्णे कृष्णे विहारिणि मां विना
पुनरपि मनो वामं कामं करोति करोमि किम् ॥१॥

हे सखि ममेदं मनो वाममेव कामं करोति किमहं करोमि । कुतः । [6]यतः कृष्णे कामाभिलाषं करोति । किम्भूते । मां विना विहारिणि क्रीडति । पुनः किम्भूते । चलत्तृष्णे चलन्ती वर्धमाना तृष्णा यस्य स तथा तस्मिन् । कासु । युवतिषु । न केवलं कामं करोति । तस्य कृष्णस्य गुणग्रामं गणयति । किञ्च । कृष्णात् भ्रामं चलनं भ्रमादपि [7]भ्रान्तिवशादपि नेहते । न कुरुते । [8]तस्मिन्नेव तिष्ठतीत्यर्थः । तस्मिन् कृष्णे परि(री)तोषं वहति । सदा दोषं च दूरतः [9]प्रविमुञ्चति परित्यजतीत्यर्थः ।

[10]मालवराग-एकतालीताले ।

निभृतेत्यादि ।

[11]निभृतनिकुञ्जगृहं गतया निशि रहसि [12]निलीय वसन्तं
[13]चकितविलोकितसकलदिशा [14]रतिरभसरसेन हसन्तम् ।
सखि हे केशिमथनमुदारं रमय मया सह
मदनमनोरथभावितया सविकारम् ॥ ध्रुवपदम् ॥१॥

हे सखि मया सह केशिमथनं [15]केशिनं दैत्यं मथितवानिति तं रमय क्रीडय । कथम्भूतम् । उदारं श्रेष्ठं सविकारं यथा स्यात् तथा । कथम्भूतया मया । [16]मदन-

1) P, B leave out सुन्दर; A drops अति to रूपम् । 2) A मधुनाम्नो दैत्यस्य । 3) A, B श्रीजयदेवभणितं । 4) A तत् हरिचरणयोः स्मरणं प्रति पुण्यक्तां पुंसां संप्रति अनुरूपम् अनन्यमनाः किमिसि स्मरति तदाह । B तत्......भवति । तेषां...जनानां हरिचरणस्मरणं प्रति अनन्यमनाः किमपि स्मरति तदाह । 5) P भामं, B drops भ्रामं । 6) B drops यतः । 7) B भ्रमतिवशादपि । 8) B drops this sentence. 9) B विमुञ्चति परिमुञ्चति इत्यर्थः । 10) B गौडमालवरागेण गीयते । 11) B निशत० । 12) P निलीलय । 13) B किंतविलोकित । 14) रतिरससरसेन° । 15) B drops केशिनं दैत्यं मथितवानिति तं । 16) A मद[न]स्य कामस्य मनोरथेन वाञ्छितेन भावितम्; B मदनस्य मनोरथः कामवाञ्छ [ञ्छा] तया भावितया ।

मनोरथः कामवाञ्छा तया भावितया । पुनः किम्भूतया । [1]निभृतनिकुञ्जगृहं गतया चेति । [2]पुनः किम्भूतं तम् । [3]निशि रहसि एकान्ते निलीय वसन्तम् । गुप्तं गत्वा तिष्ठन्तम् । [4]पुनः किम्भूतया । चकितविलोकितसकलदिशा । चकितेन युक्तं विलोकितं सकलासु दिक्षु यस्याः सा तथा तया । अथवा चकितं च तत् विलोकितं चेति सकलदिक्षु यस्याः सा तया । अथवा चकितेन विलोकिताः सकलदिशो यया सा तथा । [5]पुनः किम्भूतं कृष्णम् । हसन्तम् । केन रतिरभसरसेन । [6]रतौ रभसः औत्सुक्यं तस्य रसः तेन । पुनः किम्भूतया । मदनमनोरथभावितया । [7]मदनान्मनोरथः प्रियसङ्गमस्पृहा तया भावितया व्याप्तया । पुनः किम्भूतम् । सविकारम् । [8]मदनेन जनितो विकारस्तेन सह वर्तत इति सविकारस्तम् ।

प्रथमेत्यादि—

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलम् ।
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम् ॥२॥

पुनः किम्भूतया । प्रथमसमागमलज्जितया । प्रथमः आद्यश्चासौ समागमो [9]मिलनं तेन लज्जिता तया । कथम्भूतम् । अनुकूलं [10]वशवर्तिनम् । कैः । पटुचाटुशतैः । पटूनि चतुराणि चाटूनि [11]प्रियवादीनि [?वचनानि] । तेषां शतानि तैः । पुनः किम्भूतया । मृदुमधुरस्मितभाषितया । मृदु कोमलं मधुरं [12]कर्णपेयम् । स्मितेन [13]हास्येन युक्तं भाषितं यस्याः सा तथा तया । पुनः किम्भूतं तम् । शिथिलीकृतजघनदुकूलम् । शिथिलीकृतं [14]शैथिल्यमापादितं नितम्बभागपरि[धानं] वस्त्रं येन । [15]जघनं कटेरधोभागः । हारावलीविशेषणानि अन्तरितानि [?] ।

किशलयेत्यादि—

किशलय[16]शयननिवेशितया चिरमुरसि ममैव शयानम् ।
कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम् ॥३॥

पुनः किम्भूतया [17]किशलयशयननिवेशितया । किशलयैः नवपल्लवैः निर्मितं शयनम् । तत्र । निवेशिता [? अर्पिता अर्थात्तेन] तया । पुनः किम्भूतं

1) A निभृतनिकुञ्जस्य गृहगतया प्राप्तवत्या । 2) P reads तत् । between चेति and पुनः । 3) P, B leave out निशि । 4) B drops from पुनः किंभूतया...to सकलदिशो यया सा तथा । 5) B पुनः सविभूत (?) हसन्तम् । 6) B drops रतौ रभसः औत्सुक्यं तस्य रसः तेन । 7) B मदनमनोरथः । 8) B मदनजनितो विकारस्तेन सह वर्तमानम् । 9) B मेलनं । 10) B drops वशवर्तिनम् । 11) B प्रियवादानि । 12) B drops कर्णपेयम् । 13) B हासेन । 14) B शिथिल्यमापादितं जघने नितम्बभागे परिधानं वस्त्रं येन । 15) B drops from जघनं......to अन्तरितानि; A drops विशेणानि अन्तरतानि 16) P. ०नलिन० । 17) B निवेशितया; B drops from अर्थात्......तया ।

तम् । चिरं चिरकालं ममैव उरसि हृदये शयानं सुप्तम् । पुनः किम्भूतया। कृतपरिरम्भणचुम्बनया। कृते परिरम्भणचुम्बने यया सा तया।पुनः किम्भूतम्। कृताधरपानम्। अधरस्य पानम्। कृतम् अधरपानं येन स तथा तम्। किं कृत्वा। परिरभ्य । आलिङ्ग्य ।

अलसेत्यादि ।

अलसनिमीलितलोचनया पुलकावलिललितकपोलम् ।
श्रमजलसं[1]कलकलेवरया वरमदनमदादतिलोलम् ॥४॥

पुनः किम्भूतया । अलसनिमीलितलोचनया। [2]अलसं यथा स्यात् तथा निमीलिते लोचने यया सा तथा तया। पुनः किम्भूतम्। पुलकावलिललितकपोलम्। पुलकानां[3] आवलिः पङ्क्तिः तया ललितौ [4]मनोज्ञौ कपोलौ यस्य तम्। [5]'वीथ्यालिरावलिः पङ्क्तिः श्रेणी रेखास्तु राजयः' इत्यमरः। पुनः किम्भूतया। श्रमजल[6]सकलकलेवरया। श्रमजलं [7]स्वेदः स एव सकलेवरे (? स एव सकले कलेवरे) सर्वाङ्गे यस्याः सा तथा तया। कथम्भूतं तम्। अतिलोलं चञ्चलं तरलम्। कस्मात्। वरमदनमदात्। मदनेन वरः श्रेष्ठः मदनमदश्चेति। तस्मात्।

कोकिलेत्यादि ।

कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारम् ।
श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम् ॥५॥

पुनः किम्भूतया। कोकिलकलरवकूजितया। कोकिलस्य कलश्चासौ रवश्चेति मधुरध्वनिः तद्वत् कूजितं यस्याः सा तया। तं कथम्भूतम्। जितमनसिजतन्त्रविचारम्। [8]तन्त्रस्य शास्त्रस्य विवेकशास्त्रस्य विचारः पर्यालोचनम्। जितो दूरीकृतस्तिरस्कृतः मनसिजेन अनंकेगेन (? अनङ्गेन) तन्त्रविचारो यस्य स तम्। अथवा। मनसिजस्य कामस्य तन्त्रं शास्त्रम्। तस्य विचारः स एव जितो येन स तथा तं समधिगतकामशास्त्रम्। पुनः किम्भूतया। श्लथकुसुमाकुलकुन्तलया। श्लथानि शिथिलानि च कुसुमानि चेति। तैराकुला व्याकुलाः [ कुन्तलाः ] केशा यस्याः सा तया। [9]'चिकुरः कुन्तलो वालः कचः केशः

1) A, B °सिक्तकलेवरया। 2) B drops this line. 3) B adds रोमाञ्चानां। 4) B मनोहरौ । 5) B drops this line. 6) B सिक्तकलेवरया। 7) A स्वेदः तेन सिक्तः [ सिक्तं ] कलेवरं यस्याः सा तया। मदनेन मनसिजेन मदः वरश्चासौ स च वरमदनमदस्तस्मात् अतिलालं अतिमृचप । B) स्वेदजलं तेन सिक्तं कलेवरं यस्याः सा तथा। 8) A जितो मनसिजेन तत्त्वस्य विवेकस्य विचारः पर्यालोचनं येन स तम्। अथवा। मनसिजः कामः तस्य तन्त्रं शास्त्रम्। B जितो मनसिजेन अनङ्गेन तन्त्रविचारो यस्य स तम्। अथवा। मनसिजस्य कामस्य तन्त्रविचार(तन्त्रविचारः) शास्त्रविचारः स एव जितो येन स तम्। 9) B) drops this line from Amara.

शिरोरुहः' इत्यमरः। पुनः किम्भूतं तम्। [ नखलिखितघनस्तनभारम्।] [1]नखै-र्लिखितौ निबिडौ स्तनभारौ येन तम्।

चरणेत्यादि।

चरणरणित[2]मणिनूपुरया परिपूरितसुरतवितानम्।
मुखरविशृङ्खलमेखलया सकचग्रहचुम्बनदानम् ॥६॥

[3]पुनः किम्भूतया। चरणरणितमणिनूपुरया। चरणयोः [4]रणितौ शब्दितौ मणिभिर्युक्तौ नूपुरौ यस्याः सा तया। पुनः किम्भूतं तम्। परिपूरित-सुरतवितानम्। [5]परि सर्वतोभावेन पूरितः सुरतस्य वितानः विस्तारो येन स तथा तम्। पुनः किम्भूतया। [6]मुखरविशृङ्खलमेखलया। [7]मुखराः शब्दायमानाः विशृङ्खला मेखला कलापकाञ्ची यस्याः सा तया। किम्भूतं तम्। सकचग्रह-चुम्बनदानम्। [8]कचानां केशानां ग्रहः ग्रहणं सकचग्रहणेन वर्तत इति। कृतं सकचग्रहचुम्बनदानं येन स तथा तम्।

रतिसुखेत्यादि।

रतिसुखसमय[9]रसालसया दरमुकुलितनयनसरोजम्।
निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम् ॥७॥

पुनः किम्भूतया। रतिसुखसमयरसालसया। रतेः सुखं तस्य समयः तस्य रसः तेन अलसा तया। पुनः किम्भूतं तम्। दरमुकुलितनयनसरोजम्। दरः ईषन्मुकुलिते नयने एव सरोजे यस्य स तम्। पुनः किम्भूतया। निःसह-निपतिततनुलतया निःसहा निःप्राणा (? निष्प्राणा) निपतिता तनुरेव लता यस्याः सा तया। पुनः किम्भूतम्। मधुसूदनम्। मधुं दैत्यं सूदितवानिति। [10]अथवा मधुना वसन्तेन कामोत्पत्तिद्वारेण पीडा यस्य स तम्। पुनः कथम्भूतम्। उदितमनोजम्। [11]मनसि जायत इति मनसिजो मदनः। उदितः उत्पन्नः मनोजो यस्य स तम्।

1) A नखैर्लिखितौ च तौ घनौस्तनौ च तयोर्भारो यस्य स तम्। A नखैर्लिख(खि)तः घनस्तनभारो येन स तथा तम्। 2) P leaves out तमणि। 3) P, A drop from पुनः to °नूपुरया। 4) P drops रणितौ। 5) B परिपूरितं सुरतस्य वितानं विस्तारो येन स तम्। 6) P, A drop this प्रतीक 7) P. A add before मुखराः the folio; wing. अपगते त्यक्ते कृते बन्धनशृङ्खले यस्याः सा तया। अवस्य अकारलोपः। These words presuppose an altogether different reading. P, A add मुखरविशृङ्खलेति पाठेऽयमेवार्थः। 8) B drops from कचानां to वर्तत इति। 9) B °रशालशया। 10) B drops from अथवा to पीडा यस्य स तम्। 11) B drops from मनसि to मदनः।

श्रीजयदेवेत्यादि ।

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम् ।
सुखमुत्कण्ठितगोपवधूकथितं वितनोतु सलीलम् ॥८॥

[1]श्रीजयदेवभणितमिदं वितनोतु विस्तारयतु । किम् । श्रोतृणां सुखम् । इदमिति किम् । अतिशयमधुरिपुनिधुवनशीलम् । 'व्या[2]( व्य )वायो ग्राम्यधर्मः स्यान्मैथुनं निधुवनं रत (?तं)' इत्यमरः । निधुवने शीलं स्वभावः । अतिशयेन मधुरिपोः कृष्णस्य निधुवनशीलम् । किम्भूतम् । [3]सलीलम् सह लीलया वर्तत इति । पुनः किम्भूतम् । उत्कण्ठितगोपवधूकथितम् । [4]उत्कण्ठा आसक्तिविशेषः । सा जाता यस्यां सा गोपवधू राधा तया कथितम् ।

[5]इति राधिका स्वमनोगतमाह हस्तस्रस्तेत्यादि ।

हस्तस्रस्तविलासवंशमनृजु भ्रूवल्लिमद्वल्लवी–
[6]वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलम् ।
मामुद्वीक्ष्य [7]विलक्षितं स्मितसुधामुग्धाननं कानने
गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च ॥२॥

हे [8]शुभे कानने वृन्दावने अहं गोविन्दं पश्यामि । न केवलं पश्यामि हृष्यामि च । हृष्टा भवामि । किम्भूतम् । व्रजसुन्दरीगणवृतम् । [9]व्रजे सुन्दर्यः तासां गणः कदम्बः तेन वृतः परिवेष्टितः तम् । पुनः किम्भूतम् । मामुद्वीक्ष्य समवेक्ष्य हस्तस्रस्तविलासवंशम् । हस्तात् स्रस्तोऽधो निपतितो विलासस्य वंशो यस्य स तम् । पुनः किम्भूतम् । अनृजुभ्रूवे[व]ल्लिमद्वल्लवीवृन्दोत्साहदृगन्त-वीक्षितम् । अनृजुः कुटिला चासौ भ्रूवल्लिश्चेति । अनृजु भ्रूवल्लिर्विद्यते यासां ताः अनृजुभ्रूवल्लीमद्वल्लव्यः गोप्यः तासां वृन्दं निकरः तेन उत्साहात् संभ्रमात् दृगन्तै[10]नेत्रोप्रान्तैर्वीक्षितस्तम् । अथवा तस्य वृन्दस्य [11]उत्साहः संभोगेन वीक्षितः ( संभोगस्तेन वीक्षितः ) [12]अथवा उक्तविविधवल्लवीवृन्दे उत्साहेन दृगन्तवीक्षितं यस्य स तथा तम् । अथवा वृन्दोत्सारि पाठे उत्सारि संसर्पि दृगन्तः [13]कटाक्षनिरीक्षितम् । गोपस्त्रीपरिवृतम् अत्र क्रीडति । अति-

1) B drops श्रीजयदेवभणितम् । 2) B drops this line from Amara. 3) P drops this प्रतीक 4) । B reads उत्कण्ठा जाता यस्या(स्यां) सा...... 5) B drops this sentence. 6) B वृन्दोत्साह° । 7) B विलज्जितस्मित° । 8) A adds राधिके after शुभे । 9) B व्रजसुन्दरीणां गण( णः ) कदम्ब( म्बः ) तेन वृतं परिवेष्टितम् । 10) A नेत्रप्रान्तैः । 11) B उत्साहसंभोगेन । 12) B drops from अथवा to कटाक्षनिरीक्षितम् । 13) A कटाक्षस्तेन वीक्षितम् । क्रीडातिशयेन स्वेदार्द्रगण्डस्थलं बिलम्बं तस्मिन् तयया ( ? तया ) तादृशी सुधाहास्यामृतं यया मुग्धं सुन्दरमाननं यस्य । B गोपस्त्रीपरिवेष्टितम् अनुक्रीडति अतिशयेन स्वेदार्द्रगण्डस्थलं यस्य स तम् । पुनः कथंभूतम् । विलम्बितं स्मितसुधामुग्धाननम् । विलम्बिता स्मितसुधा तस्यामृततया मुग्धं सुन्दरमाननं यस्य स तम् ।

शयेन स्वेदार्द्रगण्डस्थलं यस्य स तम् । पुनः किम्भूतम् । विलम्बितस्मितसुधामुग्धाननम् । विलम्बिता स्मितसुधा हास्यामृतं तया मुग्धं सुन्दरमाननं यस्य । अथवा विलक्षितश्च स्मितमुग्धाननश्चेति ।

दुरालोकेति ।

दुरालोकस्तोकस्तबकनवकाशोकलतिका-
विकाशः कासारोपवनपवनो[1]ऽपि व्यथयति ।
अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल-
प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥३॥

हे सखि मां व्यथयति । कः । दुरालोकस्तोकस्तबकनवकाशोकलतिकाविकाशः । नवकाश्च ताः अशोकलतिकाश्चेति । स्तोकः अल्पः स्तबकः [2]गुच्छो यस्याः सा तथा । तासां विकाशः । दुःखेन आसमन्तात् अवलोकितुं शक्यते इति दुरालोकः स च स्तोकस्तबकनवकाशोकलतिकाविकाशश्च । न केवलं सः कासारोपवनपवनोऽपि मां व्यथयति । [3]सरसीयुक्तमुपवनम् आरामः तस्य पवनः सोऽपि । किञ्चायमपि न सुखयति । मुकुलप्रसूतिः उत्पत्तिः । केषाम् । चूतानाम् । कथम्भूता । भ्राम्यन्ती भृङ्गी भ्रमरी, रणितेन मनोहराऽपि पुनः । कीदृशी । शिखरिणी । शिखरे निवसितुं शीलमस्या इति । छन्दोऽपि शिखरिणी ।

इति श्रीगीतगोविन्दटीकायां [4]आश्लेषकेशवो नाम

द्वितीयः सर्गः ।

---

1 A पवनोऽयं मां; B पवनोऽयं । 2) P spells ग्लुंछो । 3) A reads कासारः सरसी तेन युक्तमुपवनम् आरामः तस्य पवन(नः) । B drops from सरसी to न सुखयति and has instead किं तर्हि व्यथयति । 4) A reads आक्लेश° ।

# तृतीयः सर्गः।

मुग्धमधुसूदनः।

कंसारिरपि संसारवासनाबन्धशृङ्खलाम्[1]।
राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥१॥

श्रीकृष्णाभिप्रायं [2]उत्तरीयगीतार्थं श्लोकाभ्यां प्रकटयति कंसारिरपीत्यादि। कंसारिः श्रीकृष्णोऽपि संसारवासना[3]बन्धशृङ्खलां राधां हृदये आधाय संचिन्त्य व्रजसुन्दरीः अपरगोपीस्तत्याज [4]जहौ। संसारस्य वासना जगतः स्थितितत्परता विगतरूपा पूर्वजन्मकृतसुकृ[5]तसंस्कारातिशयप्राप्तसर्वसुन्दरीजनाधिकसौभा[6]ग्यता-[? सुभगता ]। तया [7]बद्धा विषयासक्तिरूपशृङ्खला शृङ्खलास्थानं [8]या दृढ-हेतुस्ताम्।

इतस्तत इति।

इतस्ततस्तामनुसृत्य राधिकामनङ्गबाणव्रणखिन्नमानसः।
कृतानुतापः स कलिन्दनन्दिनीतटान्तकुञ्जे [9]विषसाद माधवः ॥२॥

स माधवः [10]अनङ्गबाणव्रणखिन्नमानसः कन्दर्पशराघातावसन्नहृदयः कृतानुतापः। तदेकगतचित्तत्वात्। इतस्ततः तां राधाम् अनुसृत्य परिमृग्य कलिन्दनन्दिनीतटान्तकुञ्जे निषसाद निषण्णोऽभवत्। कलिन्दनन्दिनी यमुना तस्यास्तटं तस्यान्तःपरिसरः तत्र कुञ्जं तस्मिन्। [11]कलिं पापं द्यति खण्डयतीति कलिन्दः सूर्यः तस्य नन्दिनी पुत्री। अनङ्गस्य कामस्य बाणाः तैः व्रणानि क्षतानि तैर्युक्तं खिन्नं खेदसहितं मानसं यस्य। पुनः किम्भूतः। कृतः [12]अनुपश्चात्तापो येन सः।

1) B बद्ध। 2) A, B उत्तरगीतार्थं। 3) B बद्ध। 4) B drops जहौ। 5) A drops सुकृत। 6) A °सौभाग्या ता तया (?) 7) B बन्धोर्वि(? बन्धो वि) षयासक्तिरूपस्तत्र शृङ्खलास्थानीयो। 8) P यादृक् हेतुस्ताम् B दृढसेतुस्ताम्। 9) A, B निषसाद°। 10) B drops अनङ्ग........मानसः। 11) B drops from कलिं to पुत्री। 12) B अनुतापः।

[1]गुर्जरीरागयतिताले ॥

मामियमिति ।

मामियं चलिता विलोक्य वृतं वधूनिचयेन
सापराधतया [2]ययापि न वारितातिभयेन ।
हरि हरि हतादरतया गता सा कुपितेव ॥१॥ ध्रुवपदम् ॥

इयं राधा मां श्रीकृष्णं विलोक्य दृष्ट्वा चलिता निर्गता[3] । किम्भूतम् । वृतं परिवृतम् । केन । वधूनिचयेन । [4]गोपवधूनां निचयः समूहस्तेन । मया न निवारिता अतिभयेन । कया । सापराधतया । सह अपराधेन वर्तत इति सापराधस्तस्य भावः सापराधता तया । सा राधिका कुपितेव क्रुद्धेव गता याता । कया । हतादरतया । हतो विनष्टो आदरः सत्कारस्तस्य भावस्तया । हरि हरि शिव शिव खेदेऽर्थे द्वौ शब्दौ भवतः ।

किं करिष्यतीति ।

किं करिष्यति किं वदिष्यति सा चिरं विरहेण ।
[5]किं जनेन धनेन किं मम[6] जीवितेन गृहेण ॥२॥

सा राधा चिरं चिरकालं यो विरहः तेन किं करिष्यति । किञ्च । किं वदिष्यति । अतः मम धनेन किं प्रयोजनम् । सुखेन किं [7]प्रयोजनम् । [8]गृहेण जनेन वा किं कार्यम् ।

चिन्तयामीत्यादि ।

चिन्तयामि तदाननं कुटिलभ्रु [9]कोपभरेण ।
शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण ॥३॥

तदाननम् । तस्या राधिकायाः आननं मुखं चिन्तयामि । किम्भूतं मुखम् । कुटिलभ्रु । कुटिले वक्रे भ्रुवौ यस्मिन् आनने तत् कुटिलभ्रु । केन । कोप[10]-भरेण । कोपस्य भरः आधिक्यं तेन [ कोपभरेण ] । कमिव । शोणपद्ममिव । उपरि भ्रमता भ्रमरेण आकुलं व्याकुलं शोणपद्मं रक्तोत्पलमिव ।

1) B गुर्जरीरागेण गीयते । काललक्षणात् परिमठताले तल्लक्षणात् । 2) B मया न निवारिता° । 3) B adds कुपिता after निर्गता । 4) B drops from गोप° to समूहस्तेन । 5) B किं किं धनेन जनेन किं मम जीवितेन सुखेन किम् । 6) A मम किं गृहेण सुखेन । 7) B drops प्रयोजनम् । 8) B गृहेण किं जनेन किं कार्यं मम जीवितेन किम् । 9) B रोषभरेण । 10) P. reads रोषभरेण रोषस्य कोपस्य भरः आधिक्यं तेन रोष-भरेण; B रोषभरेण । कोपस्य भरः आधिक्यं तेन ।

[1]हृदयस्थां राधिकां अनुनयन्नाह तामित्यादि ।

तामहं हृदि सङ्गतामनिशं भृशं रमयामि ।
किं वनेऽनुसरामि तामिह किं वृथा विलपामि ॥४॥

तां राधां भृशमत्यर्थं रमयामि क्रीडयामि । किम्भूताम् । हृदि संगताम् । हृदये संगतां संलग्नाम् । कथम् । अनिशं वारंवारम् । किमिति वितर्के । वने वनमध्ये । अनुसरामि । अनुगच्छामि । किमिह निकुञ्जे वृथा विलपामि । मिथ्या [2]परिदेवनं करोमि । [3]किं वितर्के परिप्रश्ने क्षेपे निन्दाप्रकाशयोरिति विस्तरः ।

तन्वीत्यादि ।

तन्वि खिन्नमसूयया हृदयं तवाकलयामि ।
तन्न वेद्मि कुतो गतासि न तेन तेऽनुनयामि ॥५॥

हे तन्वि सूक्ष्मे राधे । तव हृदयं अहम् आकलयामि जानामि । किम्भूतम् । खिन्नं खेदयुक्तम् । कया । असूयया ईर्ष्यया । कुतः कुत्र त्वं गतासि । तन्न वेद्मि न जानामि । तेन कारणेन ते तुभ्यं नानुनयामि परिसान्त्वनं करोमि ।

दृश्यसेत्यादि ।

दृश्यसे पुरतो गतागतमेव मे विदधासि ।
किं पुरेव ससंभ्रमं परिरम्भणं न ददासि ॥६॥

हे राधे पुरतोऽग्रतः । दृश्यसे अवलोक्यसे । कस्य । मम । किं नु गतागतं गमनागमनम् । विदधासि करोषि । किमिति पुरेव पूर्वानुभूतमिव । परिरम्भणमालिङ्गनं न ददासि । किम्भूतम् । ससंभ्रमं सह संभ्रमेण वर्तत इति ।

क्षम्यतामिति ।

क्षम्यतामपरं कदापि तवेदृशं न करोमि ।
देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमि ॥७॥

हे राधे क्षम्यताम् । अपरम् ईदृशम् अपराधं तव कदापि कस्मिन् कालेऽपि न करोमि । अतो हे सुन्दरि राधे । आत्मदर्शनं देहि । कस्य । मम । किमिति । यतोऽहं मन्मथेन कन्दर्पेण दुनोमि [4]तापमनुभवामि ।

वर्णितमित्यादि ।

वर्णितं जयदेवकेन हरेरिदं प्रवणेन ।
[5]तिन्दुबिल्वसमुद्रसंभवरोहिणीरमणेन ॥८॥

---

1) B drops this line. 2) B परिवेदनं । 3) A gives this quotation dropping विस्तरः । B drops this line altogether. 4) B नामनुभवसि (?) । 5) B किंदु (? किन्दु) ।

इदं गीतम्। [1]हरेः कृष्णस्य प्रवणेन भक्तिनम्रेण यत्तेन जयदेवकेन कविना वर्णितम्। किम्भूतेन। [2]तिन्दुबिल्वसमुद्रसंभवरोहिणीरमणेन। [3]तिन्दुबिल्वं नाम नगरम्। तदेव समुद्रः तत्र संभवः उत्पत्तिर्यस्य स तथा स चासौ रोहिणीरमणश्चेति। अनेन तस्य चन्द्रोपमा।

[4]गीतापेक्षार्थं विरहमाह हृदि बिशलतेति।

हृदि बिशलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः।
मलयजरजो नेदं भस्म प्रियारहिते मयि।
प्रहर न हरभ्रान्त्यानङ्ग क्रुधा किमु धावसि ॥१॥

हे अनङ्ग कन्दर्प। हरभ्रान्त्या [5]महादेवोऽयमिति भ्रमेण प्रियारहिते [6]कान्तावियुक्ते मयि [7]विषये न प्रहर प्रहारं मा कुरु। क्रुधा कोपेन। किमु धावसि शीघ्रमागच्छसि। मम हृदि बिशलताहारः मृणाललतिकास्रक्। अयं भुजङ्गमनायको वासुकिर्न भवति बिशलतायाः हारः। कण्ठे कुवलयदलश्रेणी कुवलयानां [8]नीलोत्पलानां दलानि कुसुमानि तेषां श्रेणी मालेत्यर्थः। सा प्रसिद्धा। गरलद्युतिर्विषशोभा न भवति। [9]ममाङ्गे मलयजस्य चन्दनस्य रजो रेणुरिदं दृश्यते। भस्म न भवति। [10]एतत्कोमलजलार्द्रबिशलताहारादिकं सर्वं विरहतापापनोदाय सर्वाङ्गे न्यस्तमारोपितम्। एतद्राधाप्रियारहिते एकाकिनि मयि न प्रहर।

पाणावित्यादि।

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय
क्रीडानिर्जितविश्व मूर्च्छितजनाघातेन किं पौरुषम्।
तस्या एव [11]मृगीदृशो मनसिजप्रेक्ष(?ङ्ख)त्कटाक्षाशुग-
श्रेणीजर्जरितं मनागपि मनो नाद्यापि संधुक्षते ॥२॥

हे मनसिज काम। पाणौ हस्ते चूतसायकम् आम्रपुष्पबाणं मा कुरु। किञ्च। अमुं चापं कार्मुकं मा रोपय मा सज्जीकुरु। [12]अ-मा-नो-ना-निषेधे विस्तरः। [13]को हेतुस्तदाह। हे क्रीडानिर्जितविश्व। क्रीडया निर्जितं विश्वं [14]संसारो येन सः तस्य सम्बोधने। मूर्च्छितजनाघातेन [15]मारणेन पौरुषं किम्।

---

1) A हरेः प्रवणेन कृष्णस्य नम्रेण जयदेवकेन; B हरेः कृष्णस्य प्रवणेनस्तानम्रेणय तेन (? प्रवणेन तेन नम्रेग यत्ते जयदेवकेन)। 2) B किन्दु। 3) B किन्दुबिल्वनाम नगरम्। 4) B गीतापेक्षार्थंविरहमाह। 5) B drops महादेवोऽयमिति भ्रमेण। 6) P drops कान्तावियुक्ते। 7) B drops विषये। 8) B नीलोत्पलदलानां श्रेणी. 9) B समांगे (?-ममाङ्गे) 10) B drops from एतत्... to न प्रहर। P adds कोमल between जलार्द्र and बिशलता। 11) P मृगीदृशः स्मरशरोदञ्चत्कटाक्षानल-ज्वालाजर्जरितं। 12) A, B drop this line. 13) B drops this sentence. 14) P संसारं; A drops संसारो। 15) A drops मारणेन पौरुषं किम्। B drops मारणेन।

[1]मूर्च्छाम् इतः [2]गतः मूर्च्छितः स चासौ जनश्चेति तस्य घातो मारणं तेन। तव कथं मूर्च्छितत्वं तदाह । तदारभ्य । अथापि मनागपि किमपि [3]मनो हृदयं न संधुक्षते। स्वास्थ्यं न भजते। विरहपीडादिकं न [4]मुञ्चति। किम्भूतम्। स्मरशरवत् कामबाणवत्। उदञ्चन्तः प्रेङ्खन्तो ये कटाक्षा एव आशुगाः तेषां श्रेणी पङ्क्तिः परम्परा तया जर्जरितं खिन्नं [5]निःसारम् । कस्याः [6]कटाक्षाशुगाः। तस्याः राधिकाया एव । कथम्भूतायाः । मृगीदृशः [7]मृग्या इव दृशौ यस्यास्तस्याः ।

उपालम्भनं पुनराह भ्रूचाप इत्यादि ।

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां
श्यामात्मा कुटिलः करोतु कबरीभारोऽपि मारोद्यमम्।
मोहं तावदयं च तन्वि तनुतां बिम्बाधरो रागवान्
सद्वृत्तः स्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति ॥३॥

हे राधे [8]निर्मातु सम्पादयतु। [9]कः कटाक्षविशिखः। कटाक्ष एव विशिखः बाणः। काम् मर्मव्यथाम्। मर्मणि स्थाने व्यथाम्। किम्भूतः भ्रूचापे निहितः निक्षिप्तः। तथा कबरीभारोऽपि करोतु । कबरी [10]केशपाशः स एव [11]भारः गुरुत्वात् । कम् । मारोद्यमम् ।[12]मारणं मोहः तस्य उद्यमस्तम् । अथवा । [13]मारः कामः तस्योद्यमस्तम्। कथम्भूतः। श्यामात्मा कृष्णवर्णः। न केवलं श्यामात्मा कुटिलश्च। [14]वक्रिमायुक्तः। [15]एतस्य मारणं युक्तं तथा। तावत्। अयं बिम्बाधरः तनुताम्। कम्। मोहम् अज्ञानम्। कथम्भूतः। रागवान्। रागोऽस्यास्तीति परिणामरक्तः। एतस्यापि युक्तम्। [16]कुतस्तवेयं प्रतिपत्तिः। तत्राह। तवायं स्तनमण्डलोऽपि मम प्राणैः समं कथं क्रीडति । [17]प्राणान् ग्रहीतुं कथमिच्छति । किम्भूतः । सद्वृत्तः । सत्साधु वृत्तं वर्तुलत्वं [18]यस्य स तथा। [19]वृत्तमिति व्यवहारेऽपि। शब्दच्छलेन [20]आचक्ष्यते। सदाचारोऽप्यनाचार इत्यभिप्रायः।

1) B drops this line. 2) A प्राप्तः । 3) B नो हृदयं । 4) B भजते । 5) A drops निःसारं; B निःसार (? निःसारं) । 6) B कटाक्षेपा (? कटाक्षा एव) आशुगाः। 7) P मृग्या एव दृशः, मृग्या एव दृशौ या सा तथा (?) । B reads this sentence as मृगीदृशो यस्याः सा तथा । उषा( ? पा )लंभनं पुनराह । 8) A places निर्मातु संपादितु (? सम्पादयतु ) । after मर्मणि स्थाने व्यथाम् । 9) A, B drop कः । कटाक्षविशिखः । 10) B केशः (?) 11) B drops गुरुत्वात् । 12) B drops मारणं मोहः तस्य उद्यमस्तम् । अथवा । 13) B मारस्य कामस्य उद्यमः [ तम् ]। 14) B विक्रम(?विक्रमा)युक्तः। 15) P एतस्य मरणं; B drops from एतस्य मारणं to परिणामरक्तः। 16) B कुतः स्त(त)-स्येयं प्रतिपत्ती ( ? प्रतिपत्ति )स्तत्राह । 17 ) B प्राणानां हितुमिछतीति ( ? प्राणान् ग्रहीतुमिच्छतीति ) । 18) B drops य । 19) B drops from वृत्तमिति to स्वमनोगतमाह । 20) A आचक्षते ।

श्रीकृष्णः स्वमनोगतमाह तानि स्पर्शेत्यादि ।

तानि स्पर्शसुखानि ते च तरलाः स्निग्धा दृशोर्विभ्रमा-
स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा ।
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्धते ॥४॥

यदि राधिकायां मानसं मनः लग्नसमाधि विषयासङ्गे सत्यपि । हन्तेति हर्षविषादयोः तर्हि [1]विरहस्य व्याधिः पीडा। कथं विषयासङ्गः । इति अनेन प्रकारेण । अधुनापि । [2]दृशोर्नेत्रयोर्विभ्रमाः विलासाः स्वयमेव तज्जातीया एव। किम्भूताः ।तरलाः स्निग्धाः [3]तरलाश्च ते स्निग्धाश्चेति। [4]यदत्र स्वभावसंप्रत्ययः। वक्त्राम्बुजसौरभं सौगन्ध्यं येन स च । अथापि । गिरां वाचां वक्रिमा वक्रभावः स एव वर्तते । [5]सुधास्यन्दी सुधां स्यन्दितुं शीलमस्येति स तथा । [6]यास्वादिता सपदि बिम्बाधरमाधुरी सैव तज्जाजीयैवास्वाद्यते । [7]मधुरस्य भावः माधुर्यम् । बिम्बाधरस्य माधुरी सा इति विशेषा ज्ञेया ।

भ्रूपल्लवेत्यादि ।

भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि
बाणा गुणः श्रवणपालिरिति स्मरेण ।
तस्यामनङ्गजयजङ्गमदेवताया-
मस्त्राणि निर्जितजगन्ति किमर्पितानि ॥५॥

इति श्रीगीतगोविन्दे मुग्धमधुसूदनो नाम
तृतीयः सर्गः ।

तस्यां राधिकायां स्मरेण कन्दर्पेण [8]स्वास्त्राणि अर्पितानि किमिति [9]वितर्कः । [10]कानि अस्त्राणि। तानि[11]कानि। भ्रूपल्लवं धनुः। अपाङ्ग[12]तरङ्गितानि बाणाः । अपाङ्गस्य नेत्रान्तस्य [13]तरङ्गितानि कटाक्षाः । श्रवणपालिः गुणः। एतानि किम्भू-

1) B विहरस्य (?विरहस्य)। 2) B नेत्रयो द (र्दृ) शोर्विलासाः स्वतमेव (? स्वयमेव) जतज्जातिया (? तज्जातीया) एव। 3) B तरलाश्चेति। 4) A...°संप्रत्ययाः। B drops from यदत्र to स च 5) P सुधा स्यंदितुं...A सुधां स्यन्दितुं शीतल(? शील)मस्येति...; B सुधा स्यन्दितुं शीलमस्ये स तथा। 6) A drops स्वादिता सपदि बिम्बाधरमाधुरी, B यास्त्रावित (? यास्वादिता) सपदि किं(बिं)बाधरमाधुरो सैव तैर्ज्जातीभावः(? तज्जातीयैव )। 7) A मधुरभावो माधुरी; B drops from मधुरस्य...to ज्ञेया। 8) P. स्वास्त्रे; B स्वहस्तेन। 9) A वितर्क (:), B वितर्कं (? वितर्कः) 10) P लिका (? कानि)। 11) Aतदाह, B ता कामि (? तानि कानि)। 12) A निरीक्षितानि। 13) A नेत्रप्रान्तस्य ।

तानि। निर्जितजगन्ति। निर्जितानि जगन्ति यैस्तानि तथा। कथम्भूतायां अनङ्गजयजङ्गमदेवतायाम्। [1]जङ्गमरूपा चासौ देवता चेति। अनङ्गस्य जयाय जङ्गमदेवता[2] तस्यां देवतायामित्यर्थः।

[3]इति श्रीगीतगोविन्दटीकायां **मुग्धमधुसूदनो** नाम
तृतीयः सर्गः ॥

---

1) P जङ्गमरूपी........, B drops from जङ्गम to चेति। 2) B adds या after देवता। 3) B adds the following stanza after the fifth one, but does not have the gloss on it :

ती(ति)र्यक्कण्ठविलोलि(ल)मौलितरलोवत्तंसश्य(स्य) (?°तरलोत्तंसस्य) वसोवर(?वंशोच्चर-
द्गीतस्थानकृतावधानललनालक्षैर्न संलक्षिताः।
प्रेम्णा कन्दलितासु (?कन्दलिते) मुग्धा(ग्धे) मधुरे (सुमुग्धमधुरे) राधामुखेन्दौ सुधा-
सारे वो मधुसूदनस्य ददतु क्षेमं कटाक्षोर्मयः।

# चतुर्थः सर्गः ।

## स्निग्धमाधवः ।

गीतार्थं श्लोकेन सूचयति [1]यमुनातीरेत्यादि ।

यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम् ।
प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी ॥१॥

राधिकासखी गीतार्थं श्लोकेन प्राह । माधवं प्रत्याह । का । राधिकासखी । राधिकायाः सखी । किम्भूतम् । मन्दं यथा स्यात्तथा स्थितम् । कुत्र । यमुनातीरवानीरनिकुञ्जे । वानीरस्य वेतसस्य निकुञ्जं यमुनातीरे वानीरनिकुञ्जं तस्मिन् । किम्भूतम् । प्रेमोद्भ्रान्तम् । प्रेम प्रीतिः तस्य भरः आधिक्यम् । तेन [2]उद्भ्रान्तो विह्वलः ।

[3]कानडरागे एकतालीताले

यदेव प्राह तद्दर्शयति निन्दति चन्दनेत्यादि ।

निन्दति [4]चन्दनमिन्दुकिरणमनु विन्दति खेदमधीरम् ।
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम् ॥१॥

[5]सा विरहे तव दीना ।
माधव मनसिजविशिखभयादिव भावनया त्वयि लीना ।ध्रुवपदम् ॥२॥

हे माधव तव विरहे वियोगे तनुगतं चन्दनं निन्दति । दहनमिव दूषयति । अनु तदनन्तरं इन्दुकिरणं च निन्दति । [7]यतोऽधीरा खेदं क्लेशं विन्दति लभते । तथा च । [8]मलयसमीरमपि गरलमिव कलयति मनुते । मलयस्य मलयाचलस्य समीरः पवनस्तम् । गरलं विषमिव तुल्यम् । केन । व्यालनिलयमिलनेन । व्यालानां उरगानां निलया आश्रयाश्चन्दनतरवः । तैः सह मिलनं संस्पर्शः तेन । अतो

---

1) A कालिन्दीतटवेतसकुञ्जे मन्दं यथा स्यात्तथा स्थितं प्रेमोद्भ्रान्तं माधवं प्रति राधिकासखी प्राह । 2) P भ्रान्तो । 3) A कर्णाटरागे । ; B करणाटरागेण गीयते । एकताले । 4) B किरणमनु वि(विं)दति खेदमधी(रं) चन्दनमिंदुरं (?) । व्यालनिलयमिलनेन गलसिव (? गरलमिव) । 5) B adds केशव before सा । 6) B विसि ( ? विशिख ) । 7) A, B यतो धीरं खेदं क्लेसं(शं) विंदति लभते । 8) B मलयस्य मलयाचलस्यसमीरः पवनः त गरल- (? मलय )समीरमपि ।

दीना दुःखिता लीना [1]शरणागता। कस्मिन्। त्वयि। कया। भावनया। हृदिस्थ-त्वद्रूपध्यानेन। कस्मादिव। मनसिजविशिखभयादिव। [2]मनसि जातः मनसिजः कन्दर्पः। अलुक्समासोऽयम्। [3]तस्य विशिखः। शरः तस्माद्भयम्। तस्मादिव। तत्तथा।

अविरलेत्यादि।

अविरलनिपतितमदनशरादिव भवदवनाय विशालम्।
स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालम् ॥३॥

सा सजलनलिनीदलजालं वर्म कवचं करोति। जलेन सह वर्तमानानि सजलानि च तानि नलिनीदलानि चेति कर्मधारयः समासः। तेषां जालं समूहः यत्र तत्। कस्मिन्। स्वहृदयमर्मणि। स्वहृदयमेव मर्म जीवनस्थानम्। तस्मिन्। किम्भूतम्। शविालं विस्तीर्णम्। कस्मै। भवदवनाय। [4]तादर्थ्ये चतुर्थी। भवतोऽवनं रक्षणं तस्मै। भयहेतुमाह। कस्मात्। अविरलनिपतितमदनशरात्। अविरलो निपतितो मदनशरस्तस्मात्। [5]अनेन किमुक्तम्। प्रयोजनमाह। [6]संतापयुक्तापि राधिका स्वहृदयस्थं कृष्णं सततं पश्यति जानातीत्यर्थः।

कुसुमेत्यादि।

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम्।
व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम् ॥४॥

[7]तथा च। कुसुमशयनीयं [8]पुष्पशयनीयं पुष्पशय्यां करोति। किम्भूतं तत्। [9]कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम्। अनल्पा या विलासस्य कलाः ताभिः कमनीयं मनोहरम्। [10]तत्किमिव। व्रतमिव। कस्मै। [11]तव परिरम्भसुखाय। परिरम्भणस्यालिङ्गनस्य सुखं तस्मै। अन्योऽपि यः कश्चिदभीष्टफलाकाङ्क्षी भवति सोऽपि दुष्कर[12]व्रतादिकं करोति। [13]अनेन किमुक्तम्। नारायणविरहसंतापात् कुसुमशयनीयेऽपि दुःखं न जहातीत्यर्थः।

1) B शरणागततस्मि त्वपाकपा (?) भावनया हृदि त्वद्रूपनेध्योन (? त्वद्रूपध्यानेन)। 2) B मनसिजस्य विशिखा छरः (? शरः) तस्माद्भयम्। 3) A तस्य विशिखाः शरास्तेभ्यो भयं तस्मादिव 4) B drops तादर्थ्ये चतुर्थी। 5) A drops from अनेन to प्रयोजनमाह। 6) A संतापयुक्तापि राधिका कृष्णं सततं पश्यतीत्यर्थः।; B drops from संताप to जानातीत्यर्थः। 7) A तथा राधा। 8) A, B drop पुष्पशयनीय 9) A कुसुमशरस्य ये शराः तेषां तल्पः शय्या बाणशय्यामित्यर्थः। 10) A किमिव; B तं कमिव कस्मै। 11) P तत्परिरम्भसुखाय। 12) B drops व्रतादि। 13) B drops from अनेन to जहातीत्यर्थः।

वहति चेत्यादि ।

वहति च गलितविलोचनजलधरमाननकमलमुदारम् ।
विधुमिव विकटविधुन्तुददन्त[1]दलनगलितामृतधारम् ॥५॥

सा राधिका आननकमलं मुखपद्मं च वहति धारयति । [2]'वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्' इत्यमरः । तत्किम्भूतम् । गलितविलोचनजलधरम् । विलोचने एव जलधरौ विलोचनजलधरौ गलितौ वृष्टौ विलोचनजलधरौ यस्मिन् तत्तथा । अथवा विलोचनयोर्जलं गलितं च तत् विलोचनजलं चेति तत् धारयतीति [3]तत्तथा । तत्किमिव । विधुमिव । चन्द्रमिव । किम्भूतं विधुम् । विकटविधुन्तुददन्तदलनगलितामृतधारम् । विधुं चन्द्रं तुदति व्यथयतीति विधुन्तुदो राहुः । [4]अलुप्तकर्मपदसमासः । तस्य दन्ताः [5]विकटाः भयङ्कराः उन्नता नता विधुन्तुदस्य दन्ताः तैर्दलनं पीडनम् । तेन गलिता अमृतधारा यस्मात् तत्तथा । [6]अथवा विकटो भयङ्करः स चासौ विधुन्तुदो राहुश्चेति । तस्य दन्ताः तैर्दलनं पीडनं तस्माद्गलिता अमृतधारा यस्मिन् सः तं तथा । अत्र कृष्णविरहोत्पन्नदुःखमेव राहुः ।

विलिखतीत्यादि ।

[7]विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम् ।
प्रणमति मकरमधो विनिधाय करे च शरं नव[8]चूतम् ॥६॥

सा राधा भवन्तं [9]प्रेयांसं कुरङ्गमदेन कस्तूरिकया विलिखति । क्व । रहसि एकान्ते । [10]कुरङ्गस्य मदः कुरङ्गमदस्तेन । 'मृगे कुरङ्गवातायुहरिणाजिनयोनयः' इत्यमरः । [11]कथम्भूतं भवन्तम् । असमशरभूतम् । [12]कन्दर्पतुल्यम् । [13]असमा विषमाः पञ्चशरा यस्य स तथा । किं कृत्वा विलिखति । मकरं मत्स्यं कामवाहनम[14]धो विनिधाय । अधस्तादारोप्य संस्थाप्य । [15]न केवलं मकरमधो विनिधाय । करे नवचूतं रसालकुसुमं शरं विनिधाय । एतत्कृत्वा प्रणमति नमस्कारं करोति । [16]अनेन किमुक्तम् । चित्ररूपिणं भवन्तमवलोक्य प्राणान् धारयतीत्यर्थः ।

---

1) B °द्दलित° 2) B drops from वक्त्रास्ये to तत् । 3) A तत्तथा । अथवा जलभरमिति पाठः । तत्र विगलितो विलोचनाभ्यां जलभरो यस्मिन् तत् ।; B तथा । अथा (? अथवा) विलोचनयोर्जलं च तत् विलोच(न)जलं चेतद्धारपतित(?तं) तथा । 4) A, B drop अलुप्तकर्मपदसमासः । 5) B विकरालाः । 6) A अथवा विकटेति विधुन्तुदस्य विशेषणं कृष्णविरहोत्पन्नदुःखमेव राहुः । B drops from अथवा to °दुःखमेव राहुः । 7) B विलखति । 8) B नूतम् । 9) A drops प्रेयांसं; B प्रेमसं ( ? प्रेयांसं ) । 10) B drops from कुरङ्गस्य to इत्यमरः । 11) B किम्भूतं । 12) B कामतुल्यम् । 13) B drops from असमा to स तथा । 14) B मङ्के । 15) A न केवलमेतत् किं तु करे...; B [न] केवल मकर [मं]धोनिधाय करे नवं नूतनं रसालकुसुमं...... 16) B drops from अनेन to धारयतीत्यर्थः ।

प्रतिपदमित्यादि ।

प्रतिपदमिदम[1]पि निगदति माधव तव चरणे पतिताहम् ।
त्वयि विमुखे मयि सपदि सुधानिधिरपि त[2]नुते तनुदाहम् ॥७॥

सा राधिका प्रतिपदं प्रतिक्षणं निगदति वक्ति । [3]किम् इदम् । इदमिति ब्रूते । सपदि तत्क्षणादेव । सुधानिधिरपि चन्द्रोऽपि तनुदाहं देहसंतापं तनुते विस्तारयति । अनेन किमुक्तम् । स्वामिनि विपरीते सति सज्जनोऽपि [4]दुःखदायको भवतीत्यर्थः ।

ध्यानलयेनेत्यादि ।

ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापम् ।
विलपति हसति विषीदति रोदिति च[5]ञ्चति मुञ्चति तापम् ॥८॥

सा राधिका पुरोऽग्रे ध्यानलयेन (ध्यान)योगेन दृष्ट्वा भवन्तम् । परिकल्प्य संमुखं कृत्वा । अतीव दुरापं [6]मत्वा विलपति । शोचति । ध्यानं चित्तवृत्तिनिरोधः, तस्य लयः ऐकाग्र्यं तेन । अतीव दुरापम् । अतिशयेन दुष्प्राप्यम् । न केवलं विलपति । हसति । मां [7]सुरूपां [8]त्यक्त्वाऽन्यामु[9]पसरसीति हास्यं करोति । अथानन्तरं मम प्रेमादिकं न स्मरसीति विषीदति खेदं विदधाति । अथवा यद्यहं सौभाग्यवती भवामि तर्हि कथं मां [10]हरिः परिहरतीति[11]रोदिति । अश्रुमुखीभवति । [12]वञ्चति शनैः शनैर्गच्छति । [13]त्वद्दर्शनार्थं इतस्ततो व्रजतीत्यर्थः । मम गुणातिशयं स्मृत्वा स्वयमेव हरिरागमिष्यतीति तापं मुञ्चति । संतापं परित्यजतीत्यर्थः ।

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम् ।
हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयम् ॥९॥

इदं गीतम् । श्रीजयदेवभणितम् अधिकं यथा स्यात्तथा मनसा हृदयेन नटनीयमस्ति । तर्हि भक्तजनैः पठनीयम् । किं हरिविरहाकुलबल्लवयुवतिसखी । तस्याः वचनम् । शेषमर्थं श्लोकेन संपादयति ।

1) A, B °मिति । 2) B कुरुते । 3) A इदमिति किम् । माधव तव चरणे पतिता । B किमितमिति(?)ब्रूते सपदि तत्क्षणमेव । 4) B दुःखाय । 5) P चुम्बति, A वंचति । 6) A कृत्वा । 7) P सरूपां । 8) B मुक्ता (? मुक्त्वा) । 9) P °नुपसरसीति, A मुपसर्पतीति । 10) A मुरारिः । 11) P, B रोदति । 12) P अञ्चति, A वञ्चति । 13) B drops this sentence.

'आवासो विपिनायते' इत्यादि ।

आवासो विपिनायते प्रियसखीमालापि जा[1]लायते
तापोऽपि श्वसितेन दावदहनज्वालाकलापायते ।
सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयन् शार्दूलविक्रीडितम् ॥१०॥

हे प्रिय कृष्ण । अस्या राधिकायाः आवासः क्रीडाहर्म्यं विपिनायते [2]कण्टकाक्रान्तारण्यमिवाचरति । तथा प्रियसखीमालापि इष्टसहचरीपङ्क्तिरपि जालायते जालमिवाचरति । '[3]आनायः पुंसि जालं स्या[4]त्त्सणसूत्रं पवित्रकम्' इत्यमरः । प्रिया चासौ सखी चेति तस्या माला । श्वसितेन सह तापोऽपि दावदहनज्वालाकलापायते । दावदहनो वनाग्निः तस्य ज्वाला तस्याः कलापः समूहः शोकदायकः भयङ्करो वा तद्वदाचरतीत्यर्थः । [5]तथा हन्तेति विषादे कष्टे वा । हे स्वामिन् सा राधा हरिणीरूपायते । हरिणीरूपमिवाचरति । चिन्तातिवर्तते । केन कृत्वा । त्वद्विरहेण । तव विरहो वियोगस्तेन । हा कष्टम् । [6]कथमेतद्युज्यते । [7]तथा विषयत्वात्तस्याः किं कन्दर्पोऽपि मदनोऽपि यमायते । यम इवाचरति । अथवा हा कष्टम् । सा हरिणीरूपायते । अन्यच्च । कन्दर्पोऽपि यमायते । किं कुर्वन् । शार्दूलविक्रीडितं विरचयन् । शार्दूलो व्याघ्रः व्याघ्रवद्भयं जनयन् । यमवद् दुःखमातनोतीत्यर्थः । [8]वृत्तमपि शार्दूलविक्रीडितं नाम ।

[9]देशाख्यरागे । एकतालीताले ।

स्तनेत्यादि ।

स्तनविनिहितमपि हारमुदारम् ।
सा मनुते कृशतनुरतिभारम् ।
राधिका विरहे तव केशव ॥ ध्रुवपदम् ॥१॥

हे केशव । सा राधिका तव विरहे विश्लेषे कृशतनुर्दुर्बला । स्तने विनिहितं कुचमण्डले आरोपितं तम् उदारं सुन्दरं हारं मुक्तालङ्कारं भारमिव मनुते । कलयति जानाति । कृशा तनुर्यस्याः सा तथा । स्तनयोर्विनिहितो न्यस्तस्तम् ।

सरसमसृणमित्यादि ।

सरसमसृणमपि मलयजपङ्कम् ।
पश्यति विषमिव वपुषि सशङ्कम् ॥२॥

1) B ज्वालायते । 2) A, B कण्टकारण्यमिवाचरति । 3) B drops from आनायः to इत्यमरः । 4) P, A स्थानसूत्रं । 5) A तथा हन्ते ( ? हन्तेति ) विषादे कष्टे च । B तथा हन्त खेदे कष्टे वा । 6) B कथमेतत्प्रयुज्यते । 7) A कथाविषयत्वात्, B तथा विषमत्वा ( ? विषयत्वात् ) । 8) B drops from वृत्तमपि to नाम । 9) P देशाख रागे । एकतालीताले ।; A देशाखरागे । तिसारकताले; B देशाखरागेण गीयते । एकतालीताले ।

सा राधा वपुषि स्वदेहे लग्नं मलयजपङ्कं चन्दनं विषं कालकूटमिव पश्यति। किम्भूतम्। सरसमसृणमपि। सह रसेन वर्तत इति सरसः। [1]मसृणः श्लक्ष्णः घृष्टः। कथं यथा स्यात् तथा। सशङ्कं शङ्कया सह वर्तमानं यथा भवति।

श्वसितेत्यादि।

श्वसितपवनमनुपमपरिणाहम्।
[2]मदनदहनमिव वहति सदाहम् ॥३॥

सा राधिका सदाहं यथा भवति तथा श्वसितं पवनं वहति। श्वसितमेव पवनस्तम्। कमिव। मदनदहनमिव। कामाग्निमिव। किम्भूतम्। अनुपमपरिणाहं न विद्यते उपमा [3]दृष्टान्तो यस्य स तथा अनुपमः परिणाहो विशालता यस्य स तथा।

दिशि दिशीत्यादि।

दिशि दिशि किरति सजलकणजालम्।
नयननलिनमिव विगलितनालम् ॥४॥

सा राधा नयननलिनं लोचनकमलं दिशि दिशि किरति क्षिपति। किम्भूतम्। सजलकणजालम्। सह जलकणजालेन वर्तत इति स तथा। [4]ननु पुनः किम्भूतम्। विगलितं नालं यस्य स [5] तथा। ननु प्रतिदिशं रुदती मृगयतीत्यर्थः। अनेन किमुक्तम्। भवतो लाभाय कज्जलाभावान्नयनकमलसजलकुसुमैर्दिग्देवता[6]मर्चयति। अयमाशयः।

नयनविषयमित्यादि।

नयनविषयमपि किशलयतल्पम्।
[7]कलयति विहित[8]हुताशविकल्पम् ॥५॥

सा [9]राधा किशलयतल्पं हुताशनकल्पं अग्निमिव कलयति। मनुते। किशलयं [10]नवं पल्लवम्। तस्य तल्पं [11]शयनं तत्तथा। किम्भूतम्। विहितः कृतश्चासौ हुताशनविकल्पश्चेति [12]बहुव्रीहि [ ? कर्मधारय ]समासः। शीतलत्वाद(? किशलयताम्रत्वाद)ग्निसममित्यर्थः। किम्भूतम्। नयनविषयमपि। नयनयोर्विषयं गोचरम्। अग्रे वर्तमानमपि। अनेन किमुक्तम्। सुखाभावे शीतलकोमल[13]स्याप्यालोकनं न [14]करोतीत्याशयः।

---

1) A मसृणः सूक्ष्मघृष्टः। B मसृणः सूक्ष्मचेष्टा (?)। 2) P- मदनबाणमिव। 3) B दृष्टान्तो। 4) B drops ननु। 5) A तत्तथा। 6) A मर्चयतीत्ययमाशयः। 7) P ननयति (?)। 8) A, B हुताशनकल्पं। 9) B राधिका। 10) A, B नवपल्लवं। 11) B शयनीयं। 12) drops बहुव्रीहिसमासः। 13) A shows in the margin शय्या to be read in place of स्याप्या; B शय्यावलोकन। 14) B करोतीत्यमा (? त्ययमा )शयः।

त्यजति नेत्यादि ।

त्यजति न पाणितलेन कपोलम् ।
बालशशिनमिव सायमलोलम् ॥६॥

तथा सा राधा अलोलम् [1]अचञ्चलं यथा भवति तथा कपोलं न त्यजति । केन । पणितलेन। कदा। सायंकाले । कमिव। बालशशिनमिव। बालश्चासौ शशी चेति। तमिव । [2]समग्रं मुखं पूर्णचन्द्रानुकारि भवति। करतलपिहित-तदेकदेशत्वाद् बालचन्द्रेणोपमीयते।

हरिरि यादि ।

हरिरिति हरिरिति [3]जपति सकामम् ।
विरहविहितमरणेव निकामम् ॥७॥

सा राधा सकामं यथा भवति तथा हरिरिति हरिरिति जपति। कथम्भूता सा । निकाममतिशयेन विरहविहितमरणेव। [4]विरहे विहितं स्वीकृतं मरणमिव यया सा तथा ।

श्रीजयदेवेत्यादि ।

श्रीजयदेवभणि[5]तमिति गीतम् ।
सुखयतु केशवपदमुपनीतम् ॥८॥

श्रीजयदेव[6]भणितमिदं गीतं सुखयतु। कम्। जनम्। [7]किम्भूतम्। [8]केशवं प्रति भक्त्या उपनीतम्। चरणाराधन[9]परमित्यर्थः ।

सा रोमाञ्चतीत्यादि ।

सा[10] रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति
ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि ।
एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसात्
स्वर्वैद्यप्रतिम प्रसीदसि यदि त्यक्तोऽन्यथा नान्तकः ॥९॥

सा राधा 'कृष्णो मां भजते' इति मनसि परिकल्प्य रोमाञ्चति रोमाञ्च-युक्ता भवति। तथा सीत्करोति किलकिञ्चितं विधत्ते। तथा परितो विलोक्य

1) B अचलं । 2) B drops from समग्रं...to णोपमीयते । 3) P. वदति । The commentary reads however, जपति । 4) B विरहेण । 5) °मति । 6) B °भणितं गीतं । 7) B drops किम्भूतम् । 8)A केशवपदं प्रति 9) B °तत्पर° । 10) P neither contains this verse nor offers the comment. B contains the verse only but not the comment.

कृष्णमदृष्ट्वा मिथ्येति मत्वा विलपति विविधं जल्पति तथा उत्कम्पते विरहजनित-कम्पाक्रान्तमनस्का भवति। तथा ताम्यति कृष्णो नायासीदिति मत्वा त्कानि (? क्लान्ति)मधिगच्छति। तथा कृष्णो ममैवं मुखचुम्बनालिङ्गनस्तनावमर्दनादिकं विधास्यतीति ध्यायति चिन्तयति। तथा कृष्णो मां न चुचोद अहं च त्यक्तपतिकैकाकिनी गहनं च वनं रात्रिरतिभीषणा इति मत्वा उद्भ्रमति उद्भ्रान्तचित्ता भवति। तथा निर्जनं वनं निरीक्ष्य सभयमानसा सती लतादिपिहितमध्यप्रदेशान्धकारे पिशाचदिक(? पिशाचादिक)माशङ्क्य प्रमीलति नयननिमीलनं विदधाति। तथा भवत्प्राप्तिकामनयाग्रतो गत्वा तत्रादृष्टपूर्वमतिभयनिदानं दृष्ट्वा पश्चाद्वलिता सती पतति भूमाविति शेषः। तथाशोकमूले चूतमूले वा कदम्बमूले वा कृष्णो निवसतीति बुद्ध्वा दृढं नीवीं परिबध्य तत्र न्मूलं (? तन्मूलं) उद्याति धावति। तत्र तत्रादृष्ट्वा मूर्च्छत्यपि मूर्च्छितमनस्कापि भवति। हे स्ववैद्यप्रतिम स्वर्गे वैद्यौ नासत्यौ तत्प्रतिमस्तत्तुल्यः तस्य संबोधनं हे स्ववैद्यप्रतिम श्रीकृष्ण एतावति एवंविधे विविधपरिपांकयति (? परिपाकवति) अतनुज्वरे कामज्वरे विद्यमाने सा राधा ते तव रसात् त्वद्दत्तकन्दर्परसात् किं न जीवेदपि तु जीवेदिति त्वया कामरसः तस्यै तदातव्यो(? प्रदातव्यो)ऽन्यथा म्रियेतेत्यर्थः। गूढाभिप्रायं प्रार्थयित्वा पुनरालिः श्रीकृष्णं प्रत्याह। हे रतिपण्डित त्वं यदि प्रसीदसि प्रसादं विधत्से तस्या उपस्थितोऽपि अन्तको मृत्युस्त्यक्तो गतो भविष्यत्यन्यथा न।

स्मरातुरामित्यादिश्लोकः।

[1]स्मरातुरां दैवत वैद्य[2]कृत्य त्वदङ्गसङ्गामृतमात्रसाध्याम्।
[3]विमुक्तबाधां कुरुषे न राधामुपेन्द्र वज्रादपि दारुणोऽसि ॥२॥

हे दैवत इष्टदेव। हे वैद्यकृत्य वैद्यानां [4]कृत्यं कार्यं यस्मिन् स तथा तस्य सम्बोधनम्। अथवा। "दैवतं देववैद्ययोः"। तस्य संबोधनम्, हे धन्वन्तरे हे उपेन्द्र श्रीकृष्ण वज्रादपि दारुणोऽसि। निष्ठुरोऽसि[5]। [6]यतो विमुक्तबाधां राधां न कुरुषे। किम्भूताम्। स्मरातुराम्। स्मरेण कन्दर्पेण आतुरां पीडिताम्। किम्भूताम्। त्वदङ्गसङ्गामृतमात्रसाध्याम्। तव अङ्गं शरीरं तस्य सङ्गः स एव अमृतम्। तन्मात्रेण साध्यां रक्षणीयाम्। [7]वृत्तमपि उपेन्द्रवज्रा।

1) A reads the verse सा रोमाञ्चति...first and then: उपेन्द्रवज्रादपि निष्ठुरोऽसि स्मरातुरां दैवतवैद्यकृत्य। विमुक्तबाधां कुरुषे न राधां त्वदङ्गसङ्गामृतमात्रसाध्याम्। 2) P, B °हृद्य; but in the commentary we have °कृत्य। 3) P व्यपेतबाधां; but in the commentary we have विमुक्तबाधां। 4) P, drops कृत्यं; A, however, explains दैवत thus. हे दैवत इष्टदेव। हे वैद्यकृत्य वैद्यानामिव कृत्यं रोगहारित्वं यस्य तस्य संबोधने यद्वा हे दैवतवैद्यकृत्य देवानां वैद्यावश्विनीसुतो (? तौ) तयोरिव कृत्यं यस्य। हे धन्वन्तरे। 5) P adds अधिकं यथा स्यात्तथा वज्रादपि दारुणो निष्ठुरः। 6) A यतो राधां विमुक्तबाधां। B drops राधां। 7) B drops वृत्तमपि उपेन्द्रवज्रा।

कन्दर्पेत्यादि ।

कन्दर्पज्वर[1]संज्वरातुरतनोराश्चर्यमस्याश्चिरं
चेतश्चन्दन[2]चन्द्रमःकमलिनीचिन्तासु संताम्यति ।
किन्तु क्लान्तिवशेन शीतल[3]तनु त्वा[4]मेकमेव प्रियं
[5]ध्यायन्ती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति ॥३॥

अहो आश्चर्यम् । अस्या राधिकायाश्चेतः चित्तं चिरकालं [6]संभ्राम्यति । सम्यक् भ्रमति । कासु । [7]चन्दनचन्द्रमःकमलिनीचिन्तासु चन्दनं च चन्द्रमाश्च कमलिनी च तासां चिन्ता स्मरणं सततं, तासु । किम्भूतायाः । कन्दर्पज्वर-संज्वराकुलतनोः कन्दर्पस्य ज्वरः तेन संज्वरस्तापः तेनाकुला व्याकुला तनुर्यस्याः सा तथा तस्याः । यद्येवं तर्हि कथं न [8]म्रियत इत्याह । किन्तु क्लान्तिवशेन [9]ग्लानिवशेन क्षीणा कथं कथमपि अतिकष्टेन प्राणिति जीवति । [10]किं कुर्वती [11]रहसि स्थिता । एकं त्वामेव प्राणवल्लभं ध्यायन्ती । किम्भूतम् । शीतल-तरम् अतिशयेन शीतलम् ।

क्षणमपीत्यादि ।

क्षणमपि विरहः पुरा न सेहे
नयन[12]निमीलनखिन्नया यया ते ।
श्वसिति कथमसौ रसालशाखां
चिरविरहेण विलोक्य [13]पुष्पिताग्राम् ॥४॥

[14]यया राधिकया पुरा पूर्वकाले [15]क्षणमपि क्षणमात्रमपि तव विरहो विश्लेषः । न सेहे [16]न सोढः । किम्भूतया । नयन[17]निमीलनखिन्नया । नयनयो-र्निमीलनं निमेषः तेन खिन्नया । इदानीमसौ [18]राधिका कथं [19]श्वसिति प्राण-धारणं कथं करोति । [20]किं कृत्वा । चिरविरहेण रसालशाखां चूतशाखां विलोक्य ।

1) B संज(?ज्व) राकुल० । 2) P ०चन्द्रमाःकिमलिनी० । 3) A ०तरं । 4) A, B त्वामेवमेकं । 5) B ध्यायन्ति । 6) B भ्राम्यति । सम्यति(?) । सम्यक् भ्रामति । 7) B चन्द्रमा-चन्दनं कमलिनोर्चिंतासु चन्दनं च चन्द्रमाश्च कमलिनी चिन्ता तासां चिन्ता च स्मरणं सततं तासु । 8) P मृगयत. । 9) B drops ग्लानिवशेन । 10) B drops किं कुर्वती । 11) B रहसी स्थिता । B drops from एकं......to शीतलम् । 12) B ०निमिलितखिन्नया तथा ते । 13) B पुष्पिताग्रं । 14) B drops यया । 15) p drops क्षणमपि; A drops क्षणमात्रमपि । 16) B drops न सोढः । 17) B ०निमीलित । 18) B राधा । 19) B स्वपिति । 20) B drops from किं to विलोक्य ।

किम्भूताम् । पुष्पिताग्राम् । पुष्पितमग्रं यस्याः सा तथा ताम् । [1]वृत्तमपि पुष्पिताग्रा ।

[2]वृष्टिव्याकुलगोकुलावन[3]वशादुद्धृत्य गोवर्धनं
[4]बिभ्रद्गोपतनोस्तनोतु भवतः श्रेयांसि कंसद्विषः ।
दर्पेणैव तदर्पिताधरतटी [5]सिन्दूरमुद्राङ्कितो
[6]बाहुर्बल्लववल्लभाभिरधिकानन्दाच्चिरं चुम्बितः ॥५॥

कंसं द्वेष्टीति कंसद्विट् तस्य कंसद्विषो बाहुर्भवतः श्रेयांसि शुभानि तनोतु विस्तारयतु । किम्भूतो बाहुः । गोवर्धनं बिभ्रत् धारयन् । किं कृत्वा । उद्धृत्य । कस्मात् । वृष्टिव्याकुलगोकुलावनवशात् प्रकुपितेन्द्रप्रयुक्तप्रचण्डवृष्ट्या व्याकुलं यद्गोकुलं तस्यावनं रक्षणं तस्य वशात् । किम्भूतस्य कंसद्विषः । गोपतनोः गोपस्येव तनुर्यस्य स तस्य । किम्भूतो बाहुः । गर्वेणैव तदर्पिताधरतटी तस्याः सिन्दूरं तस्य मुद्रा तया अङ्कितः चिह्नितः वल्लवानां गोपानां वल्लभाभिरङ्गनाभिः अधिकानन्दात् चिरं चुम्बितः ।

इति श्रीगीतगोविन्दटीकायां स्निग्धमाधवो नाम
चतुर्थः सर्गः

---

1) B drops वृत्तमपि पुष्पिताग्रा, P adds स्निग्धः स्नेहवान् माधवो यस्मिन् सर्गे । इति गीतगोविन्दटीकायां स्निग्धमाधवो नाम चतुर्थः सर्गः; B reads स्निग्धः सहवान् (? स्नेहवान्) माधवो यस्मिन् सर्गः (? सर्गे) इति श्रीगीतगोविन्दे माहा( महा )काव्ये स्निग्धमाधवो नाम चतुर्थसर्ग (?०सर्गः) । 2) P contains neither this stanza nor the gloss thereon B gives merely the text of the stanza. 3) B ०रसादुद्धृत्य । 4) B बिभ्रद्वुल्लवसुदभिरधिन्कानन्दाच्चिरं चुम्बति । 5) B ०सिन्दुरमुद्रो(द्रां। किते 6) B बाहुर्गोपतनो तनौतु (? ०तनोस्तनोतु) भवता श्रेयांसि कंसद्विषः ॥

# पञ्चमः सर्गः ।

साकाङ्क्षपुण्डरीकाक्षः ।

उत्तरगीतार्थं श्लोकेन सूचयति । [1]अहमिहेत्यादि—

अहमिह निवसामि याहि राधा-
[2]मनुनय मद्वचनेन चानयेथाः ।
इति मधुरिपुणा [3]सखी नियुक्ता
[4]स्वयमिदमेत्य पुनर्जगाद राधाम् ॥१॥

माधवो वदति । हे सखि अहम् इह निकुञ्जे निवसामि । तिष्ठामि । त्वं याहि गच्छ । [5]राधाम् अनुनय परिसान्त्वय । न केवलमनुनय । आनयेथाश्च । आनयस्व । केन । मद्वचनेन । [6]मम वचनं मद्वचनं तेन । इति अमुना प्रकारेण मधुरिपुणा कृष्णेन सखी नियुक्ता प्रेरिता सती राधां प्रतिपद्य आगत्य स्वयमेव इदं वक्ष्यमाणं पुनर्जगाद उक्तवती ।

[7]देशवराडीरागे पडिमठताले ।

वहतीत्यादि ।

वहति मलयसमीरे मदनमुपनिधाय
स्फुटति कुसुमनिकरे विरहिहृदयदलनाय ।
तव विरहे वनमाली सखि सीदति ॥१॥ इति ध्रुवपदम् ॥

हे सखि राधिके तव विरहे विश्लेषे वनमाली नन्दसूनुः सीदति खेदवान् वर्तते । तव विरह इति पुनरुक्तिः विरहस्य खेदाधिक्यजनकत्वमुद्द्योतनाय । कस्मिन् सति । मलयसमीरे चन्दनानिले वहति सति । किं कृत्वा । मदनं कन्दर्पम् उप समीपे निधाय । मदनं सहायं विधाय । अथवा उपनिधाय उपहारं कृत्वा । जनानामुत्पादनायेत्यर्थः । तथा कुसुमनिकरे पुष्पसमूहे स्फुटति विकसति सति ।

---

1) A drops it; B अहमिहेति । 2) B मधुना । 3) B सखि । 4) B स्वयमिहमेत्य । 5) B राधामुखेनय (?) सान्त्वय न केवलमनुनय । 6) B अमुना श्रीकृष्णेन सखि (? सखी) नियुक्ता प्रेरिता सति ( ? सती ) राधां प्रति आगत्य......र्जगाद उवाच । 7) A देशाखरागे विराडी; B गोडीरागेण गीयते परिमठताले ।

कस्मै। विरहिहृदयदलनाय। विरहिणां हृदयानि तेषां दलनं विदारणं तस्मै। खेदमेवाभिनयेन दर्शयति।

दहतीत्यादि।

[1]दहति शिशिरमयूखे मरणमनुकरोति।
पतति मदनविशिखे विलपति विकलतरोऽति ॥२॥

हे सखि वनमाली मरणम् अनुकरोति। मृततुल्यो भवतीत्यर्थः। कस्मिन् सति। शिशिरमयूखे [2]चन्द्रे दहति सति। शिशिराः शीतला मयूखा रश्मयो यस्य सः तस्मिन्। तथा विलपति [3]परिदेवनं करोति। कस्मिन् सति। मदनविशिखे पतति सति। मदनस्य विशिखः शरः तस्मिन्। किम्भूतः [4]विकलतरोऽति। अतिशयेन विकलः विकलतरः। प्रकृष्टार्थे तरतमौ प्रत्ययौ भवतः।

ध्वनतीत्यादि।

ध्वनति मधुपसमूहे श्रवणमपिदधाति।
मनसि चलितविरहे निशि निशि रुजमुपयाति ॥३॥

हे सखि [5]आत्मनः श्रीकृष्णः श्रवणमपिदधाति। आच्छादयति। कस्मिन् सति। मधुपसमूहे [6]ध्वनति कूजति सति। तथासौ निशि निशि प्रतिरात्रं रुजं सन्तापम् उपयाति गच्छति। कस्मिन् सति। मनसि चलितविरहे सति। चलितो वर्द्धितो विरहः खेदो यस्मिन् तत्तस्मिन्। विरहशब्देनात्र दुःखमुच्यते।

वसतीत्यादि।

वसति विपिनविताने त्यजति ललितधाम।
लुठति धरणिशयने बहु विलपति तव नाम ॥४॥

अथासौ वसति निवासं करोति। कस्मिन्। [7]विपिनविताने। विपिनस्य वितानो विस्तारः विस्तीर्णवने इत्यर्थः। ललितं सुन्दरं धाम गृहं त्यजति। तथासौ लुठति। कस्मिन्। धरणिशयने। धरण्येव शयनं तस्मिन्। तथा तव नाम बहु यथा स्यात्तथा विलपति [8]जपति। अनेन किमुक्तम्। सर्वविषयं परित्यज्य रूपगन्धादिकं सततं त्वामनुध्यायतीत्यर्थः।

---

1) P. leaves out the stanza but gives the comment thereon. 2) B drops चन्द्रे। 3) B परिवेदनं। 4) B विकलीकरोति। B drops from अतिशयेन to भवतः। 5) A श्रीकृष्णः मधुपसमूहे शिलीमुखकदम्बे ध्वनति कूजति सति श्रवणं श्रोत्रन्द्रियम् अपिदधाति आच्छादयति तथा मनसि चलितविरहे सति निशि रात्रौ रुजम् उपयाति संतापं प्राप्नोति। 6) B adds सति after ध्वनति। 7) A विपिनस्य वितानो विस्तारः विस्तीर्णं वनमित्यर्थः। 8) B drops जपति।

भणतीत्यादि ।

भणति कविजयदेवे विरहिविलसितेन ।

मनसि[1] रभसविभवे हरिरुदयतु सुकृतेन ॥५॥

तथा श्रोतॄणां मनसि हृदये हरिः कृष्णः उदयतु । केन । सुकृतेन । गीतजनितपुण्येन । किम्भूते मनसि । [2]चलितविभवे । चलितो वर्धितो विभवो यस्मिन् तत्तस्मिन् । अथवा रभसविभवे । रभसस्य विभवः आधिक्यं रभसः औत्सुक्यं तस्मिन् । कस्मिन् सति । कविजयदेवे भणति सति । कविश्चासौ जयदेवश्चेति तस्मिन् । केन हेतुना । [3]विरहविलसितेन । विलसितं चेष्टितम् । श्लोकेन पूरयति ।

पूर्वमित्यादि ।

पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धय-
स्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः ।
ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं
भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति ॥२॥

सखी वदति । हे राधे । माधवः कृष्णः पुनर्वाञ्छति । किम् । त्वत्कुचकुम्भनिर्भरपरीरम्भामृतम् । तव कुचकुम्भयोः परीरम्भो गाढालिङ्गनं स एवामृतं तत् । कस्मिन् स्थाने । तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे । निकुञ्जमेव मन्मथस्य कामस्य महातीर्थं अधिष्ठानस्थानम् । कथम् । पूर्वं प्राक् । कुत्र । यत्र निकुञ्जे त्वया समम् आसादिता अनुभूताः । काः । रतिपतेः कामस्य सिद्धयः रतिक्रीडाः । किं कुर्वन् । अनिशं सर्वदैव त्वां ध्यायन् । न केवलं ध्यायन् । भूयः पुनरपि जपन् । काम् । तवैवालापमन्त्रावलीम् । आलापाः अन्योऽन्यं मिथः-कथनं त एव मन्त्रास्तेषां आवलिः पङ्क्तिः सा ताम् ।

[4]गुर्जरीरागे एकतालीताले ।

रतिसुखसार इत्यादि ।

रतिसुखसारे गतमभिसारे मदनमनोहरवेषम्[5] ।
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशम् ॥१॥
धीरसमीरे यमुनातीरे वसति वने वनमाली ।
गोपीपीनपयोधरमर्दनचञ्चलकरयुगशाली ॥ ध्रुवपदम् ॥

सखी वदति । हे नितम्बिनि राधिके । वनमाली नन्दसूनुः वने वसति । वर्तते । कुत्र । यमुनातीरे । कथम्भूते । धीरसमीरे । धीरो मन्दः समीरो वायुः

1) P मनसिजरसविभवे; A मनसिजरभसविभवे । 2) A चलितविभवे । चलितो वर्धितो विभवो यस्मिन् तत्तस्मिन् । अथवा रभसस्य विभव आधिक्यं...। 3) A, B विरहिविलसितेन । 4) A गुर्जरीरागे । B drops गुर्जरीरागे एकतालीताले । 5) A, वेशम् ।

यत्र तस्मिन्। तं वनमालिनं हृदयेशं मद्वचनादनुसर गच्छ। गमनविलम्बनं मा कुरु। मा कृथाः। [1]अनुमत्यर्थे पञ्चमी [2]किम्भूतम्। गतम्। कस्मिन् अभिसारे। सङ्केतस्थाने। किम्भूते। रतिसुखसारे रतेः सुखं तदेव सारो यस्य तस्मिन्। पुनः किम्भूतम्। मदनमनोहरवेशम्। [3]मदनस्येव मनोहरो रमणीयः अलङ्कारादिना वेशो रूपभावो यस्य स तथा। तम्।

नामसमेतमित्यादि।

नामसमेतं कृतसङ्केतं वादयते मृदु वेणुम्।
बहु मनुते [4]ननु ते तनुसङ्गतपवनचलितमपि रेणुम् ॥२॥

स वनमाली किं करोति। वेणुं वंशं वादयते। नामसमेतम्। तव नाम्ना समेतं संयुक्तम्। कृतः सङ्केतो यस्मिन् कर्मणि [5]तत्कर्म तत्तथा। ननु हे राधे बहु बहुतरं यथा स्यात्तथा मनुते स्वीकुरुते। कम्। [6]रेणुमपि। कथम्भूतम्। ते तव [7]तनुसङ्गतम्। पवनचलितम्। पवनेन चलितः [8]आनीतः तथा शरीररेणुसंबन्धः स चासौ पवनचलितस्तं तथा।

'पतति पतत्रे' इत्यादि।

पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानम्।
रचयति शयनं सचकितनयनं पश्यति तव पन्थानम् ॥३॥

[9]शङ्कितभवदुपयानं यथा [10]स्यात्तथा तव पन्थानं मार्गं पश्यति। अवलोकयति। भवत्या उपयानम् आगमनं शङ्कितमिव यस्मिन् कर्मणि तत्तथा। कस्मिन् सति। पतत्रे पक्षिणि द्रुमेषु पतति सति। पत्रे विचलति सति। कथं पश्यति। सचकितनयनं यथा स्यात्। चकितेन सह वर्तमाने नयने यस्मिन् कर्मणि तत्तथा। एतल्लक्षणं प्राप्य किं करोति। शयनं शय्यां रचयति। अनेन किमुक्तम्। सर्वप्रकारेणैकमनास्त्वामागतां जानातीत्यर्थः।

मुखरमित्यादि।

मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिसुलोलम्।
चल सखि कुञ्जं सतिमिरपुञ्जं शीलय नीलनिचोलम् ॥४॥

ततस्त्वं हे सखि राधे रिपुमिव मञ्जीरं नूपुरं त्यज। जहीहि। कुञ्जं चल गच्छ। किम्भूतं मञ्जीरम्। [11]मुखरं रवयुक्तम्। पुनः किम्भूतम्। अधीरं धीर-

---

1) B drops अनुमत्यर्थे पञ्चमी। 2) B drops from किम्भूतम् to पुनः। 3) B मदनस्य मनोहरो वेषो आकारादि यस्य स तथा तम्। 4) A; B तनुते। 5) A drops तत्कर्म। 6) A रेणुम्। 7) A तनुसङ्गतपवनचलितं पवनेन चलितः तम्।; B तनुसङ्गतपवनचलितम्। पवनेन चलितः। 8) A drops from आनीतः to तं तथा। 9) A commences with हे राधे! 10) B भवति। 11) B मुखरं, मुखरं शब्दायमानम्।

गुणरहितम् । पुनः किम्भूतम् । केलिसुलोलम् । केलौ क्रीडायां सुलोलम् अतिचञ्चलम् । किम्भूतं कुञ्जम् । सतिमिरपुञ्जम् । तिमिरस्य ध्वान्तस्य पुञ्जो निकरस्तेन सह वर्तत इति । तथा नीलं नीलवर्णं निचोलं वस्त्रं शीलय परिधेहि । नीलश्चासौ निचोलश्चेति । [1]यद्यसौ नायाति तर्हि अहमपि न यास्यामीति चेत्तत्राह ।

उरसीत्यादि ।

उरसि मुरारेरुपहितहारे घन इव तरलबलाके ।
तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके ॥५॥

हे पीते [2]गौराङ्गि राधे त्वं मुरारेर्वासुदेवस्य उरसि हृदये तडिदिव विद्युदिव राजसि; '[3]भविष्यदर्थे वर्तमाना' शोभिष्यसे 'सामीप्ये वर्तमानवद्धातुः'। कदा। रतिविपरीते। रतेः सुरतस्य विपरीतं विपरीतावस्था तस्मिन्। किम्भूते उरसि। उपहितहारे। उपहितो न्यस्तः हारो मुक्तावली यस्मिन्। पुनः किम्भूते। तरलबलाके घन इव। तरलाऽवदाता 'बलाका यस्मिन् स तथा तस्मिन्। बलाका बकपङ्क्तिः स्याद् बलाका बिशकण्ठिका' इति विश्वलोचनः। कस्मिन् समये। सुकृतविपाके। सुकृतस्य जन्मान्तरार्जितपुण्यस्य विपाकस्तस्मिन्। अथवा सुकृतस्य पुण्यस्य विपाकः फलं यस्मिन् तथा तस्मिन्। गत्वा किं करोमि। [4]तत्राह।

विगलितवसनमित्यादि।

विगलितवसनं परिहृतरसनं घटय जघनमपिधानम् ।
किशलयशयने पङ्कजनयने निधिमिव हर्षनि[4]धानम् ॥६॥

हे सखि त्वम् अपिधानम् अनावृतं यथा स्यात्तथा जघनं घटय संयोजय। कस्मिन् विषये। पङ्कजनयने श्रीकृष्णे। विशेषणेन विशेष्यप्रतिपत्तिः। कस्मिन्। किशलयशयने। किशलयं नवपल्लवं तस्य शयनं शय्या। तस्मिन्। किम्भूतं जघनम्। [5]विगलितवसनं विगलितं वसनं यस्मात्तत्तथा। पुनः किम्भूतम्। परिहृतरसनम्। परिहृता रसना यस्मात्तत्तथा। याकारौ स्त्रीकृतौ ह्रस्वौ क्वचित्। [6]पुनः किम्भूतम्। हर्षनिधानं हर्षस्य निधानम् आश्रयः। कमिव। निधिमिव। तर्हि स एवायातु। [7]तत्राह।

1) B drops from यद्यसौ to चेत्तत्राह। 2) A, B गौरि। 3) A drops 'सामीप्ये वर्तमानवद्धातुः'; B drops both 'भविष्यदर्थे वर्तमाना' and 'सामीप्ये वर्तमानवद्धातुः'। 4) P and B drop तत्राह। P निदानम्। 5) B drops from विगलित to परिहृतरशनम्। 6) B किम्भूतं हर्षस्य निदानं मूलकारणं आश्रयः। कमिव निधिमिव। 7) P drops तत्राह।

हरिरभिमानीत्यादि ।

हरिरभिमानी रजनिरिदानीमियमपि याति विरामम् ।
कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम् ॥७॥

हे राधे हरिर्नन्दसूनुः अभिमानी । अतिशयेन मानोऽभिमानो यस्यास्तीति स तथा । [1]मनस्वी प्रभुरीश्वरश्च । यदि त्वामवमन्य अन्यां प्रति याति (यास्यति) तर्हि किं करोषि । अपरमपि शृणु । इदानीं रात्रिर्विद्यते । गच्छ । त्वां कोऽपि न पश्यतीति । इयमपि रजनी रात्रिः [2]विरामं याति । [3]भविष्यत्सामीप्ये वर्तमानकालः रात्रिस्तु क्षयशीला प्रभातोन्मुखी अतो हेतोर्मम वचनं कुरु । सत्वररचनं यथा स्यात् सह त्वरा शीघ्रत्वेन रचनं यस्मिन् तत् । अथवा सत्वरगमनं त्वरं शीघ्रं गच्छ । न केवलं एतत्कुरु । मधुरिपुकाममभिलाषं पूरय । मधुरिपोः हरेः कामं पूरय । अनेन किमुक्तम् । [4]हरिस्तु चौर्यसुरताभिलाषी संकेतस्थाने तिष्ठति । सा सखी [5]कुट्टिनी दूती राधां कुलटामभिसारिकां चालयतीत्यर्थः । कुलटायाः लक्षणं किम् ।

संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा ।
अवगुण्ठनमन्वीता त्रस्तविन्यस्तलोचना ॥
वेपमानोरुयुगला प्रस्खलन्ती समेऽसमे ।
— वात्स्यायनकामशास्त्रमतमिदम् ।

श्रीजयदेवेत्यादि ।

श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम् ।
प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम् ॥८॥

हे बुधजनाः हरिं कृष्णं नमत । किम्भूतम् । सुकृतकमनीयम् । सुकृतेन जन्मार्जितपुण्येन [6]कमनीयोऽभिलषणीयस्तम् । पुनः किम्भूतम् । [7]अतिसदयम् । दयया सह वर्तत इति तथा । अतिशयेन स्वभक्त्या सदयस्तम् । पुनः किम्भूतम् । प्रमुदितहृदयम् । प्रकर्षेण मुदितं हर्षयुक्तं हृदयं यस्य स तथा तम् । कस्मिन् सति । परमरमणीयं यथा स्यात्तथा । श्रीजयदेवे भणति सति । किम्भूते । कृतहरिसेवे । कृता हरेः सेवा येन स तथा । राधायाः शीघ्रगमनार्थमाह । श्लोक[8]चतुष्टयम् ।

---

1) B drops मनस्वी । 2) A विरामम् अवसानम्. । 3) A वर्तमानसामीप्ये वर्तमानवद्वा । B भविष्यत्सामीप्ये वर्तमानः कालः । 4) B हरिस्तवार्थे सुरताभिलाषी । 5) B drops कुट्टिनी, and कुलटां । 6) P कमनीयोऽभिलषणीयस्तम्; कमनीयं अभिलषणीयं B कमनीयो अभिलषणीयो तं । 7) A दयया सह वर्तते इति सदयस्तं तथा । 8) B चतुष्टयेन ।

विकिरतीत्यादि ।

विकिरति मुहुः श्वासानाशाः[1] पुरो मुहुरीक्षते
प्रविशति मुहुः कुञ्जं गुञ्जन्[2] मुहुर्बहु ताम्यति ।
रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते
मदनकदनक्लान्तः कान्ते प्रियस्तव वर्तते ॥३॥

हे कान्ते सुन्दरि तव प्रियः कान्तः श्रीकृष्णः मदनकदनक्लान्तो वर्तते। मदनेन कदनं कदर्थनं बाणप्रहारः तेन क्लान्तः [3]श्रान्तः । क्लान्तत्वमेवोपपादयति। मुहुः पुनः श्वासान् विकिरति क्षिपति। तथा मुहुः भूयोभूयः पुरोऽग्रे [4]आशासु दिक्षु ईक्षते । तथा मुहुर्वारंवारं कुञ्जं प्रविशति। तथा मुहुः कुञ्जन् (गुञ्जन्) अव्यक्तशब्दं यथा स्यात्तथा ताम्यति ग्लानिं भजते। तथा मुहुः शय्यां रचयति। तथा मुहुः पर्याकुलं यथा स्यात्तथा ईक्षते ।

त्वद्वाक्येन सममित्यादि ।

त्वद्वाक्येन समं समग्रमधुना तिग्मांशुरस्तं गतो
गोविन्दस्य मनोरथेन च सह प्राप्तं तमः सान्द्रताम् ।
कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना
तन्मुग्धे विफलं विलम्बनमसौ रम्योऽभिसारक्षणः ॥४॥

हे मुग्धे विवेकशून्ये तत्तस्मात् विलम्बनं विफलं निष्फलम् । यतो रम्यो रमणीयोऽसौ अभिसारक्षणो वर्तते । अभिसरणं अभिसारः सङ्केतस्थानम् । तस्य क्षणोऽवसरः। [5]तदिति कस्मात्। यस्मात्कारणात्। समग्रं सम्पूर्णं यथा स्यात्तथा । तिग्मांशुः सविता अस्तं गतः। कथम्। समम्। केन। त्वद्वाक्येन तव वाक्यविश्वासामृतेन सह । तमः सान्द्रतां निबिडतां प्राप्तं गतम् । केन सह । गोविन्दस्य मनोरथेन साह । सान्द्रतां निबिडतमः प्राप्तं गतम्। केन सह । गोविन्दस्य मनोरथेन सह । मनोरथः तव सङ्गमाकाङ्क्षा तेन। तथा मदभ्यर्थना[6] दीर्घा महती विस्तीर्णा । पुनः कथम्भूता । सदृशी तुल्या । केन । करुणश्चासौ स्वनो ध्वनिस्ते । केषाम् । कोकानां चक्रवाकानाम्।

आश्लेषादित्यादि ।

आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तज-
प्रोद्बोधादनु संभ्रमादनु रतारम्भादनु प्रीतयोः ।

---

1) P श्वासानाशापुरो, B श्वासानासापुरो (? श्वासान्नासापुरो)। 2) P कुंजं कुञ्जन्° । 3) A श्रीकृष्णमेवोपपादयति। 4) A आशाः दिशो in the margin in place of आशासु दिक्षु। 5) A तदिति कुतः । यतः 6) A, B add मम प्रार्थना।

[1]अन्यार्थं गतयोः [2]क्रमान्मिलितयोः संभाषणैर्जानतो–
दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः ॥५॥

इह समये दम्पत्योः स्त्रीपुरुषयोः रसः। को न, को न। अपि सर्वोऽपि। 'दम्पती जम्पती [3]जायापती भार्यापती च तौ' इत्यमरः। किम्भूतो रसः। व्रीडाविमिश्रः व्रीडया लज्जया विमिश्रो मिश्रीभूतः। कथम्भूतयोः। अन्योऽन्यं गतयोः मिलितयोः। कस्मात्। क्रमात् अनुक्रमात्। [4]कस्मादनु। आश्लेषात्। आलिङ्गनात्। न केवलं आश्लेषादनु। चुम्बनादनु। न केवलं चुम्बनादनु। नखोल्लेखादनु। न केवलं नखोल्लेखादनु। स्वान्तजप्रोद्बोधादनु। आत्मनोऽन्तः स्वान्तः अन्तःकरणम्। तत्र जायत इति स्वान्तजः कन्दर्पः। तस्य प्रोद्बोधः प्रकृष्ट उद्बोधः। संभ्रमः। क्षोभः स्त्रीपुरुषाङ्गस्पर्शविकारः तस्मात्। अनन्तरकालं प्रीतयोः मुदितयोः। तदनन्तरं तमसि बहुलान्धकारे संभाषणैर्वचनैर् अन्योऽन्यं जानतो परिचयं गतयोरित्यर्थः।

सभयचकितमित्यादि।

सभयचकितं विन्यस्यन्तीं दृशं तिमिरे पथि
प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम्।
कथमपि रहः प्राप्तामङ्गैरनङ्गतरङ्गिभिः
सुमुखि सुभगः पश्यन्स त्वामुपैतु कृतार्थताम् ॥६॥

इति श्रीगीतगोविन्दे अभिसारिकावर्णने साकाङ्क्षपुण्डरीकाक्षो नाम

## पञ्चमः सर्गः।

हे सुमुखि राधे स कृष्णः त्वां पश्यन् अवलोकयन् कृतार्थतां कृतकृत्यताम् [5]उपैतु प्राप्नोतु। किम्भूतः। [6]सुभगं माहात्म्यं यस्य स सुभगः। कथम्भूतां त्वाम्। कथंकथमपि महत्कष्टेन रहः एकान्ते प्राप्ताम्। कैः। अङ्गैः। [7]कुचबाहुहृदयनाभिनितम्बादिगात्रैः। किम्भूतैः। अनङ्गतरङ्गिभिः। अनङ्गेन कन्दर्पविकारेण तरङ्गीणि। चञ्चलगुणसहितानि। कृष्णगात्रस्पर्शलोभीनि तैस्तथाभूतैः। किं कुर्वन्तीं त्वाम्। सभयचकितं यथा स्यात्तथा पदानि चरणानि विन्यस्यन्तीम् आरोपयन्तीम्। [8]सभयं चकितं यस्मिन् कर्मणि तत्तथा। कस्मिन्। पथि। न केवलं पदानि। दृशं दृष्टिं च विन्यस्यन्तीम्। कस्मिन्। तिमिरे अन्धकारे।

---

1) A अन्योन्यं। 2) A, B भ्रमान्मिलितयोः। 3) P, A भार्यापती जायापती, B drops the whole quotation from दम्पती...to इत्यमरः 4) A आश्लेषादालिङ्गनादनु चुम्बनादनु नखोल्लेखादनु स्वान्तजो मनसिजः कन्दर्पस्तस्य... जातः 5) B उपैति प्राप्नोति। 6) B सुष्ठु भग(:) माहात्म्यं। 7) A कुचकक्षानाभी(? भि)–8) A drops from सभयं to तत्तथा।

कथं यथा स्यात् । मन्दं [1]यथा स्यात्, क्रियाविशेषणम् । पदानि वितन्वतीम् विस्तारयन्तीम् । किं कृत्वा । मुहुः स्थित्वा । क्व । प्रतितरु । तरुं तरुं प्रति । [2]तस्मिन् । अव्ययीभावसमासः । अनेन किमुक्तम् । कामरसजनकवचनैर्मानमपनयतीत्यर्थः ।

इति श्रीगीतगोविन्दटीकायाम् [3]अभिसारिकावर्णने साकाङ्क्षपुण्डरीकाक्षो नाम पञ्चमः सर्गः[4] ।

## षष्ठः सर्गः ।

### सोत्कण्ठवैकुण्ठः ।

गीतं श्लोकेनावतारयति । अथ तामित्यादि ।

अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा ।
तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह ॥१॥

अथानन्तरं या प्रस्थापिता सखी ततो गत्वा तां राधां गोविन्दे कृष्णे समीपं गन्तुमशक्ताम् असमर्थां चिरं बहुकालं श्रीकृष्णेऽनुरक्तां युक्तं प्राह । किम्भूते । मनसिजमन्दे । मनसि जायत इति मनसिजो मारः तेन मन्दः क्लान्तस्तस्मिन् । [5]किं कृत्वा । एवंगुणविशिष्टं राधिकायाश्चरितं तच्चरितम् ।

[6]गुणकरीरागे । रूपकताले ।

पश्यति दिशीत्यादि ।

पश्यति दिशि दिशि रहसि भवन्तम् ।
तदधरमधुरमधूनि पिबन्तम् ॥
[7]नाथ हरे सीदति राधा वासगृहे ॥ [8]ध्रुवपदम् ॥१॥

---

1) A drops यथा स्यात् क्रियाविशेषणम् । 2) A drops तस्मिन् । 3) A drops अभिसारिकावर्णने B concludes thus, इति श्रीगीतगोविन्दे-महाकाव्ये श्रीजयदेवकृतौ टीकायां साकाङ्क्षपुण्डरीकाक्षो रामा(? धा)भिसारिकावर्णनं नाम पञ्चमः सर्ग(र्गः) । 4) B adds the following stanza in concluding the canto but does not give the gloss thereon :

राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली-
नेपथ्योचितनीलरत्नमवनीभारावतारान्तकः ।
स्वच्छन्दं व्रजसुन्दरीजनमनस्तोषप्रदोषोदयः
कंसध्वसनधूमकेतुरवतु त्वां देवकीनन्दनः ॥

5) A drops किं कृत्वा । 6) P गणकरी, A drops रूपकताले; B नटरागेण गीयते वासगृहे । 7) P नाथ हरे विरहे तव सीदति राधा । 8) P ध्रुवं पदम् ।

हे नाथ स्वामिन् । हे हरे श्रीकृष्ण । राधा वासगृहे सीदति । अवसादं प्राप्नोति । अवसादमेवोपपादयति । रहसि निभृते वर्तमाना सा भवन्तं त्वां पश्यति उद्वीक्षते । क्व । दिशि दिशि प्रतिदिशमित्यर्थः । किम्भूतं [1]भवन्तम् । पानं कुर्वन्तं पिबन्तम् । कानि । तदधरमधुरमधूनि । मधुराणि मधुरानुरूपीणि च । तस्या राधिकायाः अधरः तस्य मधुरमधूनि तानि ।

त्वदभिसरणेत्यादि ।

त्वदभिसरणरभसेन वलन्ती ।
पतति पदानि कियन्ति चलन्ती ॥२॥

तथा तत्र वसन्ती त्वदभिसरणरभसेन [2]त्वदागमनौत्सुक्येन कियन्ति कति पदानि चलन्ती सती पतति । त्वां प्रति अभिसरणं अनुगमनं तस्य रभसस्तेन यदि कियन्ति पदानि चलन्ती पतति । तर्हि किमिति न [3]म्रियत इत्याह ।

विहितेत्यादि ।

विहितविशदबिसकिसलयवलया ।
जीवति परमिह तव रतिकलया ॥३॥

हे कृष्ण । इह अस्मिन् समये परं केवलं तव रतिकलया, रतिलेशः कला, तया जीवति । किम्भूता । विहितविशदबिसकिसलयवलया । बिसस्य मृणालस्य किसलयानि । विशदानि शुभ्राणि च तानि बिसकिसलयानि च तेषां वलयानि विहितानि कृतानि विशदबिसकिसलयवलयानि यया सा तथा ।

मुहुरवलोकितेत्यादि ।

मुहुरवलोकितमण्डनलीला ।
मधुरिपुरहमिति भावनशीला ॥४॥

हे नाथ नारायण ! [4]पुनः किम्भूता सा । मधुरिपुरहमिति भावनशीला । [5]मधुरिपुः श्रीकृष्णः अहमेव इति भावेन शीलं स्वभावो यस्याः सा तथा । पुनः किम्भूता सती । मुहुरवलोकितमण्डनलीला । मुहुः पुनः पुनः अवलोकितानि च तानि मण्डनानि हाराङ्गदादीनि च । तेषु लीला क्रीडा यस्याः सा तथा । 'मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समाः' इत्यमरः । अनेन किं कथितम् । हाराङ्गदकङ्कणमुकुटालङ्कारादिनालङ्कृतं शङ्खचक्रगदापद्मधारिणं [6]पीताम्बरं

---

1) A भवन्तम् । तदधरमधुरमधूनि पिबन्तं तस्या राधिकाया अधरस्य मधुराणि मधूनि तानि पिबन्तम् । 2) P drops त्वदागमनौत्सुक्येन; B (त्वदभिसरण)मनुगमनं तस्य रभसस्तेन वलन्ती कियन्ति पदानि चलन्ती पतति । 3) A म्रियते तत्राह । 4) A पुनः सा मधुरिपुरहमिति भावनशीला सा वर्तते । 5) A drops from मधु ...to मण्डनलीला । 6) A पीताम्बरं नीलनीरयुक्तनीरदाभं लक्ष्मीकौस्तुभोरस्कं वनमालिनं ध्यानयुक्ता हृदयस्थं सततमवलोक्य अहमेव मधुरिपुरिति भवन्मयतां प्राप्ता अयमाशयः । ततः किं करोतीत्याह ।

नवनीरदाभं ध्यानयुक्त्या हृदयस्थनारायणं सततमवलोक्य अहमेव मधुरिपुरिति अयमाशयः। इति मत्वा किं करोतीत्याह।

त्वरितमित्यादि

त्वरितमुपैति न कथमभिसारम्।
हरिरिति वदति सखीमनुवारम् ॥५॥

तथा भो कृष्ण सा राधिका मां सखीं प्रति अनुवारं वारंवारं प्रतिवदति। कथम्। इति। इति कथम्। हरिः श्रीकृष्णः अभिसारं सङ्केतस्थानं त्वरितं शीघ्रं कथं नोपैति आगच्छति मत्सकाशम्।

श्लिष्यतीति

श्लिष्यति चुम्बति जलधरकल्पम्।
हरिरुपगत इति तिमिरमनल्पम् ॥६॥

तथा सा अनल्पं बहुतरं तिमिरम् अन्धकारं। श्लिष्यति आलिङ्गति। न केवलं श्लिष्यति चुम्बति। किम्भूतं तिमिरम्। जलधरकल्पं नीलमेघसन्निभम्। किमिति वितर्के। हरिः श्रीकृष्णः उपगतः समागत इति बुद्ध्या।

भवतीत्यादि।

भवति विलम्बिनि विगलितलज्जा।
विलपति रोदिति वासकसज्जा ॥७॥

तथा सा राधिका वासकसज्जा वासकस्थाने लतागृहे सज्जा तत्परा इत्यर्थः कृतशृङ्गारवेषा सती विलपति। विलापं शोकं करोतीत्यर्थः। न केवलं विलपति रोदिति च। रोदनं करोति (च)। कस्मिन् सति। [1]भवति त्वयि सति। कथम्भूते। विलम्बिनि। कृतविलम्बे सति। विलम्बो निवृत्तिः [2]अनागमनहेतुः सोऽस्यास्तीति मन्त्वन्तीन् विलम्बी। तस्मिन्। [3]तदस्यास्तीति मन्त्वन्तीन् [कातन्त्र ॥५०४॥ (तद्धित) तद्विति प्रथमान्ताद् अस्यास्तीति एतस्मिन्नर्थे मन्तु वन्तु विन् इन् इत्येते प्रत्यया भवन्ति।] किम्भूता सा। विगलितलज्जा। विगलिता अपगता लज्जा यस्याः सा। अनेन किमुक्तम्। सा राधिका कामानुकीर्णा समीपस्थितसखीनां लज्जां न करोतीत्यर्थः।

श्रीजयदेवकवेरित्यादि।

श्रीजयदेवकवेरिदमुदितम्।
रसिकजनं तनुतामतिमुदितम् ॥८॥

श्रीजयदेवकवेः उदितं भणितम् इदं तनुतां विस्तारयतु। [4]भावे क्तप्रयोगे कर्तरि वा षष्ठी भवति। अतिमुदितं सुखदायकम्। कं प्रति। रसिकजनं प्रति।

1) B त्वयि विलम्बिनि सति। कृतविलम्बे सति। 2) B आगमनहेतुः। 3) A, B drop तदस्यास्तीति मन्त्वन्तीन्। 4) P भावे क्त प्रयोगे कर्तरि वा षष्ठी भवति। B drops from भावे to षष्ठी भवति।

रसिकश्चासौ जनश्च सः तम्। अथवा। रसिकजनम् अतिमुदितम् अतिहृष्टं विस्तारयतु। गीतार्थं श्लोकाभ्यां विस्तारयति कविः।

विपुलपुलकेत्यादि।

विपुलपुलकपालिः स्फीतसीत्कारमन्त-
जनितजडिमकाकुव्याकुलं व्याहरन्ती।
तव कितव विधायामन्दकन्दर्पचिन्तां
रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी ॥२॥

सखी वदति वासुदेवं प्रति। हे कितव धूर्त कापटिक, सा मृगाक्षी मृगनयना राधिका विधत्ते कुरुते। काम्। अमन्दकन्दर्पचिन्ताम्। अमन्दः इत्युत्कटश्चासौ कन्दर्पश्च तेन चिन्तां सुरतसुखसंभोगप्रयोजनाम्। किम्भूता। ध्यानलग्ना। ध्यानं समाधिः तत्र लग्ना तत्परा। पुनः किम्भूता। रसजलनिधिमग्ना। रसः शृङ्गारः स [1]एव जलनिधिः तत्र मग्ना प्रविष्टा शृङ्गाररसकुशलेत्यर्थः। पुनः किम्भूता। विपुलपुलकपालिः। विपुलानि पुलकानि पान्तीति [2]रञ्ज[य]न्तीति विपुलपुलकपाः तेषामालिः पङ्क्तिः विपुला विस्तृता पुलकपालिर्यस्याः तथा। अथवा। विपुला विस्तृता पुलकपालिर्माला यस्याः सा तथा। किं कुर्वती। व्याहरन्ती वदन्ती। कथम्। अन्तर्जनितजडिमकाकुव्याकुलं यथा भवति तथा। जनितश्चासौ जडिमा जाड्यं च, अन्तः अभ्यन्तरे अन्तःकरणे जनितो जडिमा तेन काकुर्ध्वनिः [3]स्त्रीणां विकारशब्दः, तेन व्याकुलं व्यग्रं तत्। पुनः कथम्भूतम्। स्फीतसीत्कारं यथा भवति, स्फीतः प्रचुरः सीत्कारो यस्मिन् तत्तथा।

अङ्गेष्वित्यादि।

अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि संचारिणि
प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति।
इत्याकल्पविकल्पतल्परचनासङ्कल्पलीलाशत-
व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति ॥३॥

इति श्रीगीतगोविन्दे वासकसज्जावर्णने सोत्कण्ठवैकुण्ठो नाम षष्ठः सर्गः।

हे नाथ। एषा वरतनुः [4]शोभनाङ्गी राधा। त्वया विना त्वां प्राणनाथं विना अन्तरेण निशाम् इमां रात्रिं न नेष्यति। किम्भूता सती। इत्याकल्पविकल्परचनासङ्कल्पलीलाशतव्यासक्तापि। क्रमेण। आकल्पः आभरणं विकल्पः परिशङ्का [5]च तर्कयति तल्परचना शय्यारचना। सङ्कल्पो मानसं कर्म ध्यानं वा। इत्या-

1) B जलनिधिः समुद्रस्तत्र। 2) B drops रञ्ज(य)न्तीति। 3) P, A, B all these MSS read स्त्रीणां, possibly a mistake for स्त्रियां। 4) B शुभाङ्गी 5) A and B do not contain च तर्कयति-these words probably have crept in through scribe's inadvertence.

दीनि च लीलाशतं च तानि । तेषु व्यासक्तापि । अनल्पमनस्कापि । इति कथम् । अङ्गेषु करचरणादिषु बहुशो बहुतरम् आभरणमलङ्कारं सा करोति । [1]अथ बहुलं यथा स्यात्तथा पत्रेऽपि सञ्चारिणि चलति सति । त्वां कृष्णं प्राप्तं समागतं परिशङ्कते विकल्पयति । तथा वितनुते विस्तारयति । काम् । शय्याम् । तथा त्वां चिरं [2]ध्याययतीत्यनेन [ संकल्प उक्तः । ]

[3]इति गीतगोविन्दटीकायां सोत्कण्ठवैकुण्ठो नाम षष्ठः [4]सर्गः ।

## सप्तमः सर्गः ।

### नागरनारायणः ।

अत्रान्तर इत्यादि ।

अत्रान्तरे च कुलटाकुलवर्त्मपात-
संजातपातक इव स्फुटलाञ्छनश्रीः ।
वृन्दावनान्तरमदीपयदंशुदीपै-
र्दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः ॥१॥

अत्रान्तरे अवसरे इन्दुश्चन्द्रमाः । [6]अदीपयत् प्रकाशितवान् । किम् । वृन्दावनान्तरम् वृन्दावनस्य अन्तरं अभ्यन्तरमित्यर्थः । तत्तथा । कैः । अंशुदीपैः अंशवः किरणा एव दीपास्तैः । पुनः कथम्भूतः । वदनचन्दनबिन्दुः । चन्दनस्य बिन्दुः, प्राची दिगेव सुन्दरी, तस्याः वदनम्, तत्र चन्दनबिन्दुः पुनः किम्भूतः । स्फुटलाञ्छनश्रीः लाञ्छनस्य कलङ्कस्य श्री शोभा, स्फुटा [7]प्रव्यक्ता लाञ्छनस्य श्रीर्यस्मिन् स तथा । किम्भूत इव । कुलटाकुलवर्त्मपातसञ्जातपातक इव । [8]कुलटाकुलवर्त्मपाते सञ्जातपातक इव । कुलान्यटन्तीति कुलटाः, व्यभिचारिण्यः, असत्यः, तासां कुलं समूहः तस्य वर्त्म मार्गः तत्र [9]पातः पतनं तेन सञ्जातं पातकं यस्य स

1) B drops from अथ to चलति सति । 2) A ध्यायति । 3) B इति श्रीगीतगोविन्दे महाकाव्ये टीकायां षष्ठसर्गः । 4) B ends the canto with the following additional verse.

किं विश्राम्यसि कृष्ण भोगिभवने भाण्डीरभूमीरुहि
भ्रातर्याहि न दृष्टिगोचरमितः सानन्दनन्दास्पदम् ।
राधाया वचनं तदध्वगमुखान्नन्दान्तिके गोपतो
गोविन्दस्य जयन्ति सायमतिथिप्राशस्त्यगर्भा गिरः ॥

5) B °दंशुजालै— । 6) A) वृन्दावनान्तरं वृन्दावनस्याभ्यन्तरमदीपयत् । 7) A व्यक्ता । 8) B drops from कुलटा to इव । 9) B घात वाथवा पातः ।

तथा। अयमपि व्यभिचारीत्यर्थः। [1]अथवा तस्य पातो निरोधः तेन सञ्जातं पातकं यस्य स तथा इति।

प्रसरतीत्यादि।

प्रसरति शशधरबिम्बे विहितविलम्बे च माधवे विधुरा।
विरचितविविधविलापं सा परितापं चकारोच्चैः ॥२॥

सा राधा परितापं खेदम् उच्चैः अतिशयेन चकार। किम्भूतम्। विरचितविविधविलापम्। विरचितो विविधो नानाप्रकारो विलापो यस्मिन् [2]स तथा। तस्मिन् सति किम्भूता सा। विधुरा दुःखिता सती। कस्मिन् सति। शशधरबिम्बे चन्द्रमण्डले प्रसरति सति। [3]विस्तारं प्राप्नुवति सति। न केवलं चन्द्रमण्डले प्रसरति। माधवे श्रीकृष्णे [4]विहितविलम्बे सति। विरचितेति पाठे सति [5]सा राधा उच्चैः परितापं चकार। विरचितः कृतः विविधो विलापो यत्र स तथा तम्। अनेन किमुक्तं कविना श्रीजयदेवेन। सा राधा [6]तदेकमनाः कृष्णतत्परा वर्तत इत्यर्थः।

[7]मालवरागे परिमठे ताले।

कथितसमयेऽपीत्यादि।

कथितसमयेऽपि हरिरहह न ययौ वनं
मम विफलमिदममलरूपमपि यौवनम्।
यामि हे कमिह शरणं सखीजनवचनवञ्चिता ॥ ध्रुवपदम् ॥१॥

हे इत्यदृष्टसम्बोधनम्। हे देव [9]इह अधुना कं शरणं रक्षितारं यामि गच्छामि। किम्भूता सखीजनवचनवञ्चिता। सखी चासौ जनश्चेति। तस्य वचनम्। तेन वञ्चिता[10]। कथम्। यतः कथितसमयेऽपि सख्या कथितश्चासौ समयश्चेति तस्मिन्नपि हरिर्वनं न ययौ न गतः। अहह महाकष्टं तेन कारणेन ममेदम् अमलं सुन्दरं रूपं यौवनमपि विफलं निष्फलमेवाभूत्।

यदनुगमनेत्यादि।

यदनुगमनाय निशि गहनमपि शीलितम्।
तेन मम हृदयमिदमसमशरकीलितम् ॥२॥

---

1) A, B drop from अथवा...to तथा इति। 2) A सः तम्। कस्मिन् सति शशधरबिम्बे चन्द्रमण्डले प्रसरति विस्तारं प्राप्नुवति सति विधुरा दुःखिता। अनेनैतदुक्तम्। सा राधा कृष्णतत्परा वर्तत इत्यर्थः। 3) B drops विस्तारं प्राप्नुवति सति। 4) P adds कृत before विहित। 5) A, B drop from सा to स तथा तम्। 6) A, B drop तदेकमनाः। 7) A drops from मालव° to ताले। B मालवरागेण गीयते परिमठताले। 8) A adds इति before ध्रुवपदम्। 9) B इह कं शरणं यामि रक्षितारं गच्छामि। 10) B adds प्रवंचिता।

किञ्च मया यदनुगमनाय यस्य श्रीकृष्णस्य अनुगमनं पश्चाद्गमनं तस्मै प्रयोजनाय निशि रात्रौ गहनम् अरण्यमपि शीलितं आलोडितम्। यदनुगमनायेति कथम्। इच्छायामपि चतुर्थी। अतो हेतोः तेन कृष्णेन ममेदं हृदयं असमशरेण कन्दर्पेण कीलितं शङ्कुना विद्धमित्यर्थः।

मम मरणमित्यादि।

मम मरणमेव वरमतिवितथकेतना।
किमिति विषहामि विरहानलमचेतना ॥३॥

किञ्च। अथ तेन शुद्धिरहिता सती अहमिह वने विरहानलं विरहजनिताग्निं किमिति विषहामि अनुभवामि। किम्भूता। अतिवितथकेतना। अतिवितथं अति नेष्टं केतनं सङ्केतस्थानं यस्याः सा तथा। अतो विरहानलसहनात् मम दुःखितायाः मरणमेव वरं श्रेष्ठमित्यभिप्रायः। [2]विषहामीति गणकृतस्यानित्यत्वात् परस्मैपदम्।

मामहहेत्यादि।

मामहह विधुरयति मधुरमधुयामिनी।
कापि हरिमनुभवति कृतसुकृतकामिनी ॥४॥

[3]किञ्च अहह कष्टम्। मधुरमधु[4]यामिनी वसन्तरजनी मां विधुरयति दुःखयति। मधुरा रमणीया च मधोर्वसन्तस्य यामिनी चेति सा। तथा कापि कृतसुकृतकामिनी हरिं कृष्णम् अनुभवति। कृतं सम्पादितं महापुण्यं यया सा चासौ कामिनी चेति।

अहहेत्यादि।

अहह कलयामि वलयादिमणिभूषणम्।
हरिविरहदहनवहनेन बहुदूषणम् ॥५॥

अहह कष्टम्। अहं कलयामि। वलयादिमणिभूषणम्। आदिशब्देन बिसकिसलयादिकमपि प्राप्यते। किम्भूतम्। बहुदूषणम्। केन। हरिविरहदहनवहनेन हरेः सकाशाद्विरहो विश्लेषः स एव दहनः कृशानुः तस्य वहनं धारणं तेन।

कुसुमसुकुमारेत्यादि।

कुसुमसुकुमारतनुमतनुशरलीलया।
स्रगपि हृदि हन्ति मामतिविषमशीलया ॥६॥

[5]इयं च वर्तमाना स्रगपि मालापि मां हन्ति व्यथयति सन्तापयतीत्यर्थः। कया। अतनुशरलीलया। न विद्यते तनुर्यस्य स तथा अतनुः कामः तस्य शरलीलया।

---

1) A, B °मिति°। 2) P विषहामीति गणकृतस्यानित्यत्वात् परस्मैपदम्। B drops this line. 3) A drops किञ्च। 4) A °यामिनी मां विधुरयति। वसन्तसमयरात्रिः मां दुःखयति। B °यामिनी हरिं कृष्णम् अनुभवति। (thus drops from वसन्त° to °कामिनी)। 5) B drops from इयं to अतनुशरलीलया।

कस्मिन् । हृदि हृदये । कथम्भूतया । अतिविषमशीलया । [1]अतिशयेन विषम दुःसहः शीलः स्वभावो यस्याः सा तया । किम्भूतां माम् । कुसुमसुकुमार-तनुं कुसुमादपि सुकुमारा तनुर्यस्याः सा तथा ताम् । [2]'कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः' इत्यमरः ।

अहमिहेत्यादि ।

अहमिह निवसामि न[3] विगलितबलचेतसा ।
स्मरति मधुसूदनो मामपि न चेतसा ॥७॥

किञ्च अहं वने निवसामि । सहायाभावे कथं न बिभेषि । तत्राह-न विगलितबलचेतसा [4]विगलितं बलं च चेतश्च यस्याः सा तया । सहायाभावेऽपि तेन स्वधैर्येणेह वसामि इति भावः[5] । अनुगणितवनवेतसेति पाठे । किम्भूताहम् । विशेषेण गणिता वनवेतसा यया सा तथा । किन्तु मधुसूदनोऽपि मां तत्परां चेतसापि न स्मरति ।

हरिचरणेत्यादि ।

हरिचरणशरणजयदेवकविभारती ।
वसतु हृदि युवतिरिव कोमलकलावती ॥८॥

इयं भक्तजनानां हृदि उरःस्थले हरिचरणशरणजयदेवकविभारती वसतु तिष्ठतु । हरेर्वासुदेवस्य चरणौ शरणं यस्य स चासौ जयदेवकविश्चेति तस्य भारती गतिरूपेणेयं वाणी । केव । कामिनां हृदये युवतिरिव । किम्भूता । कोमलकलावती मूर्च्छनादिकला विद्यते यस्याः सा तथा । चतुःषष्टिकला-न्विता च सा तथा । कर्मधारयः समासः कोमला चासौ कलावती चेति । युव-तिरपि एतादृशी अवयवकोमला शृङ्गारादिकलावती भवतीत्यर्थः । प्रियस्या-नागमनहेतुं श्लोकेन [6]कल्पयति ।

तत्किमित्यादि ।

तत्किं कामपि कामिनीमभिसृतः किंवा कलाकेलिभि-
बद्धो बन्धुभिरन्धकारिणि [7]वनोपान्ते किमु भ्राम्यति ।
कान्तः क्लान्तमना मनागपि पथि प्रस्थातुमेवाक्षमः
सङ्केतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि यन्नागतः ॥३॥

---

1) अतिविषमा दुःसहा लीला यस्याः । 2) B drops from कन्दर्पो to इत्यमरः । 3) A न(ग)णितवनवेतसा । B न गणितवनवेता(त)सा । 4) A विगलिते बलचेतसी यस्याः सा तया । 5) A अनुगणितवनवेतसा किम्भूताहं विशेषेण गणिता बहुवेतसा यया सा तथा वानीरस्य निकुञ्जवेतसा न विगणयन्तीह वसामीति भावः । नु इति वितर्के । मधुसूदन आगमिष्यतीति आशा किन्तु मधुसूदनो मां तत्परां चेतसापि न स्मरति । 6) A सूचयति । 7) A वनोपान्ते किमुद्भ्राम्यति ।

यद्यस्मात् कान्तः प्रियः श्रीकृष्णः सङ्केतीकृतमञ्जुवञ्जुललताकुञ्जे नागत एव। मञ्जु मनोज्ञं वञ्जुलस्य वानीरस्य लता बल्ल्यः ताभिः सम्पादितः कुञ्जः लतागृहम् अस्त तः सङ्केतीकृतश्चासौ वञ्जुलताकुञ्जश्चेति तस्मिन्। ननु तस्मात्कारणात् कामपि कामिनीम् अभिसृतः उपगतः। किंवा बन्धुभिर्वयस्यैर्बद्धः। किम्भूतैः। कलाकेलिभिः कला परिहासादिः तस्याः केलिः क्रीडा येषां ते तथा तैः। अथवा बन्धुभिः सकान्ताभिः कामकलादिभिः केलयः ताभिः किमु। किंवा वनोपान्ते वनसमीपे ज्ञात्वा भ्रमति भ्राम्यति। किम्भूते। अन्धकारिणि। अन्धकारो विद्यते यस्मिन् तत्तथा तस्मिन्। अथवा क्लान्तमनाः खिन्नमनाः पथि मार्गे मनागपि स्वल्पमपि प्रस्थातुं समागन्तुम् अक्षमः। वक्ष्यमाणगीतं श्लोकेनावतारयति।

अथागतामित्यादि।

अथागतां माधवमन्तरेण सखीमियं वीक्ष्य विषादमूकाम्।
विशङ्कमाना रमितं कयापि जनार्दनं दृष्टवदेतदाह ॥४॥

अथानन्तरम् इयं राधा दृष्टवद्यथा भवति तथा एतद्वक्ष्यमाणगीतेन आह उवाच। किं कृत्वा। माधवमन्तरेण कृष्णेन विना आगतां सखीं वीक्ष्य दृष्ट्वा। कथम्भूताम्। विषादमूकां विषादेन मूका सा तथा ताम्। कार्याभावाद्विस्मयेन तूष्णीं स्थिताम्। किम्भूता सा। जनार्दनं श्रीकृष्णं कयापि रमण्या रमितं विशङ्कमाना सती। उत्प्रेक्ष्याह कविरित्यर्थः।

[1]वसन्तरागे। एकतालीताले।

स्मरसमरोचितेत्यादि।

स्मरसमरोचितविरचितवेशा।
गलितकुसुमदरविलुलितकेशा ॥१॥
कापि मधुरिपुणा विलसति युवतिरधिकगुणा ॥ ध्रुवपदम् ॥

राधा वदति। कापि काचन युवतिः अधिकगुणा मधुरिपुणा माधवेन सह विलसति क्रीडति। विनासहसमयोगे तृतीया। अधिको गुणो यस्याः सा तथा। पुनः किम्भूता। स्मरसमरोचितविरचितवेशा। स्मरस्य कामस्य समरः संग्रामः अथवा स्मरेण हेतुभूतेन [2]समरं स्त्रीपुरुषयोः संयोगः तस्मै उचितो योग्यो विरचितः शृङ्गारादिवेशो यया सा तथा। पुनः कथम्भूता। गलितकुसुमदरविलुलितकेशा गलितानि कुसुमानि येभ्यः ते तथा, ईषद्विलुलिताः रतिसुरतायासेन मुक्ताः केशाः यस्याः सा तथा।

हरिपरिरम्भणेत्यादि।

हरिपरिरम्भणचलितविकारा।
कुचकलशोपरि तरलितहारा ॥

1) A वसन्तरागे; B वसन्तरागेण गीयते यतिताले। 2) A B समरः।

कथम्भूता। हरिपरिरम्भणेन श्रीकृष्णाश्लेषेन चलितो विकारो मदनजनित-रसो यस्याः सा। पुनः किम्भूता। कुचकलशोपरि तरलितहारा। कुचावेव कलशौ तयोरुपरि तरलितोऽस्थिरो हारो यस्याः सा तथा।

विकचजलजेत्यादि।

[1]विकचजलजललिताननचन्द्रा।

तदधरपानरभसकृततन्द्रा ॥३॥

पुनः किम्भूता। [2]विकचजलजललिताननचन्द्रा। विकचं विकसितं च तत् जलजं पद्मं च तद्वत् ललितम् आननमेव चन्द्रो यस्याः सा तथा। [3]विचल-दलकललिताननचन्द्रा इति पाठे। विशेषेण चलन्तश्च ते अलकाश्चूर्णकुन्तला-श्चेति तैर्ललितः आननचन्द्रो यस्याः सा तथा। पुनः कथम्भूता। तदधरपान-रभसकृततन्द्रा। तस्य श्रीकृष्णस्य [4]गाढालिङ्गनानन्तरं यत् अधरपानं तस्य रभसः क्रीडाबलात्कारः तेन कृता तन्द्रा सुखानुभवो [5]अलसजनितेषन्नतमु-द्रताभावो [? मुद्राभावो] यस्याः सा तथा।

चञ्चलकुण्डलेत्यादि।

चञ्चलकुण्डल[6]दलितकपोला।

मुखरितरसनजघनगतिलोला ॥४॥

कथम्भूता सा। चञ्चले च ते कुण्डले चेति ताभ्यां [7]दलितौ अभि-हता कपोलौ यस्याः सा तथा। पुनः किम्भूता। मुखरितरसनजघनगतिलोला। मुखरिता शब्दायमाना रसना क्षुद्रघण्टिका जघनयोर्गत्या लोला चञ्चला यस्याः सा तथा।

दयितविलोकितेत्यादि।

दयितविलोकितलज्जितहसिता।

बहुविधकूजितरतिरसरसिता ॥५॥

कथम्भूता सा। दयितो माधवस्तस्य विलोकितं तेन लज्जिता हसिता चेति। अत्र स्थितेन केशवेन मम पुरः सर्वाङ्गमवलोकितं निरूपितं च स्त्रीस्व-भावाल्लज्जिता। मया अबलया कदापि विपरीतेन रतेन किं स भवान् वञ्च-यितव्य इति हसिता। पुनः किम्भूता। बहुविधेन सारस-पारावत-लावकादि-शब्दवत् कूजितेन रतिरसेन कोकपञ्चसायकादिकामशास्त्रशृङ्गारे रसितं शब्दितं यया सा तथा।

---

1) B विचलदलकललिता° । 2) B विचलदलकललिताननचन्द्रा । 3) B drops this line. । 4) B drops गाढा° यत् । 5) A अलसजनितेषन्नर्तनमुद्राभावो; B अलस-जनितनिमेषनर्तनमुद्रताभावो । 6) A, B °ललित° । 7) A ललितौ कपोलौ यस्याः सा तथा ।

विपुलपुलकेत्यादि ।

विपुलपुलकपृथुवेपथुभङ्गा ।
श्वसितनिमीलितविकसदनङ्गा ॥६॥

पुनः किम्भूता । विपुलपुलकपृथुवेपथुभङ्गा विपुला विस्तीर्णाश्च ते पुलकाश्च ते रोमहर्षाः, पृथुर्महान् अधिकश्चासौ वेपथुः कम्पश्च तेषां भङ्गस्तरङ्गः उदितो यस्याः सा तथा। पुनः किम्भूता। श्वसितनिमीलितविकसदनङ्गा । श्वसितं च निमीलितं च ताभ्यां विकसितः विकाशमागतः अनङ्गो यस्याः सा तथा ।

श्रमजलेत्यादि ।

श्रमजलकणभरसुभगशरीरा ।
परिपतितोरसि रतिरणधीरा ॥७॥

पुनः कथम्भूता । श्रमजलकणभरसुभगशरीरा । श्रमेण [1]जलं स्वेदः तस्य कणाः [2]तेषां भर आधिक्यं तेन सुभगं [3]श्रीयुक्तं शरीरं यस्याः सा तथा । पुनः किम्भूता । परिपतितोरसि रतिरणधीरा । भर्तुः स्वामिनः उरसि हृदये परिसमन्ताद्भावेन पतिता सती, [4]रतिरणे सुरतसङ्ग्रामे धीरा कुशला [5]गाढालिङ्गनचुम्बननखाघातादिकर्मलोलुपपुरुषनारायण[6]निर्दययन्त्रणभरसहनसमर्था इत्यर्थः ।

श्रीजयदेवेत्यादि ।

[7]श्रीजयदेवभणितहरिरमितम् ।
कलिकलुषं जनयतु परिशमितम् ॥८॥

[8]कलिकलुषं कलिहेतुकं पापं [9]शमयतु नाशं नयतु । किम् । श्रीजयदेवभणितं हरिरमितम् । श्रीजयदेवेन भणितं च तत् हरिरमितं चेति [10]कर्मधारयः। गीतं श्लोकेनावतारयति ।

विरहेत्यादि ।

विरहपाण्डुमुरारिमुखाम्बुजद्युतिरयं तिरयन्नपि [11]वेदनाम् ।
विधुरतीव तनोति मनोभुवः सुहृदये हृदये मदनव्यथाम् ॥९॥

---

1 ) B यज्जलं । 2 ) B drops तेषां भर । 3 ) B drops श्रीयुक्तं । 4 ) B रतीतैः(?) रणे । 5 ) B drops from गाढा° to इत्यर्थः । 6 ) A °निर्दयत्रपाभर° ।

7 ) P श्रीजयदेवभणितमभिलिखितम् ।
कलिकलुषं शमयतु हरिरमितम् ॥

8 ) A श्रीजयदेवभणितं यत् हरिरमितं तत् कलेः युगस्य कलहस्य कलुषं च पापं तत् यद्वा कलिश्च कलुषं च तयोः समाहारस्तं परिशमितं जनयतु । 9) B प्रशमितं जयतु । 10 ) B drops कर्मधारयः । 11 ) A चेतनां । The commantary in P and B, however has the reading चेतनां and not वेदनां ।

राधिका वदति। हे सखि अयं विधुश्चन्द्रः मम हृदये मदनव्यथां अतीवातिशयेन तनोति विस्तारयति [1]जनयति। मदनक्षोभेण संतापदुःखव्यथा ताम्। किम्भूतः। [2]सुहृत् सखा। कस्य। मनोभुवः हृदयजस्य, [3]मनसि भवतीति मनोभूः तस्य। किम्भूतः। विरहपाण्डुमुरारिमुखाम्बुजद्युतिः मुरारेर्मुखाम्बुजं पद्मं तस्य द्युतिरिव शोभा यस्य सः तथा। किं कुर्वन्। चेतनां धैर्यं विवेकबुद्धिमपि तिरयन् आच्छादयन्। [4]अपिशब्दोऽव्ययः। वेदनामिति पाठे। [5]वेदनां तिरयन्नपि। वेदना ज्ञान-दुःखयोरिति हारावली। अनेन किमुक्तम्। चन्द्रमाः हरेर्मुखसदृश इति न परितापं प्राप्नोमि। कामस्य सुहृद्धेतोः प्रपीडयत्ययमाशयः। [6]प्रतिम-[?]रूपकालङ्कारः। तत्र हेतुमाह।

[7]गुर्जरीरागे एकतालीताले।

समुदितमदनेत्यादि।

समुदितमदने [8]रमणीवदने चुम्बन[9]वलिताधरे।
मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे ॥१॥
रमते यमुनापुलिनवने विजयी मुरारिरधुना ॥ ध्रुवपदम् ॥

राधा वदति। अये सखि अधुना इदानीं मुरारिः श्रीकृष्णः रमते क्रीडति। कस्मिन्। वने। किम्भूते। यमुनापुलिने यमुनायाः पुलिनं यस्मिन् तत्तथा तस्मिन्। कथम्भूतः। विजयी रतिसंग्रामजययुक्त इत्यर्थः। न केवलं क्रीडति। रमणीवदने प्रेयसीमुखे मृगमदतिलकं कस्तूरीतिलकं लिखति। किम्भूतं तिलकम्। प्रविलसदलकं प्रकर्षेण विलसन्तः अलकाः क्षुद्रकुन्तलाः यत्र तत्तथा। अथवा सपुलकं यथा स्यात् सह पुलकेन रोमोद्गमेन वर्तते यस्मिन् कर्मणि तत्तथा स्यात्। कमिव। रजनीकरे चन्द्रे मृगमिव कृष्णसारकलङ्कमिव। अष्टमीचन्द्रे ललाटस्योपमानं संपूर्णे चन्द्रमसि कस्तूरिकातिलकं मृगलाञ्छनतुल्यमिव [10]अर्थाल्ललाटे। उपमालङ्कारः। किम्भूते वदने। समुदितमदने सम्यक्प्रकारेण मुदितो [11]हर्षितो मदनः कामो यत्र तत्तथा। [12]अथवा समुदितोऽतिव्यक्तोत्पन्नो मदनो यस्मात्तत्तथा तस्मिन्। पुनः किम्भूते। चुम्बनवलिताधरे चुम्बनाय [13]वलितो वर्धितोऽधरोष्ठो यस्मिन् तत्तथा। अथवा चुम्बनाय वलितो [14]वारितोऽधरो यस्मिन् तत्तथा।

---

1) A drops जनयति जययि। 2) B सुहृदः सखा। 3) B drops from मनसि to किम्भूतः। 4) B drops अपिशब्दोऽव्ययः। 5) B drops from वेदनां to हारावली। 6) A, B drop प्रतिमरूपकालङ्कारः। 7) मल्हाररागेण गीयते। 8) A, B रमणीय° 9) A चलिताधरे 10) B drops अर्थाल्ललाटे। उपमालङ्कारः 11) B drops हर्षितो। 12) B drops from अथवा to तस्मिन्। 13) A चलितो। 14) P's reading seems to be वारितो। A याचितो।

घनचयेत्यादि ।

घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने ।
कुरुबककुसुमं चपलासुषमं रतिपतिमृगकानने ॥२॥

कस्याश्चिद्गोपिकायाः केशपाशे चिकुरे कुरुवककुसुमं [1]आरक्तं झिण्टीकुसुमं रचयति निबध्नाति । '[2]सैरेयकस्तु झिण्टी स्यात्तस्मिन्कुरुबकोऽरुणे' [3]इत्यमरः । किम्भूतम् । चपलासुषमं चपलायाः विद्युत इव सुषमा शोभा यस्य तत्तथा । '[4]सुषमा परमा शोभा [शोभा] कान्तिर्द्युतिश्छविरित्यमरः । किम्भूते चिकुरे । घनचयरुचिरे [5]घनानां जलदानां चयो निकरः तद्वद् रुचिरो रमणीयः तस्मिन् । पुनः किम्भूते । रतिपतिमृगकानने । [6]रतिपतिर्मदन एव मृगः तस्य काननं क्रीडावनं तस्मिन् तथा । [पुनः किम्भूते । तरलिततरुणानने तरलितानि विलोकनेन चञ्चलीकृतानि तरुणानां यूनामाननानि मुखानि येन तादृशे]

घटयतीत्यादि ।

घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते ।
मणिसरममलं तारकपटलं नखपदशशिभूषिते ॥३॥

तथा कुचयुगगगने अमलं मणिसरं हारं घटयति योजयति । किम्भूतम् । तारकपटलमिव तारकाणां नक्षत्राणां पटलं समूहस्तमिव । कुचयोर्युगं युग्मं तदेव उच्चत्वाद्गगनम् आकाशं तस्मिन् । [7]आधारे सप्तमी । [8]पुनः किम्भूते । मृगमदरुचिरूषिते मृगमदः कस्तूरिका तस्य रुचिः कान्तिः तया रूषितं लिप्तं तस्मिन् । [9]अभिष्वङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियामित्यमरः । पुनः किम्भूते । सुघने सुष्ठु अतिशयेन घने निरन्तरे । अन्योन्यपीडनत्वात् अन्तरालरहिते । पुनः किम्भूते । नखपदशशिभूषिते नखपदं वक्रनखाघातस्थानलाञ्छनं चिह्नं तदेव शशी चन्द्रः तेन भूषितम् अलंकृतं तस्मिन् । गगनेऽपि शशी तारका जलदा भवन्ति । अत्र मुक्ताहारस्तारकाः, मृगमदः श्यामवर्णत्वाज्जलदः, नखपदमेव शशी । अनेनैव कुचयुगस्य गगनस्योपमा घटति, नान्यथा । [10]अत्र श्लेषोपमालङ्कारः ।

[11]जितबिसशकल इत्यादि ।

जितबिसशकले मृदुभुजयुगले करतलनलिनीदले ।
मरकतवलयं मधुकरनिचयं वितरति हिमशीतले ॥४॥

---

1) A आरक्तमिरी (?) कुसुमं । 2) A मैरेयकस्तु; B drops from सैरेयकस्तु to रित्यमरः । 3) P इत्यमरकोशः 4) B drops from सुषमा to रित्यमरः । 5) B घनानां नीलजलदानां यो निकरस्तद्वच्चिकुरो रमणीयस्तस्मिन् । 6) रतिपतिर्मृग इव मदनस्य काननं क्रीडास्थानं तस्मिन् । 7) P, B drop आधारे सप्तमी । 8) P drops from पुनः to लिप्तं तस्मिन् । 9) B drops this line । 10) B °स्थानं लांछनं । 11) B drops this line.

तथा मृदुभुजयुगले कोमलतरबाहुद्वये[1] मरकतमणिरचितं वलयं कङ्कणं वितरति सञ्चारयति। [2]मृदू च तौ भुजौ च तयोर्युगलं तस्मिन्। मरकतेन मणिना निर्मितं यद्वलयं तद् मरकतवलयम्। किम्भूतम्। मधुकरनिचयम् मधुकराणां [3]भ्रमराणां निचय इव तन्मधुकरनिचयम्। किम्भूते । जितबिसशकले जितं बिसशकलं मृणालखण्डं येन तत्तथा तस्मिन् । मृणालादपि कोमलतरे इत्यर्थः । किम्भूते । करतलनलिनीदले करतले [4]करावेव नलिनीदले यस्मिन् तत्तथा तस्मिन्। [5]नलिनी पद्मिनी पद्मपुष्पव्योमसत्त्वे सरोवरे हस्त आतपत्रे च कथ्यते । इति विश्वलोचनः। अत्र हस्तोपमावशात् नलिनीदलं पुष्पं गृह्यते न तु पर्णम्। अष्टदलमिति [6]पद्मे प्रसिद्धिः। लोकोपचाराद्[7] ग्रहणसिद्धिः। यथा [8]हरीतक्यः फलानीति। तथा च पद्मपुराणे—[9]पाथोजपत्रायतलोचनो युवा इति महर्षिप्रणीतः पाठः। पुनः किम्भूते। हिमशीतले हिमवत् शीतलं यत् तत्तथा तस्मिन् । प्रेयसीगात्रसुखस्पर्शत्वाच्छीतलम् । 'तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गका' इत्यमरः। मधुकरनिचयं जलनलिनीभ्रमरसंयोगः [10]स्वरूपकालङ्कारः ।

रतिगृहजघन इत्यादि ।

रतिगृहजघने विपुलापघने मनसिजकनकासने ।
मणिमयरसनं तोरणहसनं विकिरति कृतवासने ॥५॥

रतिगृहजघने मणिमयरसनं विकिरति घटयति रतेः रतिसंज्ञकाङ्गनायाः गृहं सद्म च जघनं चेति तस्मिन्। मणिमयेन रत्नमालया युक्तं रसनं च तत्। किम्भूतम्। तोरणहसनम्। [11]तोरणस्य हसनं उपहासो येन स तथा तत् । अथवा । मणिमयं प्रचुरमणिनिर्मितम्। किम्भूते जघने । विपुलापघने । विपुला बृहत्तरा अपघना अवयवा यस्य स तथा तस्मिन्।

[12]अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरम् ।
गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥ इत्यमरः ।

पुनः किम्भूते । मनसिजकनकासने मनसिजस्य कामस्य कनकासनं सुवर्णमयसिंहासनं तस्मिन्। पुनः किम्भूते। कृतवासने कृतः वासनो वासः धूपादिकसौगन्ध्यविशेषो यस्य स तथा तस्मिन्। अथवा तरुणजनैः कृता वासना वाञ्छा यस्मिन् स तथा तस्मिन् ।

चरणकिसलय इत्यादि ।

चरणकिसलये कमलानिलये नखमणिगणपूजिते ।
बहिरपवरणं यावकभरणं जनयति हृदि योजिते ॥६॥

---

1) B °युगले। 2) P drops मृदू च तौ भुजौ च । 3) B drops भ्रमराणां। 4) B drops करावेव। 5) B drops from नलिनी to °लोचनः । 6) B पाठभेदः प्रसिद्धः। 7) B ग्रहणसंधिः 8) A हारीतक्यः; B हरितक्यं। 9) P पयोज°। 10) B स्वरूपालङ्कारः । 11) B तोरणानां हसनं। 12) B drops from अङ्ग to इत्यमरः ।

चरणकिसलये यावकभरणं जनयति [1]उत्पादयति। चरणमेव किसलयं नवपल्लवतुल्यं तस्मिन्। यावकस्य अलक्तकस्याभरणं तत् किम्भूतम्। बहिरप[9]-वरणम् वरणस्य बहिः। अपवृणोतीति आच्छादयतीति अपवरणं तत्। किम्भूते। नखमणिगण[2]पूजिते नखा एव मणयो रत्नानि तेषां गणः समूहः तेन पूजितं अलंकृतम् तस्मिन्। पुनः किम्भूते। हृदि योजिते हृदये संनिहिते।

रमयतीत्यादि।

> [3]रमयति सुदृशं कामपि सदृशं खलु हलधरसोदरे।
> किमफलम[4]वशं चिरमिह विरसं वद सखि विटपोदरे ॥७॥

हे सखि इह विटपोदरे शाखालतावृतकुञ्जाभ्यन्तरे अवशं परवशं निष्फलं [विरसम्] उद्वेगकरं यथा स्यात् तथा चिरं किं विलम्बः। किमिति त्वं वद। कस्मिन् सति। हलधरसोदरे बलदेवानुजे कृष्णे खलु निश्चितं सदृशं स्वयोग्यं यथा स्यात् तथा कामप्यङ्गनां रमयति सति। किम्भूताम्। सुदृशं शोभने दृशौ लोचने यस्याः सा तथा ताम्।

इह रसभणन इत्यादि।

> इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके।
> कलियुगचरितं न [5]वसतु दुरितं कविनृपजयदेवके ॥८॥

इह कविनृपजयदेवके किमपि दुरितं पापं न विशतु। अथवा न वसतु। न तिष्ठतु। न प्रवेशं करोतु। किम्भूतम्। कलियुगचरितं [6]कलियुगस्य चरितं कलिहेतुकमित्यर्थः। कवीनां नृपः कविचक्रवर्ती स चासौ जयदेवश्च तस्मिन्। किंलक्षणे। कृतहरिगुणने कृतं हरिगुणनं हरिसंकीर्तनं येन सः तस्मिन्। [7]कुत्र संकीर्तनं कृतम्। इह। गीते। रसभणने रसस्य शृङ्गारस्य भणनं यस्मिन् तत्तथा तस्मिन्। पुनः किम्भूते जयदेवके। मधुरिपुपदसेवके मधुरिपोः श्रीकृष्णस्य पदसेवकोऽत्यन्तभक्तस्तस्मिन्। दुःखेन दुःखितां समागतां दूतीं प्रति राधा प्राह।

नायात इत्यादि।

> नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे
> स्वच्छन्दं बहुवल्लभः स रमते किं तत्र ते दूषणम्।
> पश्याद्य प्रियसङ्गमाय दयितस्याकृष्यमाणं गुणै-
> रुत्कण्ठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति ॥९॥

हे सखि दूति शठो धूर्तो मन्दो यदि नायातो नागतः। किम्भूतः। निर्दयः निर्गता दया कृपा यस्मात् स तथा। तर्हि किमर्थं त्वं दूयसे परितापं कुरुषे। [8]अनागमने हेतुमाह। स श्रीकृष्णः स्वच्छन्दं स्वेच्छया यथा भवति तथा रमते विहरति।

---

1) P drops उत्पादयति। 2) A °पूजितेऽलंकृते पुनः हृदि योजिते। 3) A रमयति सदृशं कामपि सुदृशं। 4) A °मवसं। 5) A विशतु। 6) P drops कलियुगस्य चरितं। 7) B drops कुत्र to कृतम्। 8) B अनागमनहेतु°।

किम्भूतः। बहुवल्लभः बहूनां नारीणां वल्लभः प्रियः। अथवा। बहवो वल्लभा यस्य स बहुवल्लभः। [1]सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। यथा [2]दीर्घजङ्घाः[?]। तत्र तस्मिन् विषये ते तव दूषणं किम्। ननु प्रस्तुते किं कर्तव्यमित्याह। यदीदानीमेव मदीयं चेतः प्रियसङ्गमाय स्वयं यास्यति। प्रियस्य सङ्गमः प्रियसङ्गमः तस्मै। इति त्वं अद्यैव पश्य अवलोकय। कथम्। स्फुटम्। सत्यम्। कस्मादिव। उत्कण्ठार्तिभरादिव। पूर्वानुभूतसुखस्मरणमुत्कण्ठा, तस्या आर्तिः पीडा, तस्या भरः दुःखातिशयहेतुः तस्मादिव। किम्भूतं चेतः। तस्य श्रीकृष्णस्य दयितस्य गुणगणैः आकृष्यमाणम्। पुनः किम्भूतम्। स्फुटदिव। विदीर्यदिव। अन्योऽपि गुणगणैः रज्जुसमूहैः आकृष्यमाणोऽपि परवशमायाति।

अनिलतरलेत्यादि।

[3]देशाखरागे गौडीवामठताले।

अनिलतरलकुवलयनयनेन।
तपति न सा किसलयशयनेन॥
सखि या रमिता वनमालिना। ध्रुवपदम्॥१॥

हे सखि वनमालिना माधवेन या नारी रमिता संभोगिता सा किसलयशयनेन नवपल्लवशय्यया करणभूतेन न तपति न मुह्यति। रमितेति सर्वपदे योजनीयम्। किम्भूतेन वनमालिना। अनिलतरलकुवलयनयनेन। अनिलेन वायुना [4]तरलं यत्कुवलयं नीलोत्पलं तद्वन्नयने यस्य स तथा तेन।

विकसितेत्यादि।

विकसितसरसिजललितमुखेन।
स्फुटति न सा मनसिजविशिखेन॥२॥

या रमिता सा न स्फुटति न भिद्यते। मनसिजविशिखेन। [5]मनसि अधिकरणे जायत इति मनसिजा मारः, अलुप्तसप्तमीसमासः, तस्य विशिखो बाणस्तेन वनमालिना, किम्भूतेन। विकसितसरसिजललितमुखेन विकसितं च तत्सरसिजं चेति तद्वल्ललितं सुन्दरं मुखं यस्य स तथा तेन।

अमृतेत्यादि।

अमृतमधुरमृदुतरवचनेन।
ज्वलति न सा मलयजपवनेन॥३॥

या रमिता सा न ज्वलति परितापं न प्राप्नोति। केन। मलयजपवनेन मलयजस्य चन्दनस्य पवनस्तेन। [6]अथवा मलयजस्य चन्दनस्य रचनं लेपनं तेन।

---

1) B सर्वनाम्नो वृत्तिमात्रे पुर्वद्भावः (?)। 2) A (? दीर्घजङ्घः। 3) p मालवगौडारागे; B दोषाखरागेण गीयते। एकतालीताले। अत्राप्युत्कण्ठितैव नायिका। 4) B तरलं चञ्चलम्। 5) B मनसिजस्य कामस्य विशिखो बाणस्तेन। 6) A, B drop अथवा to लेपनं तेन।

वनमालिना । किम्भूतेन । अमृतमधुरमृदुतरवचनेन अमृतवद् मधुरं सरसं तद्मृदुतरं कोमलतरं च, अमृतमधुरं मृदुतरं वचनं यस्य स तथा तेन । [1]प्रकृष्टार्थे तरतमौ प्रत्ययौ भवतः ।

स्थलजलेत्यादि ।

स्थलजलरुहरुचिकरचरणेन ।
[2]लुंठति न सा हिमकरकरणेन ॥४॥

[3]या रमिता सा न लुठति । केन । हिमकरकिरणेन हिमकरस्य चन्द्रस्य [4]किरणाः अंशवः तेन । अथवा [5]हिमवत् शीतलाः कराः किरणा यस्य स तथा तेन । वनमालिना किम्भूतेन । [6]स्थलजलरुहरुचिकरचरणेन स्थले यज्जलरुहं करौ च चरणौ च करचरणौ स्थलजलरुहस्य रुचिः शोभा तद्वत्करचरणौ हस्तपादौ यस्य स तथा तेन । [7]अथवा भूमिस्थितौ चरणौ स्थलपद्मवद्भासेते करचरणौ जलजवदित्यर्थः ।

सजलेत्यादि ।

सजलजलदसमुदयरुचिरेण ।
[8]दलति न सा हृदि चिरविरहेण ॥५॥

या रमिता सा हृदि हृदये न [9]दलति । न विदीर्यते । केन । चिरविरहेण । चिरं [10]बहुकालं विरहस्तेन । किम्भूतेन वनमालिना । सजलजलदसमुदयरुचिरेण । जलेन सह वर्तन्त इति सजला [11]नवीनाश्च ते जलदाश्च तेषां समुदयः [12]समूहः तद्वद् रुचिरस्तेन ।

कनकेत्यादि ।

कनक[13]निचयरुचिशुचिवसनेन ।
श्वसिति न सा परिजनह[14]सनेन ॥६॥

या रमिता सा न श्वसिति न निःश्वासं तनोति । केन । परिजनहसितेन परिजनः [15]सेवकसखीजनः तस्य हसितमुपहसितं तेन । वनमालिना किम्भूतेन । कनकनिचयरुचिशुचिवसनेन । कनकस्य सुवर्णस्य निचयो निकरः तस्य रुचिः तद्वत् शुचि निर्मलं शुद्धं वसनं वस्त्रं यस्य स तथा तेन ।

---

1) B drops this line. । 2) B दहति । 3) P या रमिता सा लुठति; A तथा या रमिता सा न लुठति । B या वनमालिना रमिता सा न लुठति । न दहति । 4) A किरणोंऽशुस्तेन । 5) B हिमाः शीतलाः । 6) A स्थलजलरुहं स्थलकमलं तस्येव रुचिर्येषां ते तादृशाः करचरणा यस्येति समासं केचिदवैयाकरणा जगदुः । वयं तु करौ चतुर्भुजाभिप्रायेण कराश्च चरणौ च करचरणं "द्वन्द्वश्च प्राणितूर्यसेनाम् (पाणिनि २।४।२।) इति प्राण्यङ्गत्वादेकवद्भावः । स्थलजलरुहस्येव रुचिर्यस्य तच्च तेन । 7) A drops from अथवा to °दित्यर्थः । 8) A दहति न सा हृदि विरहभरेण । 9) B दहति । 10) B चिरकालं । 11) B नवाश्च । 12) समुदायः । 13) A °निकर; B निकष । 14) B हसितेन । 15) A drops सेवक ।

सकलभुवनेत्यादि ।

सकलभुवनजनवरतरुणेन ।
वहति न सा रुजमतिकरुणेन ॥७॥

या रमिता [1]सा रुजं न वहति। केन। अतिशयकरुणेन अतिशयेन करुणं करुणायुष्यं तेन। अथवा अतिकरुणेन अधिकं करुणस्तेन। वनमालिना किम्भूतेन। सकलभुवनजनवरतरुणेन सकलानि च भुवनानि चेति समस्तानि विश्वानि च तेषु ये जनास्तेषां मध्ये वरः श्रेष्ठः स चासौ तरुणश्चेति तेन। [2]निर्धारणे षष्ठी। समासो बहुव्रीहिः ( ? कर्मधारयः )। अनेन किमुक्तम्। या वरतरुणी स्वामिना सार्धमहर्निशं सुरतसुखमनुभवति सा पतिरहितानां विरहिणीनां दुःखं कामपीडादिकं न जानातीत्यर्थः ।

प्रविशतीत्यादि ( ? प्रविशतु इत्यादि ) ।

[3]प्रविशतु हरिरपि हृदयमनेन ।
श्रीजयदेवभणित[4]वचनेन ॥८॥

अनेन गीतादिप्रबन्धमन्त्रेण वनमाली हरिः श्रीकृष्णः हृदयं प्रविशतु दृग्गोचरो भवतु। अनेन केन। श्रीजयदेवभणितवचनेन। सर्वगामित्वाल्लोकानां हृदयस्थितो [5]भवत्वित्यर्थः। अत्रान्तरे मलयानिलेन पीडिता सती राधा तं पवनं प्रत्याह।

मनोभवेत्यादि ।

मनोभवानन्दन चन्दनानिल प्रसीद रे दक्षिण मुञ्च वामताम् ।
क्षणं जगत्प्राण [6]विधाय माधवं पुरो मम प्राणहरो भविष्यसि ॥७॥

हे चन्दनानिल मलयजपवन। सम्बोधने। किम्भूत। मनोभवानन्दन मनसि भवतीति मनोभवः कन्दर्पः तम् आनन्दयतीति तथा सः तस्य सम्बोधनम्। हे मनोभवानन्दन [7]वामतां वक्रभावं मुञ्च, जहीहि। न केवलं वामतां वक्रतां मुञ्च, पुरोऽग्रे माधवं श्रीकृष्णं विधाय कृत्वा क्षणं प्रसीद, [8]क्षणमात्रं प्रसन्नो भव, [9]अनुकूलो भव। तत्रान्तर्गर्भितं हेतुमाह। हे दक्षिण शुभाचार उत्तम। जगत्प्राण जगतो विश्वस्य प्राणभूत। पश्चात् मम दुःखितायाः संतप्तायाः

1) A न सा रुजं वहति। 2) A निर्धारणे षष्ठी समासः। B drops from निर्धारणे to बहुव्रीहिः।

3) A, B श्रीजयदेवभणितवचनेन ।
प्रविशतु हरिरपि हृदयमनेन ॥

4) P °मिलनेन, but in the commentary it reads वचनेन। 5) A भवतीत्यन्वयः। 6) A निधाय। 7) B adds कामसखे। 8) A drops क्षणमात्रं प्रसन्नो भव; B drops क्षणमात्रं। 9) B drops अनुकूलो भव।

प्राणहरो भविष्यसि। अनेन किमुक्तम्। स्वशरीरे अनादरपरा वैराग्यभावं दर्शयतीत्यर्थः। राधा स्वमनोगतमाह।

रिपुरिवेत्यादि।

रिपुरिव सखीसंवासोऽयं शिखीव हिमानिलो
विषमिव सुधारश्मिर्यस्मिन् दुनोति मनोगते।
हृदयमदये तस्मिन्नेव पुनर्वलते बलात्
कुवलयदृशां वामः कामो निकामनिरङ्कुशः ॥८॥

यस्मिन् श्रीकृष्णे मनोगते सति मनसि [1]स्मृते सति। अयं सखीसंवासः सखीजन[2]सङ्ग; रिपुरिव शत्रुरिव, हृदयं दुनोति परितापयति। न केवलं सखीसंवासो दुनोति। हिमानिलोऽपि शीतलपवनोऽपि शिखीव अग्निरिव। [3]न केवलं हिमानिलः शिखीव। सुधारश्मिरमृतमयश्चन्द्रोऽपि विषमिव। तस्मिन्नेवादये निर्दये श्रीकृष्णे पुनर्बलात् कामो [4]वलते वर्धते। कासाम्। कुवलय[5]दृशां कुवलयवद् दृशो नयनानि यासां तास्तथा तासाम्। कामिनीनां मते कामो वामः निकामनिरङ्कुशः निकाममतिशयेन निरङ्कुशः उत्कटः। अत एव वामः वक्रस्वभावः। [6]दक्षिणो न भवतीत्यर्थः।

बाधामित्यादि।

बाधां विधेहि मलयानिल पञ्चबाण
प्राणान् गृहाण न गृहं पुनराश्रयिष्ये।
किं ते कृतान्तभगिनि क्षमया तरङ्गै-
रङ्गानि सिञ्च मम शाम्यतु देहदाहः ॥९॥

इति श्रीगीतगोविन्दे विप्रलब्धावर्णने
नागरनारायणो नाम सप्तमः सर्गः।

हे मलयानिल श्रीखण्डाचलसमीर त्वं बाधां पीडां विधेहि कुरु। हे पञ्चबाण कन्दर्प त्वं प्राणान् गृहाण। अहं पुनः पुनरपि गृहं नाश्रयिष्ये [7]न गमिष्यामि। हे कृतान्तभगिनि यमस्वसः। हे त्वं निर्दये यमुने। तव क्षमया निश्चलभावेन किम्। भ्रातुः स्वरूपं धर्मं मा कुरु। यतस्त्वं नारीणाम् अनङ्गजं दुःखं जानासीति। [8]स्त्रीस्वभावत्वात्। यमुना यद्येवं पृच्छति 'मया तुभ्यं किं करणीयम्[9]। प्रयोजनं वदोपालम्भनस्य। तत्राह। ममाङ्गानि गात्राणि तरङ्गैः स्व-

1) B स्मरति। 2) B °सङ्गः 3) B drops from न केवलं to विषमिव। 4) P drops वलते। 5) B °दृशो। नयनानि यासां तथा तासां ताः। कामिनीमते कामो वामं। 6) B drops this line.। 7) B नागमिष्यामि। 8) A स्त्रीत्वात्; B स्त्रीस्वभावात्। 9) A adds इति after करणीयम्।

वीचिभिः सिञ्च [1]सेचय। किमर्थं तदाह । ममायं देहदाहः शरीरतापः शाम्यतु शान्तिमुपशमं यातु। स्वास्थ्यं भजतामित्यर्थः ।[2]

[3]इति गीतगोविन्दटीकायां नागरश्चतुरो नारायणो

नाम सप्तमः सर्गः ।

---

1) A drops सेचय। 2) B adds the following stanza;

सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादरा-
दानम्रैर्मुकुटेन्द्रनीलमणिभिः संदर्शितेन्दिन्दिरम् ।
स्वच्छन्दं मकरन्दसुन्दरमिलन्मन्दाकिनीमेदुरं
श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे ॥

3) P इति गीतगोविन्दटीकायां नागरश्चतुरो नारायणो....
A इति श्रीगीतगोविन्दटीकायां अनागतनारायणो.......
B इति श्रीगीतगोविन्दे महाकाव्ये जयदेवकृतौ टीकायां प्रलम्भवर्णनो
( ? विप्रलम्भ° वर्णने नागरश्चतुरो नारायणो.... )

# अष्टमः सर्गः

## विलक्षलक्ष्मीपतिः ।

अथ कथमपीत्यादि ।

अथ कथमपि यामिनीं विनीय स्मरशरजर्जरितापि सा प्रभाते ।
अनुनयवचनं वदन्तमग्रे प्रणतमपि प्रियमाह साभ्यसूयम् ॥१॥

उत्तरगीतं श्लोकेनावतारयति । [1]अथानन्तरेत्यादि । अथानन्तरं सा राधा स्मरशरजर्जरिता कामबाणव्यथितापि[2] कथमपि [3]अतिक्लेशेन [4]यामिनीं निशां विनीय नीत्वा [ प्रभाते ] प्रातःकाले प्रातःसमये साभ्यसूयं अभ्यसूया सहितं यथा स्यात् तथा समागतं प्रियं प्रत्याह । किं कुर्वन्तम् । अग्रे वदन्तम् । कथं यथा स्यात् । [5]तथा अनुनय[6]विनयं यथा स्यात् । अनुनयाय परिसान्त्वनाय विनयो नम्रीभावो यस्मिन् कर्मणि तत्तथा । न केवलं वदन्तं प्रणतमपि नमस्कुर्वन्तमपि ।

[7]भैरवरागे यतिताले ।

रजनिजनितेत्यादि ।

रजनिजनितगुरुजागररागकषायितमलसनिवेशम् ।
वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम् ॥१॥
हरिहरि याहि माधव याहि केशव मा वद कैतववादम् ।
तामनुसर सरसीरुहलोचन या तव हरति विषादम् ॥ [8]ध्रुवपदम् ॥

राधा माधवं निर्भर्त्सयति । हे माधव लक्ष्मीपते [9]याहि गच्छ । [10]पुनरुक्तवचनं निरपेक्षात्र । हे केशव जलशायिन् याहि व्रज । ननु सत्यं ते । मयि कथमुपेत्यागत्य कैतववादं धूर्तानां [11]वचनं मा वद, मा ब्रूहि । हे सरसीरुहलोचन । चन्द्रवदना[12]वलोकनाक्षम । या नायिका तव विषादं खेदादिकं हरति निवारयति तामनुसर [13]तामनुगच्छ । ननु अधीरं तव धैर्यं यतस्त्वं [14]परप्रेमवशोऽसि ।

---

1) The text, however, opens with अथ कथमपि; the commentary on this verse commences in all the three MSS with अथानन्तरं । 2) B drops अपि । 3) B drops अति । 4) P,A निशां यामिनीं । 5) P drops तथा । 6) B °वचनं यथा स्यात् तथा । 7) मेघरागेण गीयते । B भैरवरागेण गीयते रूपकताले । 8) A इति ध्रुवपदम् । B ध्रुवपदमिदम् । 9) B याहि याहि । 10) P पुनरत्रवचनं निरपेक्षात्राह । B पुनरुक्तवचनं निरपेक्षते । 11) B वचः । 12) B °नालोकनाक्षाम । 13) B drops तामनुगच्छ । 14) B परम° ।

[1]तदाह। स्फुटं यथा स्यात्तथा तवेदं नयनं नेत्रम् अनुरागं प्रेमप्रमाणं वहति धारयति। किम्भूतं नयनम्। रजनिजनितगुरुजागररागकषायितम्। रजन्यां क्षपायां जनितः उत्पादितो गुरुर्गरिष्ठो जागरोऽत्यन्तनिद्राक्षयः तस्माद्रागो लौहित्यं तेन [2]कषायः [? कषायः तं] इतो यातो यस्मिन् तत्तथा। पुनः किम्भूतम्। अलसनि[3]मेषम्। अलसो मन्दीभूतो [4]निमेषो यस्मिन् तत्तथा। पुनः किम्भूतम्। उदितरसाभिनिवेशम् उदितः कथितः सूचितः रसस्य [5]शृङ्गारसुखस्य अभिनिवेश आसन्नोक्तिर्यस्मिन् तत्तथा। हरिहरिरिति विस्मये। [6]सान्त्वनार्थे वा।

कज्जलमलिनेत्यादि।

कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपम्।
दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपम् ॥२॥

किञ्च, हे कृष्ण तवारुणं बिम्बफलसदृशं दशनवसनं दन्तानामाच्छादनं अधरः तव शरीरस्य [7]अनुरूपं सादृश्यं तनोति। किम्भूतं दशनवसनम्। कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपम्। कज्जलेन मलिने ये विलोचने तयोश्चुम्बनं तेन विरचितं नीलिमरूपं यस्मिन् तत्तथा।

वपुरनुहरतीत्यादि।

वपुरनुहरति तव स्मरसङ्गरखरनखरक्षतरेखम्।
मरकतशकलकलितकलधौतलिपेरिव रतिजयलेखम् ॥३॥

किञ्च, हे कृष्ण। तवेदं वपुः शरीरं रतिजयलेखं रतेर्जयपत्रमनुहरति, तत्सदृशं दृश्यते। कुतः। स्मरसङ्गरखरनखरक्षतरेखम्। खराश्च ते तीक्ष्णा नखराः तैः क्षतानि व्रणानि। स्मरस्य सङ्गरे कामसमरे नखक्षतानि यस्मिन् तत्तथा तत्। कस्य च तुल्यम्। मरकतशकलकलितकलधौतलिपेरिव मरकतस्य शकलं खण्डं तत्र कलिता लिखिता चासौ कलधौतस्य सुवर्णस्य [8]लिपिः तस्याः लेखा तस्या इव। किम्भूतं वपुः। [9]स्मरसङ्गरखरनखरक्षतरेखम्।

चरणेत्यादि।

चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारम्।
दर्शयतीव बहिर्मदनद्रुमनवकिशलयपरिवारम् ॥४॥

[10]इदं तव हृदयमुदारं यथार्थं तत्रान्तःस्थितमदनद्रुमनवकिशलयपरिवारं कन्दर्पतरुनवीनपल्लववृन्दं बहिर्दर्शयतीव। [11]उत्प्रेक्ष्यते। परिवारं परिच्छदं च। किम्भूतम्। चरणकमलगलदलक्तकसिक्तं[12] तत्तथा।

---

1) B वद। आह। 2) A, B कषायितो यस्मिन् तत्तथा। 3) B °निवेशं। 4) B निवेशो। 5) B स्मरसुखस्य। 6) A drops सांत्वार्थे वा; B शान्त्यर्थे वा। 7) B drops अनुरूपं। 8) A लिपिर्लेखा तस्याः इव। 9) A drops स्मर...रेखम्। 10) B adds किञ्च। 11) A drops उत्प्रेक्ष्यते। 12) A adds चरणकमलाभ्यां गलंश्चासौ अलक्तकश्च तेन सिक्तं।

दशनेत्यादि ।

दशनपदं भवदधरगतं मम जनयति चेतसि खेदम् ।
कथयति कथमधुनापि मया सह तव वपुरेतदभेदम् ॥५॥

किञ्च । हे माधव । दशनपदं दयितायाः [1]दन्ताघातस्थानम् [2] खेदं जनयति दुःखं रचयति । किम्भूतम् । भवदधरगतं भवतः अधरः ओष्ठः तत्र गतं वर्तमानमित्यर्थः । कस्याः । मम । आवयोरभेदभावस्तत्राह । अधुना इदानीमपि तव वपुः शरी मया सह अभेदम् एकत्वं कथयति दर्शयति । किम्भूतं वपुरेतत् एतादृशं विकृतम् । [3]तव वपुरेवंभूतं विकृतं विकारयुक्तम् । तस्मादधुनापि मया सह अभेदं कथयति । मह्यं तव [4]विपरीतभावं न गोपयतीत्यर्थः ।

बहिरिवेत्यादि ।

बहिरिव मलिनतरं तव कृष्ण मनोऽपि भविष्यति नूनम् ।
कथमथ वञ्चयसे जनमनुगतमसमशरज्वरदूनम् ॥६॥

हे कृष्ण । नूनमिति निश्चयेन । [5]तवेदं मनोऽपि मलिनतरम् अतिशयेन मलिनं कज्जलाभमशुद्धं भविष्यति । किमिव । बहिरिव । त्वग्गतशरीरमिव । परबुद्धेरप्रत्यक्षत्वात् कथं जानासि त्वं तत्राह । अथ अन्यथा अनुगतम् अनन्यशरणं जनं कथं वञ्चयसे[6] प्रतारयसि । किम्भूतं जनम् । असमशरज्वरदूनं असमाः पञ्च बाणा यस्य स तथा कामः, तस्मात् ज्वरस्तेन दूनं दुःखितम् ।

भ्रमतीत्यादि ।

भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रम् ।
प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रम् ॥७॥

अन्यच्च । भवान् वनेषु [7]भ्रमति:व्रजति । किमर्थम् । अबलाकवलाय अबला [8]युवत्यः तासां कवलो ग्रसनं;तस्मै । [9]तादर्थ्ये चतुर्थी । स्त्रीभक्षणाय वनेषु भ्रमति अत्रास्मिन्नर्थे विचित्रमाश्चर्यं किं तदाह । वधूवधनिर्दयबालचरित्रं वधूनाम् [10]अबलानां वधो मारणम् वधू[11]वधानिर्दयं दयारहितं बालचरित्रं चेति तत् ।

श्रीजयदेवेत्यादि ।

श्रीजयदेवभणितरतिवञ्चितखण्डितयुवतिविलापम् ।
शृणुत सुधामधुरं विबुधा विबुधालयतोऽपि दुरापम् ॥८॥

हे विबुधाः विद्वांसः [12]यूयं शृणुत । [13]कम् । श्रीजयदेवभणितरतिवञ्चित-

---

1) B दन्तघातपदस्थानम् । 2) P खेदं रचयति दुःखं जनयति । A खेदं दुःखं जनयतीति । 3) B drops तव to विकृतं । 4) B अभेदभावं । 5) B तव मनोऽपि इदं । 6) A drops प्रतारयसि । 7) B व्रजति, भ्रमति । 8) B युवतयः । 9) B drops तादर्थ्ये चतुर्थी । 10) B drops अबलानां । 11) B °वधे निर्दयं । 12) B drops यूयं । 13) B किम् ।

खण्डितयुवतिविलापम्। [1]रतिवञ्चिता खण्डिता चासौ युवतिश्चेति [2]राधा। तस्याः विलापः परिदेवनम्। श्रीजयदेवभणितं च रतिवञ्चितखण्डितयुवति विलापश्चेति। तम्। किम्भूतम्। [3]सुधामधुरं सुधावन्मधुरस्तम्। श्रवणसाख्यकरम्। [4]गीतं संक्षिप्याह।

तवेदमित्यादि।

[5]तवेदं पश्यन्त्याः प्रसरदनुरागं बहिरिव
प्रियापादालक्तच्छुरितमरुणच्छा[6]यहृदयम्।
ममाद्य प्रख्यातप्रणयभरभङ्गेन कितव
त्वदालोकः[7] शोकादपि किमपि लज्जां जनयति ॥२॥

इति श्रीगीतगोविन्दे खण्डितावर्णने
**विलक्षलक्ष्मीपतिर्नाम** अष्टमः सर्गः।

[8]राधा वदति। हे कितव धूर्त कपटिन् त्वदालोकः तवेदृशस्य विकृतं दर्शनं ममाद्य किमप्यनिर्वचनीयं यथा स्यात्तथा लज्जां जनयति। न केवलं त्वदालोकः स्वरूपेण लज्जां जनयति। शोकादपि। न केवलं शोको लोकनादपि प्रख्यातप्रणयभरभङ्गेनापि प्रणयस्य प्रीतेः भरः आधिक्यं तस्य भङ्गः नाशः प्रख्यातश्चासौ प्रणयभरभङ्गश्चेति तेन। किम्भूतायाः मम। [9]तवेदं अरुणच्छायं हृदयं पश्यन्त्याः। अरुणच्छायं शोणकान्ति। किम्भूतम्। प्रियापादालक्तच्छुरितं [10]प्रियायाः वल्लभायाः पादस्तस्य अलक्तकस्तेन छुरितं युक्तम्। किम्भूतमिव। [11]अन्तः अभ्यन्तरे स्थितं बहिः प्रसरदनुरागमिव। प्रसरदनुरागो यस्मात्तत्तथा। विरुद्धतया लक्षित इति विलक्षः एवंभूतो लक्ष्मीपतिः वर्णितो यत्रेति।

इति श्रीगीतगोविन्दटीकायां खण्डितावर्णने
**विलक्षलक्ष्मीपतिर्नाम** अष्टमः सर्गः।

---

1) A drops from रति to विलापश्चेति। तम्। but adds सुगममेतत्। 2) B drops राधा। 3) B drops सुधामधुरम्। 4) A drops this line; B adds it at the opening of the next verse। 5) A,B तदेवं। 6) A,B °द्योति° 7) A leaves out the words after त्वदालोकः in the verse and the words before त्वदालोकः स्वरूपेण in the gloss। 8) B drops राधा वदति। 9) B adds प्रणयभरभङ्गनिश्चयः कथं तदाह। before तवेदं। 10) B drops from प्रियायाः to युक्तम्। 11) A अन्तरेऽभ्यन्तरे; B drops अन्तः।

# नवमः सर्गः

## मुग्धमुकुन्दः ।

तामित्यादि ।

[1]तामथ मन्मथखिन्नां रतिरभसभिन्नां विषादसंपन्नाम् ।
अनुचिन्तितहरिचरितां कलहान्तरितामुवाच रहः[2] सखी ॥१॥

अथानन्तरं तां[3] राधां प्रति सखी उवाच । किम्भूताम् । मन्मथखिन्नां मनो मथ्नाति क्षोभयतीति मन्मथा मारः तेन खिन्नां खेदयुक्ताम् । पुनः किम्भूताम् । रतिरसभिन्नां रतेः रसः सुरतसुखं तस्माद् भिन्ना अन्तरिता ताम् । [4]पुनः किम्भूताम् । कलहान्तरितां कलहेन विवादेन हरेः अन्तरिता ताम् । किमुवाचेत्याशङ्क्याह ।

[5]गुर्जरीरागे यतिताले ।

[6]हरिरभिसरतीत्यादि ।

[7]हरिरभिसरति वहति मधुपवने ।
किमपरमधिकसुखं सखि भुवने ॥१॥
माधवे मा कुरु मानिनि मानमये ॥ ध्रुवपदम् ॥

सखी वदति । अये सखि राधे । माधवे मानं मा कुरु । यतो हरिरभिसरति । [8]त्वत्सङ्गमं वाञ्छति । [9]स्वप्रेयसीनां कामव्यथां हरतीति हरिः । कस्मिन् सति । मधुपवने वहति सति । मधोर्वसन्तस्य पवनः तस्मिन् । [10]अभिसरतु नाम, ततः किं फलं, तदाह । हरेरभिसरणजातं अधिकम् अपरं सुखं [11]भुवने किं वाञ्छसि ।

तालफलेत्यादि ।

तालफलादपि गुरुमतिसरसम् ।
किं विफलीकुरुषे कुचकलशम् ॥२॥

---

1) B अथ तां । 2) P, A drop रहः । 3) A, B drop तां । 4) A अनु पश्चाच्चिन्तितं हरेश्चरितं यया तां कलहान्तरितां कलहे विवादे अन्तरिताम् । B पुनः कथंभूताम् । अनुचिन्तितहरिचरिताम् । अनु पश्चाच्चिन्तितं हरेश्चरितं यया सा ताम् । किमुवाचेत्याशङ्क्याह । 5) P गूर्ज्जरीरागे यतिताले; A गुजरीरागे; B गुर्ज्जरीरागेण गीयते रूपकताले । अत्र कलहान्तरिता नायिका । 6) हरिरनुसरतीत्यादि B हरिरभिसरतीति । 7) P हरिरुपसरति । 8) B तत्सङ्गमं । 9) B drops from स्व° to हरिः । 10) B drops from अभिसरतु to तदाह । 11) A, B भवने ।

किञ्च। कुचकलशं किं विफलीकुरुषे किं निष्फलं करोषि। किम्भूतम्। तालफलादपि अधिकं गुरुम्। पुनः किम्भूतम्। अतिसरसं सह रसेन वर्तते इति [1]सरसम्। [2]आलिङ्गनादतिसुखसाधनमित्यर्थः।

कति नेत्यादि।

कति न कथितमिदमनुपदमचिरम्।
मा परिहर हरिमतिशयरुचिरम् ॥३॥

किञ्च। [3]अनुपदं प्रतिपदं प्रतिक्षणम् अविलम्बं यथा स्यात्तथा [4]कतिवारं इदं मया [4]न कथितम्। इदमिति किम्। हरिं मा परिहर। किम्भूतम्। अतिशयरुचिरो लावण्यगुणयुक्तस्तम्।

किमितीत्यादि।

किमिति विषीदसि रोदिषि विकला।
विहसति युवतिसभा तव सकला ॥४॥

हे राधे त्वं विलासिनी। किमिति विषीदसि। खेदं कुरुषे। विकला सती किमिति रोदिषि। तवेयं युवतिसभा [5]सखीसभा सकलाऽपि त्वां विहसति [6]उपहसति।

[7]सजलेत्यादि।

[8]सजलनलिनीदलशीतलशयने।
हरिमवलोकय सफलय नयने ॥५॥

हे राधे सखि। इह [9]सजलनलिनीदलशीतलशयने हरिमवलोकय शीतलशय्यायामुपविश्य [10]हरिमवलोक्य नयने द्वे सफलय। नयनग्रहणस्यार्थं सार्थकं कुरु।

जनयसीत्यादि।

जनयसि मनसि किमिति गुरुखेदम्।
शृणु मम वचनमनीहितभेदम् ॥६॥

किञ्च। मनसि [11]स्वान्ते। बहुतरं खेदं किमिति जनयसि। किम्भूतं खेदम्। गुरु गरिष्ठम्। तर्हि किं [12]करोमि तत्राह। त्वं मम वचनं शृणु। किम्भूतम्। [13]अनीहितभेदं न ईहितः भेदो यत्र तत्तथा। हितकारकमित्यर्थः। [14]ननु त्वद्वचनेनापि हरिं न व्रजामि। तत्राह।

1) P अतिसरसं। 2) B drops from आलिङ्गना° to मित्यर्थः। 3) B प्रतिपदम् अनुपदम् अनुक्षणं अविलं (बं)। 4) B drops न। 5) B हरिमतिशयरुचिरम्। अतिशयरुचिरो....। 6) B drops सखीसभा। 7) B drops उपहसति। 8) B मृदुनलिनी°। 9) B मृदुनलिनीति। 10) B हरिमवलोक्य नयने द्वे सफलय नयनद्वयस्य अर्थं सार्थकं कुरु। 11) A चित्ते। 12) B करोमीत्याह। 13) A 'समीहितम्। सम्यक् प्रकारेण विहितभेदो यत्र तत्तथा।' 14) B drops from ननु to तत्राह।

हरिरित्यादि ।

हरिरुपयातु[1] वदतु बहु मधुरम् ।
किमिति करोषि हृदयमतिविधुरम् ॥७॥

[2]हरिरुपयातु हरिः समीपं गच्छतु यातु । बहु अनेकप्रकारं यथा स्यात्तथा मधुरं कोमलवचनं वदतु । हृदयमतिविधुरं दुःखितं किमिति करोषि । [3]नैतत् कर्तव्यम् । तव [4]सपत्नीजनः सकामो भविष्यतीति ज्ञात्वा माधवं भजस्व ।

श्रीजयदेवेत्यादि ।

श्रीजयदेवभणितमतिललितम् ।
सुखयतु रसिकजनं हरिचरितम् ॥८॥

श्रीजयदेवभणितं हरिचरितं सुखयतु सुखिनं करोतु । कम् । रसिकजनं रसिकश्चासौ जनश्चेति तम् । किम्भूतं हरिचरितम् । अतिललितम् अतिशयेन [5]रुचिरं [6]सुन्दरमित्यर्थः । स्ववचनाकरणैः कुपिता [7]सती राधिकां प्रति पुनराह ।

स्निग्धेत्यादि ।

स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि
द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन् प्रिये ।
युक्तं[8] तत् विपरीतकारिणि तव श्रीखण्डचर्चा विषं
शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः ॥२॥

इति श्रीगीतगोविन्दे कलहान्तरितावर्णने
मुग्धमुकुन्दो नाम नवमः सर्गः ।

हे विपरीतकारिणि । विपरीतं प्रतिकूलं कर्तुं शीलं स्वभावो यस्याः सा तस्याः संबोधने हे विपरीतकारिणि राधे । विपरीतकारित्वं [9]कथं त्वया ज्ञातम् । यद्यस्मात्कारणात् तस्मिन् प्रिये श्रीकृष्णे स्निग्धे स्नेहं कुर्वति सति त्वं परुषासि निष्ठुरभाषिण्यसि । तथा च तस्मिन् प्रणमति नमस्कुर्वति सति त्वं स्तब्धासि । अनम्रासि । मूकीभूतासि । तथा च यद्यस्मात्तस्मिन् रागिणि प्रीतिं कुर्वति सति त्वं द्वेषस्थासि अप्रीतिकारिण्यसि । यद्यस्मात् तस्मिन् उन्मुखे सति त्वं विमुखतां असन्मुखतां यातासि गच्छसि । तत्तस्मात् कारणात् तव एवं युक्तम् । एवं कथम् । श्रीखण्डचर्चा चन्दनलेपः विषं विषवत्संतापयति । तथा शीतांशुश्चन्द्रमाः तपनः सूर्यः । तथाहि हिमं शीतलं हुतवहः अग्निवत् । क्रीडामुदः क्रीडासुखानि यातनाः वेदनाः । सर्वेषां उचितपदोपन्यासः । एतत्सर्वं युक्तमेव । प्रियेऽनुकूले तव विपरीतकारित्वात् । [10]मुग्धः मुकुन्दो यस्मिन् सः ।

इति श्रीगीतगोविन्दटीकायां कलहान्तरितावर्णने
[11]मुग्धमुकुन्दो नाम नवमः सर्गः ।

---

1) B हरिमुपयातु । 2) A तवोप समीपे कुञ्जमध्यं हरिर्यातु । B तव समीपे कुञ्जमध्ये हरिर्यातु । 3) तव सम्यक् भजनेन सकामो .. । 4) P सपत्नजनः । 5) B ललितं रुचिरम् । 6) B drops from सुन्दर° to पुनराह । 7) A सती सखी । 8) तद्युक्तं । 9) B कथमनेनैव ज्ञातम् । 10) A,B मन्दः । 11) A,B मन्धमुकुन्दो ।

# दशमः सर्गः ।

## चतुरचतुर्भुजः ।

अत्रान्तरेत्यादि ।

[1]अत्रान्तरे मसृणरोषवशादसीम-
निःश्वासनिःसहमुखीं सुमुखीमुपेत्य ।
सव्रीडमीक्षितसखीवदनां दिनान्ते
सानन्दगद्गदपदं हरिरित्युवाच ॥१॥

[2]अत्रान्तरे इत्यादिना वक्ष्यमाणस्य सम्बन्धं श्लोकेनाह। नारायणः अत्रान्तरे अस्मिन् समये सानन्दं गद्गदपदं यथा स्यात्तथाग्रे वक्ष्यमाणम् उवाच । आनन्देन सह वर्तते इति सानन्दं गद्गदपदं यस्मिन् तत्तथा तस्मिन् तत्। किं कृत्वा। दिनान्ते सायं सन्ध्यासमये [3]राधामुपेत्य समीपं गत्वा। काम्। सुमुखीं सुष्ठु शोभनं मुखं यस्याः सा तथा ताम् । किम्भूताम् । सव्रीडं सलज्जं यथा स्यात्तथा ईक्षितसखीवदनाम्। ईक्षितमवलोकितं [4]सखीवदनं मुखं यया सा ताम्। [5]कस्मात्। मसृणरोषवशात्। मसृणश्चासौ रोषश्चेति तस्य वशः तस्मात् । पुनः किम्भूताम्। असीमनिःश्वासनिःसहमुखीम्। असीमः [6]अतिदीर्घायामश्चासौ निःश्वासश्चेति तेन निःसहं मुखं यस्याः सा ताम्। अथवा हरिपक्षे। सव्रीडं [7]सलज्जम् ईक्षितसखीवदनम् एवंविशिष्टा चेदियं सख्या कृतप्रसादा मम वचनतोष्या [8]भविष्यतीत्यानन्दकारणं यथा स्यात्तथा। केशवोऽपि प्रियवचसा मम मानखण्डनं करोतीति राधिका स्वगतं मत्वा सलज्जं यथा स्यात्तथा किमुवाचेत्याह।

[9]देशीयवराडीरागे अठतालताले ।

वदसि यदीत्यादि ।

वदसि यदि किञ्चिदपि दन्तरुचिकौमुदी
हरति दरतिमिरमतिघोरम् ।
स्फुरदधरसीधवे तव वदनचन्द्रमा
रोचयतु लोचनचकोरम् ॥१॥

---

1) A adds the sentence 'वक्ष्यमाणसंबन्धं श्लोकेनाह ।' before अत्रान्तरे। 2) A अथानन्तरं तत्तस्मिन्नर्थे सानन्दगद्गदपदं तथा स्यात्तथाग्रे वक्ष्यमाणमुवाच । 3) P रात्रावुपेत्य। 4) A सख्या वदनं; B सख्या वदनं यस्याः सा ताम् । 5) B drops from कस्मात् किमुवाचेत्याह। 6) A अतिदीर्घश्चासौ निःश्वासश्चेति। 7) A drops सलज्जम्। 8) P भविष्यतीति सानन्दकारणं। 9) A ललितरागेण गीयते B रामकरावराडीरागेण गीयते ।

प्रिये चारुशीले मुञ्च मयि मानमनिदानम् ।
सपदि मदनानलो दहति मम मानसं
देहि मुखकमलमधुपानम् ॥ ध्रुवपदम् ॥

हे [1]प्रिये राधे [2]मयि मद्विषये मानमभिमानं [3]मुञ्च । त्यज । किम्भूतम् । अनिदानम् । नास्ति निदानं [4]कारणं यस्य स तथा तम् । अहेतुकमित्यर्थः । किम्भूते । हे चारुशीले । चारुः [5]मनोज्ञं शोभनं शीलं स्वभावो यस्याः सा तस्याः सम्बोधनम् । न केवलं मानं मुञ्च । मुखकमलमधुपानं देहि । [6]मुखमेव कमलं तस्य मधु मकरन्दः पुष्परसः तस्य पानम् किमर्थम् । सपदि इदानीं मदनानलः [7]कन्दर्पाग्निः मम मानसं चेतो दहति । [8]मदनस्यानलः मदनानलः विरहाग्निरित्यर्थः । किञ्च । यदि किञ्चिदपि वदसि भाषसे । तर्हि दरतिमिरं हरति विनाशयति दरो भीतिः स एव तिमिरं तत् । का । तव दन्तरुचिकौमुदी दन्तानां रुचिर्दीप्तिः सैव कौमुदी चन्द्रिका । कथंभूतं तिमिरम् । अतिघोरम् अत्युग्रं भयानकम् । किञ्च । तव वदनचन्द्रमाः मे मम लोचनचकोरं रोचयतु तृप्तिं नयतु । लोचनमेव चकोरः पक्षिविशेषः तम् । किमर्थं कस्मै । स्फुरदधरसीधवे । अधरस्य सीधुः अधररसामृतम् । स्फुरच्चासा अधरसीधुश्चेति तस्मै [9]रुच्यर्थे चतुर्थी । ननु कृतागसि मयि किमप्युपकारादिकं न करोषी[10]त्याशङ्क्ते तर्हि अपकारमेवाप्येतादृशं कुरुष्वेत्याह ।

सत्यमेवासीत्यादि ।

सत्यमेवासि यदि सुदति मयि कोपिनी
देहि खर[11]नयनशरघातम् ।
घटय भुजबन्धनं जनय रदखण्डनं
येन वा भवति सुखजातम् ॥२॥

हे [12]सुदति । शोभना दन्ता यस्याः सा सुदती, तस्याः संबोधने हे सुदति । दन्तस्य दद् बहुब्रीहौ । सत्यमेव यदि मयि विषये कोपिन्यसि क्रोधयुक्तासि । तर्हि [13]खरनयनशरघातं देहि । नयनमेव शरः तस्य घातः प्रहारः । खरः तीक्ष्णः । शाणोत्तीर्ण इव नयनशरः तस्य घातस्तम् । कटाक्षबाणप्रहारमित्यर्थः । तथा भुजबन्धनं घटय । भुजाभ्यां बन्धनम् । तथा रदखण्डनं जनय उत्पादय । रदेन

1) B राधे प्रिये । 2) B मयि विषये मानं मुञ्च । 3) A मुञ्च । जहिहि । त्यज । 4) B आदिकारणं । 5) B मनोहरः शीलः । 6) B मुखकमलस्य मधु । 7) B कन्दर्पः । 8) B drops मदनस्यानलः मदनानलः । 9) B drops रुच्यर्थे चतुर्थी । 10) P त्याशङ्क्य; B त्याशङ्कते । 11) A,B °नखर° । 12) A सुदति राधे सत्यमेव....; B सुदति शोभना दन्ता यस्याः सा सम्बोधने । सत्यमेव... । 13) A खरास्तीक्ष्णा नखरा नखास्त एव शरास्तेषां घातं देहि । तथा भुजाभ्यां बन्धनं घटय । रदेन दन्तेन खण्डनं जनय उत्पादय । येन वा प्रकारेण; B खरनखरशरघातं देहि । खरनखरा एव शरास्तेषां शरघातः प्रहारः खरः तीक्ष्णः शाणोत्तीर्ण इव नयनशरस्तस्य घातस्तम् ।

दन्तेन खण्डनं तत्। येन वा भवति सुखजातं वा अथवा, येन प्रकारेण सुखजातं सुखस्य जन्म भवति। वैरशुद्धिर्भवतु। क्रोधमपनय। प्रसन्ना [1]भव। मामवलोकय इत्यर्थः।

त्वमसीत्यादि ।

त्वमसि मम भूषणं त्वमसि मम जीवनं
त्वमसि मम भव भवजलधिरत्नम् ।
भवतु भवतीह मयि सततमनुरोधिनी
तत्र मम हृदयमतियत्नम् ॥३॥

हे प्रिये। त्वं मम भूषणमसि। न केवलं भूषणं त्वं मम जीवनं प्राणधारणमसि। न केवलं जीवनं मम त्वं मम भवजलधिरत्नमसि। भव एव जलधिः समुद्रः तत्र जातं रत्नमिव। सर्वासां संसारस्थितस्त्रीणां त्वं रूपवती[2] रत्नभूतासि। [3]जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षते। इहास्मिन्मयि विषये सततमनवरतं भवती त्वम् अनुरोधिनी अनुसारिणी भवतु। किमर्थम्। तत्राह। अत्र अनुरोधविषये मम हृदयम् अतियत्नं वर्तते। अतिशयेन यत्नः प्रयत्नो यस्य तत्तथा।

नीलनलिनेत्यादि।

नीलनलिनाभमपि तन्वि तव लोचनं
धारयति कोकनदरूपम् ।
कुसुमशरबाणभावेन यदि रञ्जयसि
[4]कृष्णमिदमेतदनुरूपम् ॥४॥

हे तन्वि तवेदं लोचनं नीलनलिनाभं नीलोत्पलसदृशमपि कोकनदरूपं रक्तोत्पलरूपं धारयति। [5]यदि इदं लोचनं कृष्णं रञ्जयसि अनुरक्तं करोषि। केन। कुसुमशरबाणभावेन कुसुमशरः कामः तस्य बाणभावेन। तदा एतद्रूपम् उचितम् अनुरूपं भवति। यदि व्यथयसि तदा न भवति।

स्फुरत्वित्यादि ।

स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी
रञ्जयतु तव हृदयदेशम् ।
रसतु रसनापि तव घनजघनमण्डले
घोषयतु मन्मथनिदेशम् ॥५॥

हे कान्ते तव कुचकुम्भयोरुपरि मणिमञ्जरी [6]मणीनां मञ्जरी माला स्फुरतु भवतु। तव हृदयदेशं रञ्जयतु अलङ्करोतु। तथा [7]रसना मेखलापि रसतु शब्दं

---

1) A भवेति तात्पर्यम्। 2) B add मम after रूपवती। 3) B drops from जातौ to प्रचक्ष्यते। 4) B कृष्णमेतदनुरूपम्। 5) A यदिदं लोचनं कृष्णं मां रञ्जयति अनुरक्तं करोति। B यदि इदं कृष्णं लोचनं मां रञ्जयतु अनुरक्तं करोतु। 6) A मणीनां रत्नानां मञ्जरी माला; B मणीनां रत्नानां माला। 7) A रसना कटिमेखलापि।

करोतु । कस्मिन् स्थाने । घनजघनमण्डले घनं निबिडं च जघनमण्डलं चेति तस्मिन् । [1]न केवलं रसतु मन्मथनिदेशं कामाज्ञां च घोषयतु श्रावयतु । मण्डनानां प्रयोजनं सार्थकं भवतु ।

स्थलेत्यादि ।

स्थलकमलगञ्जन मम हृदयरञ्जनं
जनितरतिरङ्गपरभागम् ।
भण मसृणवाणि करवाणि [2]चरणद्वयं
सरस[3]लसदलक्तकरागम् ॥६॥

हे मसृणवाणि । मसृणा कोमला [4]स्निग्धा वाणी यस्याः सा तथा, तस्याः सम्बोधनं हे मसृणवाणि । त्वं भण ब्रूहि । तव [5]पदपङ्कजं [6]चरणारविन्दद्वयं सरसलसदलक्तकरागम् अहं करवाणि । रसेन सह वर्तत इति सरसः स चासौ लसच्च अलक्तकस्य लाक्षारसस्य रागो द्रवगुणो यस्मिन् तत्तथा तत् । किम्भूतं चरणद्वयम् । स्थलकमलगञ्जनम् । स्थले भूमौ यत्कमलं तद्गञ्जयतीति तथा तत् । पुनः किम्भूतम् । मम हृदयरञ्जनं हृदयं रञ्जयति [7]ह्लादयतीति तत्तथा । पुनः किम्भूतम् । जनितरतिरङ्गपरभागं जनितः उत्पादितः रतिरङ्गे सुरतसङ्ग्रामभूमौ परभागः शोभाभावो गुणोत्कर्षो यत्र तत्तस्मिन् तत्तथा ।

स्मरेत्यादि ।

स्मरगरलखण्डनं मम शिरसि मण्डनं
देहि पदपल्लवमुदारम् ।
ज्वलति मयि दारुणो मदनकदना[8]रुणो
हरतु [9]तदुपाहितविकारम् ॥७॥

हे प्रिये उदारं सुन्दरं पदपल्लवं देहि । किम्भूतम् । मम शिरसि मण्डनं भूषणम् । किम्भूतम् । स्मरगरलखण्डनं स्मर एव गरलं विषं तत्खण्डयतीति [10]तत् । अधुना तिष्ठतु पश्चाद्दास्यामि तत्राह । मयि ज्वलति मदनकदनारुणः मदनेन कदनं बाणप्रहारपीडाजनितदुःखसन्तापः तदेव अरुणः सविता स तथा । पुनः किम्भूतः । दारुणो भयानकः । तर्हि पदं किं करिष्यति । तत्राह । तव पदपल्लवं हरतु । कम् । [11]तदुपाहितविकारम् । तेन मदनकदनारुणेन [12]उपाहितः उत्पादितः स चासौ विकारश्चेति तम् । अपरमपि पल्लवाच्छादितं यच्छिरः तत्र सूर्यतापो न प्रभवति । [13]अरुणो स्फुटरागे स्यात् । सूर्ये सूर्यस्य सारथौ ॥ कन्दर्पबाणजे

1 [न] केवलं रसतु । मन्मथनिदेशम् आज्ञापयतु । श्रावयतु ।... 2) A पदपङ्कजं । 3) A,B °गलद° । 4) A चिक्कणा । 5) A चरणद्वन्द्वं; B चरणद्वयं । 6) A,B drop चरणारविन्दद्वयं । 7) A,B आह्लादयतीति । 8) B °नानलो । 9) A,B तदुपहित° । 10) B drops from तत् to दास्यामि । 11) A,B तदुपहित° । 12) A उपहितः 13) B drops from अरुणो to अनेकार्थः ।

दुःखे। तथा लौहितभेदे (? °भेदयोः)॥ अनेकार्थः। अथवा कोपश्चेत्तर्हि मस्तके पादप्रहारानन्तरं मानभङ्गः स्यात्। तस्मात् कुरु।

इतिचटुलेत्यादि।

इति चटुलचाटुपटुचारु मुरवैरिणो
[1]राधिकामधि वचनजातम्।
[2]जयतु जयदेवकविभारतीभूषितं
मानिनीजनजनितशातम् ॥८॥

इति गीतं [3]जयतु। सर्वोत्कृष्टतया वर्तताम्। किम्भूतम्। पद्मावतीरमण-जयदेवकविभारतीभणितम्। [4]पद्मावत्याः रमणो नाथः स चासौ जयदेवश्चेति तस्य भारती वाणी तया भणितम् उक्तम्। इतीति किम्। मुरवैरिणो मुरारेः श्रीकृष्णस्य राधिकामधिकृत्य वचनजातं भूतम्। उक्तप्रकारेण। किम्भूतम्। चटुलचाटु [5]चटुलं प्रियवाक्ययुक्तम्। चाटु प्रीतिकरम्। पुनः किम्भूतम्। पटु चतुरं कार्यसाधनसमर्थम्। पुनः किम्भूतम्। चारु रमणीयं मनोज्ञमित्यर्थः। अथवा वचनजातं समूहे इति। किम्भूतम्। अतिशान्तं अतिशयेन शान्तमित्यर्थः। [6]'दान्त-स्तु दमिते शान्तः शमिते प्रार्थितेऽर्दिते' इत्यमरः। अथवा [7]पाठान्तरम्। जयति जयदेवकविभारतीभूषितं मानिनीजनजनितशातम्। भारत्या भूषितमलङ्कृत-मित्यर्थः। मानिनीजनितं [8]शातं सुखं येन तत्तथा।

परिहरेत्यादिः।

परिहर कृतातङ्के शङ्कां त्वया सततं घन-
स्तनजघनयाक्रान्ते स्वान्ते परानवकाशिनि।
विशति वितनोरन्यो धन्यो न कोऽपि ममान्तरं
[9]स्तनभरपरीरम्भारम्भे विधेहि विधेयताम् ॥२॥

हे कृतातङ्के कृता[10] आतङ्का शङ्का यया सा तथा तस्याः सम्बोधनम्। त्वं शङ्कां परिहर त्यज। यतः वितनोः कन्दर्पात् [11]विगतशरीरात्, अन्यः कोऽपि स्त्री-जनः धन्योऽपि रमणीयोऽपि ममान्तरं अन्तः करणं न विशति न प्रवेशं करोति। कस्मिन् सति। स्वान्ते हृदये परानवकाशिनि परस्य नास्ति अवकाशः प्रवेशो यस्मिन् तत्तथा। [12]'स्वरेऽक्षरविपर्ययः'। (कातन्त्र ॥४६३॥ तत्पुरुषे समासे नस्य

1) A राधिकावचनमधिजातम्। 2) A जयति पद्मावतीरमणजयदेवकविभारतीभणितमिति-गीतम्। B जयति पद्मावतीरमणजयदेवकविभारतीभणितमिति शान्तम्। 3) A जयति। सर्वो-त्कृष्टतया वर्तस्व। B जयति सर्वोत्कर्षेण वर्तते। 4) B पद्मावतीरमणो भर्ता स चासौ जयदेव-कविश्चेति। 5) A चटुलं प्रियाजाडययुक्तम्। 6) B drops दान्तस्तु to इत्यमरः। 7) B इत्यपि पाठः। 8) B शान्तं। 9) A,B प्रणयिनि परिरम्भारम्भे। 10) B कृतः आतंको भयः। 11) B drops विगतशरीरात्। 12) B drops स्वरेऽक्षरविपर्यः।

अक्षरविपर्यया भवति स्वरे परे । न अजः अनजः ।) तस्मिन् । किम्भूते सति । त्वया राधिकयाक्रान्ते व्याप्ते सति । किम्भूतया त्वया । घनस्तनजघनया । स्तनौ च जघने च स्तनजघने । घने निबिडे निरन्तरे स्तनजघने यस्याः सा तया । अतः कारणात् विधेहि कुरु । काम् । विधेयताम् । विधेयो दासः तस्य भावस्ताम् । 'तत्वौ भावे तप्रत्ययः । (कातन्त्र ॥५०२॥ भावेऽभिधेये तत्वौ भवतः । शब्दस्य प्रवृत्तिनिमित्तं भावो भवति । तप्रत्ययस्य नपुंसके वृत्तिः, पटस्य भावः पटता, पटत्वम् ।) [1]विधेयो विनयग्राही वचने स्थित [2]आश्रव इत्यमरः। [3]अथवा विधेयतां कर्तव्यतां करणीयं स्त्रीपुरुषसंयोगप्रयोजनम् । [4]कस्मिन् विषये । स्तनभरपरीरम्भारम्भे । स्तनयोर्भरः अतिशयः विपुलत्वम् तस्य परीरम्भः गाढालिङ्गनं तस्यारम्भः उपक्रमः तस्मिन् ।

मुग्धे इत्यादि ।

मुग्धे विधेहि मयि निर्दयदन्तदंश-
दोर्वल्लिबन्धनिबिडस्तनपीडनानि ।
चण्डि त्वमेव [5]मुदमाप्नुहि पञ्चबाण-
चण्डालकाण्डदलनादसवः प्रयान्तु ॥३॥

हे मुग्धे अविवेकिनि । विधेहि कुरु । कानि । निर्दयदन्तदंशदोर्वल्लिबन्धनिबिडस्तनपीडनानि । दन्तैर्दशनम्, दोर्वल्लिभ्यां बन्धः बाहुद्वयबन्धः बाहुद्वयबन्धनम्, निबिडं निर्भरं गाढं यथा स्यात्तथा स्तनाभ्यां पीडनम् अवगाहनं बाधनम्, दन्तदंशश्च दोर्वल्लिबन्धश्च निबिडस्तनपीडनं च । निर्दयं दयारहितं यथा भवति तथा दन्तदंशदोर्वल्लिबन्धनिबिडस्तनपीडनानि । किमिति करवाणि तत्राह । हे चण्डि अत्यन्तकोपिनि । त्वमेव [6]मदं क्रोधं मुञ्च । दन्तदंशादिना किं फलम् । तदाह । ममासवः प्राणाः प्रयान्तु । गच्छन्तु । कस्मात् । पञ्चबाणचण्डालकाण्डदलनात् पञ्च बाणा यस्य स पञ्चबाणो मदनः, स एव चण्डालो निर्दयत्वात्, तस्य काण्डं बाणः तस्य दलनं भेदनं तस्मात् ।

व्यथयतीत्यादि ।

व्यथयति वृथा मौनं तन्वि प्रपञ्चय पञ्चमं
तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः ।
सुमुखि विमुखीभावं तावद्विमुञ्च न मुञ्च मां
स्वयमतिशयस्निग्धो मुग्धे प्रियोऽहमुपस्थितः ॥४॥

---

1) B drops from विधेयो to इत्यमरः । 2) P आश्रय इत्यमरः; A आश्रयः इत्यमरः । 3) A यद्वा । 4) A क्व विषये । 5) B मुदमुद्वह । 6) The text reads मुदमाप्नुहि । The expected gloss on this shourd be something like मुदमानन्दम् आप्नुहि प्राप्नुहि ।

हे मुग्धे विरहिते । अयं प्रियः स्वयमुपस्थितः समीपमागतः । किम्भूतः । अतिशयस्निग्धः अतिशयेन स्निग्धः [1]स्नेहेन युक्तः, अतो मानं मुञ्च जहीहि । किं तर्हि करोमि । तत्राह । हे तन्वि । वृथा निरर्थकं मौनं [2]मां व्यथयति । अतस्त्यज । तथा पञ्चमस्वरं प्रपञ्चय विस्तारय । किञ्च । हे तरुणि । तापं विनोदय [3]निवर्तय । कैः । मधुरालापैः मधुराश्च ते आलापाश्च परिहासकथास्तैः । हे सुमुखि सुरूपं शोभनं मुखं यस्याः सा तथा तस्याः सम्बोधनम् । हे सुमुखि तावदिति साकल्ये [4]विमुखीभावम् अधःसन्नतां विमुञ्च । काभिः । दृष्टिभिः [5]स्निग्धालोकैः ।

बन्धूकेत्यादि ।

बन्धूकद्युतिबान्धवोऽयमधरः स्निग्धो मधूकच्छवि-
　　गण्डश्चण्डि चकास्ति नीलनलिनश्रीमोचनं लोचनम् ।
[6]नासाभ्येति तिलप्रसूनपदवीं कुन्दाभदन्ति प्रिये
　　प्रायस्त्वन्मुखसे[7]वया विजयते विश्वं स पुष्पायुधः ॥५॥

हे प्रिये स पुष्पायुधो मदनः प्रायो बाहुल्येन त्वन्मुखसेवया विश्वं विजयते । जगज्जयतीत्यर्थः । तव मुखं तस्य सेवा तया । मुखे कामदेवस्य [8]पञ्चपुष्पबाणवद्वर्तन्त एतानि । कुतः । तवायं अधरश्चकास्ति शोभते । किम्भूतः । बन्धूकद्युतिबान्धवः बन्धूकं रक्तपुष्पं तद्वत् द्युतिः कान्तिः तस्याः बान्धवः तद्वल्लोहित इत्यर्थः । हे चण्डि सुन्दरि । तव गण्डः चकास्ति भासते । किम्भूतः । स्निग्धः [9]स्निग्धो वत्सलचिक्कणो( ? °चिक्कणे ) । पुनः किम्भूतः । मधूकच्छविः मधूकपुष्पस्येव छविर्दीप्तिर्यस्य स तथा । तथा तव लोचनं चकास्ति शोभते । किम्भूतम् । नीलनलिनश्रीमोचनम् । नीलनलिनस्य नीलोत्पलस्य श्रियं कान्ति मोचयतीति । तिरस्करोतीत्यर्थः । तथा च ते नासा नासिका अभ्येति गच्छति । काम् । तिलप्रसूनपदवीम् । अपि च । हे प्रिये कुन्दाभदन्ति कुन्दवद्दन्ता यस्याः सा तथा तस्याः सम्बोधनं हे कुन्दाभदन्ति । अनेन तव वदनस्य दासत्वं करोतीत्यर्थः ।

दृशावित्यादि ।

दृशौ तव मदालसे वद[10]नमिन्दुसंकाशकं
　　गतिर्जनमनोरमा विधुतरम्भमूरुद्वयम् ।

---

1 ) B drops स्नेहेन युक्तः । 2 ) B drops मां । 3 ) B drops निवर्तय । 4 ) A विमुखीभावम् अध-सन्मुखतां विमुञ्च । 5 ) B स्निग्धालोकनैः । 6 ) B नासान्वेति । 7 ) B °शोभया । 8 ) पञ्च बाणा वर्तन्ते । 9 ) B drops from स्निग्धो to चिक्कणो । 10 ) B °मिन्दुवद्दीपकं ।

रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवा-
वहो विबुधयौवतं वहसि तन्वि पृथ्वीगता ॥६॥

इति श्रीगीतगोविन्दे मानिनीवर्णने
**चतुरचतुर्भुजो नाम दशमः सर्गः ॥**

**हे तन्वि। अहो आश्चर्यम्। पृथ्वीगतापि त्वं वहसि। किम्। विबुधयौवतं युवतीनां समूहं यौवतं विबुधानां यौवतं देवस्त्रीसमूहमित्यर्थः। शब्दच्छलेन मदालसादिवृन्दमेवोपपादयति। तव दृशौ मदालसे मदेन अलसे मन्दे ईषन्मुद्रित-लोचन इत्यर्थः। तथा ते वदनं इन्दुसन्निभम् इन्दुना चन्द्रेण संनिभं सदृशम्। अनेन इन्दुमतीं सूचयति। तथा ते गतिर्जनमनोरमा जनानां मनो रमयते आह्लादयति अर्थान्मादृशानामपि। तथा ते ऊरुद्वयं विधुतरम्भं विधुता तिरस्कृता रम्भा कदली येन तत्तथा, निन्दितकदलीस्तम्भमित्यर्थः। तथा तव मतिः [? रतिः] कलावती। कलाः चतुःषष्टिकामकला विद्यन्ते यस्याः सा तथा। तथा च ते भ्रुवौ चित्रलेखे। रुचिरं सुन्दरं च तत्। चित्रं च विचित्रं तस्य लेखेव। अथवा रुचिरे सुन्दरे चित्रे विस्मयनीये लेखे ययोस्तत्तथा। [1]वृत्तमपि पृथ्वी। चतुर-चतुर्भुजो यस्मिन्।**

इति श्रीगीतगोविन्दटीकायां मानिनीवर्णने
**चतुरचतुर्भुजो नाम दशमः सर्गः।**

1) B drops वृत्तमपि to यस्मिन्।

# एकादशः सर्गः

[1]सानन्ददामोदरः ।

सुचिरमित्यादि ।

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं
गतवति कृतवेशे केशवे कुञ्जशय्याम् ।
[2]रचितरुचिरभूषां दृष्टिमोषे प्रदोषे
[3]स्फुरति [4]निरवसादां कापि राधां जगाद ॥१॥

श्लोकेन गीतं प्रदर्शयति । कापि सखी राधां प्रति जगाद ऊचे । [5]किम्भूताम् । रचितरुचिरभूषां रचिता रुचिरा रमणीया भूषा अलङ्कारः भूषणं यस्याः सा तथा ताम् । पुनः[6]कथम्भूताम् । निरवसादां [7]निर्यातो निर्गतोऽवसादो[8] यस्याः सा तथा ताम् । [9]कस्मिन् समये । प्रदोषे रजनीमुखे । कथम्भूते[10] । स्फुरति । पुनः किम्भूते । दृष्टिमोषे [11]दृष्टिं मुष्णातीति यस्मिन् तत्तथा तस्मिन् निबिडान्धकारिणि । कस्मिन् सति । केशवे श्रीकृष्णे कुञ्जशय्यां गतवति सति । कुञ्जे निकुञ्जे शय्या ताम् । [12]किम्भूते केशवे । कृतवेशे कृतः वेशो येन स तथा तस्मिन् । किं कृत्वा । सुचिरं चिरकालम् अनुनयेन परिसान्त्वनेन मृगाक्षीं मृगलोचनां प्रीणयित्वा संतोष्येत्यर्थः ।

[13]वसन्तरागे यतिताले ।

विरचितेत्यादि ।

विरचितचाटुवचनरचनं [14]चरणे रचितप्रणिपातम् ।
संप्रति मञ्जुलवञ्जुलसीमनि केलिशयनम[15]नुयातम् ॥१॥
मुग्धे मधुमथन[16]मनुगतमनुसर राधिके ॥ ध्रुवपदम्[17]॥

हे [18]राधे मुग्धे [19]सदानभिज्ञे मधुमथनं [20]श्रीकृष्णम् अनुसर गच्छ । तस्या-[21]नुकूला: भव । किम्भूतम् । अनुगतम् अनुसारिणम् । [22]अनुसारित्वं दर्शयति

---

1) A सानन्दगोविन्दः । B सानन्दो दामोदरः । 2) B रुचित° । 3) B स्फुरन्ति । 4) निवसादां । 5) B किम्भूतौ । 6) A किम् । B किम्भूताम् । 7) A,B drop निर्यातो । 8) B adds विषादो after अवसादो । 9) A क्व । 10) B drops पुनः । 11) A दृष्टिं मुष्णातीति तस्मिन् ; B drops from दृष्टिं to तस्मिन् । 12) B कथम्भूते । 13) A वसन्तरागे । B वसन्तरागेण गीयते रूपकताले । अत्रापि अभिसारिकैव नायिका । 14) B चरणौ । 15) A मनुजातम् । 16) P °मनुसर । 17) B °मिदम् । 18) B drops राधे । 19) B drops सदानभिज्ञे । 20) B drops श्रीकृष्णं । 21) B नुक्तमाला च । 22) B drops from अनु to दर्शयति ।

पुनः किम्भूतम्। विरचितचाटुवचनरचनं विरचिता [1]कृता चाटुवचनस्य रचना येन स तथा तम्। पुनः किंविशिष्टम्। रचितप्रणिपातं रचितः प्रणिपातो दण्ड-प्रणामो येन स तथा तम्। कस्मिन्। चरणे पुनः किम्भूतम्। संप्रति इदानीम्। [2]अनुयातम् उपयातम्। किम्। केलिशयनं केल्यर्थं शयनं च तत्। कस्मिन्। मञ्जुलवञ्जुलसीमनि मञ्जुलाः शोभमानाश्च वञ्जुलाश्च तेषां सीमावधिः तस्मिन्, वानीरकुञ्जमध्य इत्यर्थः।

[3]कथमनुस्मरामि तत्राह घनजघनेति

घनजघनस्तनभारभरे दरमन्थरचरणविहारम्।
मुखरितमणिमञ्जीरमुपैहि विधेहि मरालविकारम् ॥२॥

हे घनजघनस्तनभारभरे दरमन्थरचरणविहारं यथा स्यात्तथा उपैहि समीपं गच्छ। जघनं च स्तनौ च घनं निबिडभूतं तज्जघनस्तनं च तस्य भारः अतिशय-गुरुत्वं तस्य भरो धरणं यया सा तथा, तस्याः संबोधनम्। [4]दर ईषन्मन्थरो मन्दीभूतश्चरणविहारः पदोपन्यासो [5]यस्मिन् कर्मणि तत्तथा स्यात्। पुनः [6]कथं यथा स्यात्। मुखरितमणिमञ्जीरं यथा स्यात्तथा मणिभिः रत्नैः उपेतौ [7]रचितौ मञ्जीरा मुखरितौ [8]रवन्तौ मणिमञ्जीरौ [9]यस्मिन्कर्मणि तत्क्रियाविशेषणम्। अथानन्तरं गमने विशेषमाह। त्वं मरालविकारं विधेहि [10]कुरु मरालानां राज-हंसानां विकार इव विकारो गतिविशेषणम्। हंसगत्या गच्छेत्यर्थः। [11]अथवा। मरालनिकारं मरालानां हंसानां निकारस्तिरस्कारः हंसगतेरपि सुन्दरगत्या याही-त्यर्थः। ननु कामो निवृत्तः किमिति यामीति ।

तत्र कामोद्बोधहेतुमाह शृण्विति ।

शृणु रमणीयतरं तरुणीजनमोहनमधुपविरावम् ।
कुसुमशरासनशासनबन्दिनि पिकनिकरे भज भावम् ॥३॥

[12]हे राधे त्वं शृणु। तरुणीजनमोहनमधुपविरावं तरुणीजनानां मोहनो [13]मधु-पानां अलीनां विरावो ध्वनिः तरुणीजनमोहनश्चासौ मधुपविरावश्चेति। तत् किम्भूतम्। रमणीयतरं अतिशयेन रमणीयो रमणीयतरः तम्। तथा त्वं भावं भज चित्तं [14]विधेहि। कस्मिन्। पिकनिकरे। पिकानां कोकिलानां निकरः समूहः

1) B drops कृता। 2) B उपयात(म्) अनुगतम्। 3) drops this line. 4) P दरः। B दर इषत्मदो चरणोविहारः (? ईषन्मन्थरो ईषन्मन्दः चरणविहारैः)। 5) A यत्र यस्यां क्रियायां तत्। 6) B drops कथं यथा स्यात्। 7) B drops रचितौ। 8) B drops रवन्तौ। 9) A यत्र यस्यां तत्; B यस्मिन् कर्मणि [तत्] तथा। 10) P drops कुरु। 11) B drops from अथवा to याहीत्यर्थः। 12) P हे त्वं शृणु। 13) B drops from मधुपानां to मोहनश्चासौ। 14) A,B देहि।

तस्मिन् । किम्भूते । कुसुमशरासनशासनबन्दिनि [1]कुसुमशरान् अस्मिन् क्षिप्यन्ते अस्यन्ते, असु क्षेपणे धातुः, शरासनं कुसुममयं शरासनं धनुर्यस्य स तथा कामः, [2]तस्य शासनमाज्ञा तत्र बन्द वैतालिकस्तस्मिन् । [3]'स्युर्मागधास्तु मगधा बन्दिनः स्तुतिपाठकाः' इत्यमरः ।

अनिलतरेत्यादि ।

अनिलतरलकिसलयनिकरेण करेण लतानिकुरुम्बम् ।
प्रेरणमिव करभोरु करोति गतिं प्रति मुञ्च [4]विलम्बम् ॥४॥

किञ्च हे करभोरु । करभवत् ऊरू यस्याः सा करभोरुः, [5]उकारान्तादुः, तस्याः सम्बोधनं हे करभोरु । [6]'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इत्यमरः । त्वं गतिं गमनं प्रति विलम्बं मुञ्च त्यज । यतो लतानिकुरुम्बं वल्लिकदम्बकं प्रेरणमिव करोति । केन कृत्वा । अनिलतरलकिसलयनिकरेण [7]करेण अनिलेन तरलानि च तानि किसलयानि च तेषां निकरस्तेन ।

[8]ननु तत्र गते फलं नास्ति तत्राह स्फुरितमिति ।

स्फुरितमनङ्गतरङ्गवशादिव सूचितहरिपरिरम्भम् ।
पृच्छ मनोहरहारविमलजलधारममुं कुचकुम्भम् ॥५॥

अमुं [9]कुचकुम्भं पृच्छ । किम्भूतम् । स्फुरितम् । कस्मादिव । अनङ्गतरङ्गवशादिव अनङ्गस्य [10]मन्मथस्य तरङ्गो भङ्गस्तद्वशादिव । पुनः किम्भूतम् । सूचितहरिपरिरम्भम् । [11]हरेः परिरम्भः आलिङ्गनं, सूचितः हरिपरिरम्भो येन स तथा तम् । कुम्भत्वं दर्शयति । पुनः किम्भूतम् । मनोहरहारविमलजलधारम् । [12]मनोहरश्चासौ हारो मुक्ताहारश्चेति स एवातितेजनत्वात्तं, विमलं जलं तद्धरतीति स तथा तम् । अथवा मनोहर हार एव विमलजलस्य धारा यस्मिन् स तथा तम् ।

अधिगतमित्यादि ।

अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जम् ।
चण्डि रसितरसना[13]रवडिण्डिममभिसर सरसमलज्जम् ॥६॥

1) A कुसुमशरान् अस्यन्ते क्षिप्यन्ते अनेनेति कुसुमशरासनम् ; B drops from कुसुमशरान् to धातुः, शरासनम् । 2) A तस्य शासनमाज्ञायां वैदी; B तस्य शासने आज्ञायां बन्दि । 3) A असु क्षेपणे धातुः । बंदिनः स्तुतिपाठका इत्यमरः; B drops from स्युर्मागधा to इत्यमरः । 4) A adds मुग्धे ॥ after विलम्बम् । 5) P and B drop उकारान्तादुः । 6) B drops मणि....त्यमरः । 7) B drops करेण । 8) B drops ननु...तत्राह । 9) A adds मुग्धे ॥ after कुचकुम्भम् ॥ 10) B drops मन्मथस्य । 11) A हरेः परिरम्भः आलिङ्गनम् । B सूचितहरेः परिरम्भो येन स तथा तम् । 12) A मनोहरश्चासौ मुक्ताहारश्च स एवाचेतनत्वात विमलं जलं तद्धरतीति सस्तम् ; B मनोहरहार एव विमलजलधारा यस्मिन् स तथा तम् । 13) B °वलि° ।

किञ्च हे सखि! तवेदं वपुः शरीरम् अधिगतम् अधिज्ञातम्। काभिः। [1]सखीभिः। किम्भूतम्। रतिरणसज्जं रतौ रणः नखप्रहारादिरूपः तस्मै सज्जम्। भूषणादिसन्नाहसंयुक्तम्। ततो हे चण्डि रसितरसनार[2]वडिण्डिमं[3] यथा स्यात्। [4]सरसं यथा स्यात्। अलज्जं यथा स्यात्। तथा त्वम् अभिसर [5]संकेतशालां गच्छ। रसिता चासौ रसना चेति तस्या रवः स एव डिण्डिमः पटहघोषो [6]यस्मिन् कर्मणि। सह रसेन वर्तत इति। न विद्यते लज्जा यस्मिन् कर्मणि तत्तथा।

स्मरशरेत्यादि।

स्मरशरसुभगनखेन करेण सखीमवलम्ब्य करेण सलीलम्।

चल वलयक्वणितै[7]रधिबोधय हरिमपि[8] निगदितशीलम् ॥७॥

नन्वहं एकाकिनी लज्जावती कथं गच्छामि। तदाह। हे राधे! सलीलं यथा भवति तथा करेण सखीमवलम्ब्य त्वं चल गच्छ। किम्भूतेन करेण। स्मरशर सुभगनखेन। स्मरशरवत् [9]सुभगः सुन्दरोऽतितीक्ष्णो नखो यस्य स तथा तेन। न केवलं चल गच्छ, गत्वा हरिं बोधय उत्थापय। कैः। [10]वलयक्वणितैः वलययोः कङ्कणयोः क्वणितानि रणितानि तैः। किम्भूतम्। [11]निजगतिशीलम्। निजा चासौ गतिश्चेति प्रस्थितिः तत्र शीलं स्वभावो यस्य स तथा तम्। [12]यदि त्वामतिमानात् कोपेन भ्रामयति यदि अन्यां प्रति याति तर्हि किं करोषि अयमाशयः।

श्रीजयदेवेत्यादि।

श्रीजयदेवभणितमधरीकृतहारमुदासितवामम्।

हरिविनिहितमनसाम[13]धितिष्ठतु कण्ठतटीमविरामम् ॥८॥

[14]श्रीजयदेवभणितं गीतम् अविरामं यथा भवति तथा कण्ठतटीम् अधितिष्ठतु वर्तताम्। केषाम्। हरिविनिहितमनसां। हरौ श्रीकृष्णे विनिहितं मनो यैस्तत्तथा तेषाम्। किम्भूतं गीतम्। अधरीकृतहारम्। अधरीकृतः अधःकृतो हारो येन तत्तथा। पुनः किम्भूतम्। [15]उदासितवामं विहितदाक्षिण्यमित्यर्थः।

[16]इदानीं शीघ्रमागमनायानुकूलार्थं दर्शयति–सा मामित्यादि।

सा मां [17]द्रक्ष्यति वक्ष्यति स्मरकथां प्रत्यङ्गमालिङ्गनैः

प्रीतिं यास्यति रंस्यते सखि समागत्येति चिन्ताकुलः।

---

1) B drops सखीभिः। 2) B °वलि°। 3) B adds यथा उज्वलं after डिण्डिमं। 4) B drops सरसं...यथा स्यात्। 5) P सङ्केतनशालं। 6) B यस्मिन् तथा। B drops कर्मणि...तत्तथा। 7) A °रतिबोधय; B रधिरोधय। 8) B हरिमिति। 9) P सुभगसुदतो अतितीक्ष्णो; B सुभगौ अतितीक्ष्णौ। 10) A adds करैः after °क्वणितैः; B reads वलयितकरैः। 11) The text, however, reads निगदितशीलम्। 12) P यदि त्वामतिमानात् कोपेन भ्रमते यत् तर्हि किं करोषि अयमाशयः; B drops the whole sentence. 13) B मधितिष्ठति। 14) B drops श्री ...अधितिष्ठतु। 15) A उदासितरामम्। उदासिता पृथक्कृता रामा कान्ता येन तत्। यद्वा उदासितवामम्। B उदासितवामम् उदासिता पृथक्कृता वामा कान्ता येन अथवा विहित। 16) B drops this sentence.। 17) A प्रति।

स[1] त्वां पश्यति वेपते पुलकयत्यानन्दति स्विद्यति ।
प्रत्युद्गच्छति मूर्च्छति स्थिरतमःपुञ्जे निकुञ्जे प्रियः ॥२॥

हे [2]सखि स प्रियः निकुञ्जे स्थितः त्वां पश्यति मृगयते । किम्भूते निकुञ्जे । *स्थिरतमःपुञ्जे स्थिराणि निबिडानि तमांसि अन्धकाराणि तेषां पुञ्जः समूहो* यत्र तत्तथा तस्मिन् । गाढान्धकारसमूह इत्यर्थः । किम्भूतः सन् । [3]चिन्ताकुलः सन् । चिन्तया आकुलो व्यग्रः । कथम् । इति । [4]इतीति कथम् । सा राधा समागत्यागम्य मां द्रक्ष्यति । न केवलं द्रक्ष्यति स्मरकथां कामप्रयुक्तवार्तां वक्ष्यति । न केवलं[5]वक्ष्यति, प्रत्यङ्गमालिङ्गनैः प्रीतिं यास्यति । अङ्गम् अङ्गं प्रति प्रत्यङ्गम् । न केवलं यास्यति, रंस्यते [6]क्रीडिष्यति । न केवलं रंस्यते, वेपते कम्पते । न केवलं वेपते, पुलकयति रोमाञ्चयुक्तो भवति । न केवलं पुलकयति, आनन्दति हृष्यति । न केवलमानन्दति स्विद्यति स्वेदयुक्तो भवति । न केवलं स्विद्यति, (...प्रत्युद्गच्छति मूर्च्छति च ।)

अक्ष्णोरित्यादि ।

[7]अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिच्छगु[8]च्छावलीं
मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकम् ।
धूर्तानाम[9]भिसारसंभ्रमजुषां विष्वङ्निकुञ्जे सखि
ध्वान्तं नीलनिचोलचारु सुदृशां प्रत्यङ्गमालिङ्गति ॥३॥

हे सखि इदानीं विश्वव्यापि ध्वान्तं तमः कर्तृ निकुञ्जमध्ये प्रत्यङ्गं सकलाङ्गानि आलिङ्गति उपगूहति । कासाम् । सुदृशां शोभननयनानां नारीणाम् । किम्भूतं ध्वान्तम् । नीलनिचोलचारु नीलश्चासौ निचोलश्चेति तद्वच्चारु मनोहरम् । कथम्भूतानाम् । अभिसारसाहसकृताम् अभिसाराय सङ्केतस्थानगमनाय कृतम् साहसं असमीक्ष्य व्यापारो याभिस्तास्तथा तासाम् । पुनः किम्भूतानाम् । धूर्तानां स्वभर्तृवञ्चिकानाम् । किं कुर्वत् ध्वान्तं प्रत्यङ्गमालिङ्गति । अक्ष्णोर्नयनयोरञ्जनं कज्जलं निक्षिपत् इव । तथा श्रवणयोस्तापिच्छगुच्छावलीं निक्षिपत् । तापिच्छस्य तमालस्य गुच्छाः पुष्पस्तबकाः, तेषामावलिः पङ्क्तिस्ताम् । तथा मूर्ध्नि मस्तके श्यामसरोजदाम नीलोत्पलमालां निक्षिपत् । तथा कुचयोः कस्तूरिकापत्रकं पत्रावलीं निक्षिपत् ।

काश्मीरेत्यादि ।

काश्मीरगौरवपुषामभिसारिकाणा-
माबद्धरेखमभितो रुचिमञ्जरीभिः ।

---

1) P,B दूरं पश्यति । 2) B प्रियसखि प्रियो । 3) B drops चिन्ताकुलः सन् । 4) A,B drop इतीति कथम् । 5) B adds स्मरकथां after केवलं । 6) B क्रीडति । न केवलं वेपते पुलकयति । न केवलं पुलकयति न केवलम् आनन्दयते आनन्दयति स्विद्यति स्वेदयुक्तो भवति । 7) P अक्ष्णोर्निःक्षिप° । 8) A °गुंछावलीं; B गुंजावलीं । 3) The reading in the commentary, however, is अभिसारसाहसकृतां ।

एतत्तमालदलनीलतमं तमिस्रं
तत्प्रेमहेमनिकषोपलतां तनोति ॥४॥

हे राधे एतत्तमिस्रं तमः तनोति। काम् । तत्प्रेमहेमनिकषोपलतां तस्मिन् श्रीकृष्णे प्रेम तद्धेम तस्य निकषोपलता ताम्, सुवर्णपरीक्षापाषाणरूपताम् [1]स्वयं निकषोपलो भवतीत्यभिप्रायः। किम्भूतं तमिस्रम्। तमालदलनीलतमं [2]तमालस्य दलं तद्वन्नीलतमम् अतिशयेन नीलमित्यर्थः । [3]पुनः किम्भूतम् रुचिमञ्जरीभिः, [4]रुचयो दीप्तय एव मञ्जर्यस्ताभिः, अभितः समन्तात् आबद्धरेखम् आबद्धा रेखा यस्मिन् तत्तथा । कासाम् । अभिसारिकाणाम् । सङ्केतस्थानगतानाम् । पुनः किम्भूतानाम् । काश्मीरगौरवपुषां काश्मीरं कुङ्कुमं तद्वद्गौराणि वपूंषि यासां तास्तथा तासाम्, सुवर्णतुल्यपीतवर्णशरीराणामित्यर्थः ।

श्लोकेन गीतं सूचयति-हारावलीत्यादि ।

हारावली तरलकाञ्चनकाञ्चिदाम-
[5]मञ्जीरकङ्कणमणिद्युतिदीपितस्य ।
द्वारे निकुञ्जनिलयस्य हरिं निरीक्ष्य
व्रीडावतीमथ सखी निजगाद राधाम् ॥५॥

अथानन्तरम् इयम् अपरा सखी राधां सखीं प्रति गीतेनैव वक्ष्यमाणमित्युवाच । किम्भूतां राधाम् । [6]निकुञ्जनिलयस्य निकुञ्जमन्दिरस्य द्वारे हरिं श्रीकृष्णं निरीक्ष्यावलोक्य व्रीडावतीं लज्जावतीम् । किम्भूतस्य निलयस्य । हारावलीतरलकाञ्चनकाञ्चिदाममञ्जीरकङ्कणमणिद्युतिदीपितस्य । काञ्चनस्य कनकस्य काञ्ची तस्या दाम हारावलीतरलः [7]तन्मध्यमणिश्च काञ्चनकाञ्चिदाम चेति। अथवा। हारावलीतरलकाञ्चिदाम चेति । अथवा । हारावलीतरलकाञ्चनकाञ्चिदाममञ्जीरकङ्कणं च । तेषां दीप्तिः । तया दीपितः प्रकाशितः तस्य ।

[8]विराडी रागे अठताले ।

मञ्जुतरेत्यादि ।

मञ्जुतरकुञ्जतलकेलिसदने ।
विलस रतिरभसहसितवदने ॥१॥
[9]प्रविश राधे माधवसमीपमिह ॥ ध्रुवपदम् ॥

---

1) B स्वर्णनिकषोपलो। 2) B drops तमाल....तमम्। 3) B drops पुनः...तत्तथा। 4) B drops रुचयो...ताभिः। 5) P केयूर 6) B निकुञ्जनिलयस्य द्वार(रे) मन्दिरस्य द्वारे श्रीकृष्णं निरीक्ष्य व्रीडावती(तीं) लज्जावती(तीं)। 7) B ततमध्यात्मणिश्च कांचनदामेति तेषां दीप्तिस्तया दीपितः प्रकाशितस्तस्य। 8) A विराडीरागे; B विराडीरागेण गीयते एकतालीताले।
9) The mss give this recurring line as the second one.

हे राधे माधवसमीपं प्रविश । [1]लक्ष्मीपतेः समीपम् । कुत्र । मञ्जुतरकुञ्जतलकेलिसदने । अतिशयेन मञ्जु मञ्जुतरं सुन्दरम् । प्रकृष्टार्थे तरतमौ प्रत्ययौ भवतः । कुञ्जमेव कुञ्जतलम् । तलशब्दः स्वरूपार्थः । क्रीडाया मदनगृहं मञ्जुतरं च तत् कुञ्जतलं चेति तदेव केलिसदनं क्रीडागृहम् । तस्मिन् । किमर्थं प्रविशामि तदाह । हे रतिरभसहसितवदने राधे, इह सदने विलस विलासकेलिं कुरु । [2]रतौ रभसः आधिक्यं प्रवृत्तस्नेहे हसितं हास्योपेतं वदनं यस्याः सा तस्याः सम्बोधनम् ।

नवभवेत्यादि ।

नवभवदशोकदलशयनसारे ।
विलस कुचकलशतरलहारे ॥२॥
प्रविश राधे माधवसमीपमिह ॥

किम्भूते सदने । नवभवदशोकदलशयनसारे नवानि नूतनानि भवन्ति जायन्त इति नवभवन्ति च अशोकदलानि चेति तेषां शयनं शय्या तदेव [3]सारः सारभूतं यस्मिन् । [4]प्रविश राधे माधवसमीपमिह विलसेति पुनरुक्तिः सर्वपदे [5]योजनीया । प्रवेशनिश्चयोत्पादनाय ।

कुसुमेत्यादि ।

कुसुमचयरचितशुचिवासगेहे ।
विलस कुसुमसुकुमारदेहे ॥३॥
प्रविश राधे माधवसमीपमिह ॥

[6]किम्भूते सदने । कुसुमचयरचितशुचिवासगेहे । कुसुमानां चयो निकरः तेन रचितं शुचि शुद्धं वासगेहं तस्मिन् । कुसुमवत्सुकुमारो देहो यस्याः सा तथा तस्याः सम्बोधने ।

चलमलयेत्यादि ।

[7]चलमलयवनपवनसुरभिशीते ।
विलस [8]रसवलितललितगीते ॥४॥
प्रविश राधे माधवसमीपमिह ॥

---

1) A मा लक्ष्मीः तस्याः धवः पतिः तस्य समीपम् । मञ्जुतरकुञ्जतलम् । तलशब्द[:] स्वरूपार्थः । क्रीडाया मदनगृहं मञ्जुतरं च कुञ्जतलं च । तदेव; B drops लक्ष्मीपतेः समीपम् । 2) B drops रतौ......सम्बोधनम् । 3) B drops सारः । 4) B प्रविश राधे प्रवेशनिश्चयोत्पादनाय । 5 A योजनीयम् । 6) B drops किम्भूते···वासगेहे । 7) P मृदुचलमलयपवनसुरभिशीते । A चलमलयघनपवनसुरभिशीते । B चलमलयवनपवनसुरभितशीते । 8) P मदनशरनिकरभीते । A सरसवलित° ।

पुनः किम्भूते [1]सदने । चलमलयवनपवनसुरभिशीते । मलयाचलस्य [2]वनं तस्य पवनः चलश्चासौ मलयपवनश्च तेन सुरभिशीतं यस्मिन् तत्तथा तस्मिन् । सुरभि सुगन्धि तथा शीतलं च । पुनः किम्भूते राधे । [3]रसवलितललितगीते रसेन रागेण वलितं च ललितं सुन्दरं च रसवलितं [4]ललितं यस्याः सा तस्याः सम्बोधने । रतिललितवलितगीत इति वा पाठः ।

मधुमुदितेत्यादि ।

मधुमुदितमधुपकुलकलितरावे ।
विलस [5]मदनरससरसभावे ॥५॥
प्रविश राधे माधवसमीपमिह ॥

[6]पुनः किम्भूते [7]सदने । मधुमुदितमधुपकुलकलितरावे । मधुना पुष्परसेन मुदितं हर्षितं मधुपानां भ्रमराणां कुलं तेन कलितः कृतः रावो [8]ध्वनिः शब्दो [9]यत्र तत्तथा । तस्मिन् ।

"मधु मद्यं मधु क्षौद्रं मधु पुष्परसं विदुः ।
मधुश्चैत्रो मधुर्दैत्यो मधुकेपि मधुर्मतः ॥" इति अनेकार्थः ॥

कथम्भूते राधे । मदनरस[10]सरसभावे मदनेन [11]कन्दर्पेण हेतुभूतेन कृतः रसः [12]शृङ्गारादिक्रीडा तेन सरसः कोमलो भावो यस्याः सा [13]तथा तस्याः सम्बोधने [14]हे मदनरससरसभावे ।

मधुतरेत्यादि ।

[15]मधुतरलपिकनिकरनिनदमुखरे ।
विलस [16]दशनरुचिरुचिरशिखरे ॥६॥
प्रविश राधे माधवसमीपमिह ॥

पुनः किम्भूते [17]सदने । मधुतरलपिकनिकरनिनदमुखरे । मधौ वसन्ते तरलः उद्भटः पिकानां निकरः समूहः तस्य निनदः तेन मुखरः शब्दवान् तस्मिन् । पुनः किम्भूते [18]राधे । दशनरुचिरुचिरशिखरे रुच्या दीप्त्या रुचिराणि च

1) A,B drop सदने । 2) A पवनः । चलश्चासौ मलयघनपवनश्च तेन सुरभि शितं (शीतं) यस्मिन् तत् । B वनं तस्य पवनः तेन सुरभि शीतलं यस्मिन् तथा तस्मिन् । सुरभि सुगन्धि तथा शीतलं च सुन्दरं चेति । B drops पुनः किम्भूते राधे । रस...ललितं । 3) A रसवलितं ललितं गीतं यस्याः सा । तस्याः सम्बोधनम् । 4) B drops ललितं । 5) P कुसुमशरसरसभावे; A मदनशररभसभावे । 6) A drops पुनः । 7) B drops सदने... रावे । 8) B drops ध्वनिः । 9) A यत्र तस्मिन् । B यत्र तत्तथा । कथम्भूते मदनरससरसरावे । 10) A °रभस°; B सरसरावे । 11) A drops कन्दर्पेण । B कामेन । 12) A शृङ्गारक्रीडा । 13) A drops तथा...°भावे । 14) A,B drop हे...°भावे । 15) B मधुरतर° । 16) B रुचिरः शुचिदशनशिखरे । 17) A, B drop सदने । 18) B drops राधे ।

तानि शिखराणि च पक्वदाडिमबीजानि। दशना दन्ता एव रुचिरुचिरशिखराणि यस्याः सा तथा तस्याः सम्बोधने ।

विततेत्यादि ।

विततबहुवल्लिनवपल्लवसुघने ।
विलस चिरमलसपीनजघने ॥७॥
प्रविश राधे माधवसमीपमिह ॥

पुनः किम्भूते सदने । विततबहुवल्लिनवपल्लवसुघने। वितताः सर्वत्र व्यापिन्यो बहवो [1]वल्लयो लताः तासां नवाश्च ते पल्लवाश्च तैः सुघनं निबिडं तस्मिन्। किम्भूते राधे। हे अलसपीनजघने, हे राधे चिरं चिरकालं विलस क्रीडय । अलसा [2]चासौ पीना जघना चेति तस्याः सम्बोधने ।

विहितेत्यादि ।

विहितपद्मावतीसुखसमाजे ।
कुरु मुरारे मङ्गलशतानि ।
भणति जयदेवकविराजे ॥८॥

क्वचिद् [3]विशेषणं परं स्यात्। हे भक्तवत्सल मुरारे श्रीकृष्ण त्वं कुरु। कानि। मङ्गलशतानि मङ्गलानां शतानि तानि। कस्मिन् विषये। जयदेवकविराजे। [4]कवीनां राजा कविराजः जयदेवश्चासौ कविराजश्चेति तस्मिन्। किम्भूते। भणति। पुनः। किम्भूते। विहितपद्मावतीसुखसमाजे। नेत्रापाङ्गचालनचुम्बनालिङ्गनाद्यनेकरूपस्य सुखस्य समाजः समूहः विहितः कृतः पद्मावत्याः सुखसमाजो येन स तथा तस्मिन् ।

त्वां चित्तेनेत्यादि ।

त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो भृशं तापितः
कन्दर्पेण च पातुमिच्छति सुधासंबाधबिम्बाधरम्।
अस्याङ्कं तदलङ्कुरु क्षणमिह भ्रूक्षेपलक्ष्मीलव-
क्रीते दास इवोपसेवितपदाम्भोजे कुतः संभ्रमः ॥९॥

हे राधे तत्तस्मात् [5]कारणात् तव सुधासम्बाधबिम्बाधरम् अयं श्रीकृष्णः पातुमिच्छति वाञ्छति । सुधासम्बाधो घनीभूतामृतसमूहः स चासौ बिम्बाधरश्चेति स तथा तम्। सरससुपक्वविद्रुमाकारबिम्बफलानुकारी अधरोष्ठचुम्बनरसमित्यर्थः। कथम्भूतोऽसौ वासुदेवः। अतिश्रान्तः अतिशयेन प्रयासयुक्तः। किं कुर्वन्। वहन् धारयन् । काम् । त्वाम्। केन। चित्तेन [5]स्वचेतसि। न

1) B drops वल्लयो। 2) B चासौ पीनजघना। 3) P विशेषणपरं। 4) B कवीनां राजा इति कविराजः तेषां राजा इति राजराज जयदेवश्चासौ कविराजराजश्चेति तस्मिन्।
5) B drops कारणात्।

केवलमतिश्रान्तः। भृशमत्यर्थं तापितश्च। केन। कन्दर्पेण। ननु ममेमां त्रिभुवनविषयपराङ्मुखजनजयपताकां कटाक्षेणापि नवीकृत इत्याशयः। यतः। हे सखि! दासे सेवकजनेऽस्मिन् कुतः संभ्रमः कोपारम्भः। भयोद्वेगादरार्थः संभ्रमः। किम्भूते। सेवितपदाम्भोजेऽपि सेवितं पदाम्भोजं चरणकमलं येन स तथा तस्मिन्। पुनः किम्भूते। भ्रूक्षेपलक्ष्मीलवक्रीते। भ्रुवः क्षेपः तस्य लक्ष्मीः शोभा तस्याः लवो लेशः तेन क्रीतस्तस्मिन्। अथवा। भ्रूक्षेपलक्ष्मीनवक्रीते। नवक्रीते दासदासीविषये सर्वेषामादरो भवतीत्यर्थः।

[1]उत्तरगीतस्य प्रसङ्गमाह-सा सेत्यादि।

सा ससाध्वससानन्दं[2] गोविन्दे लोललोचना।
सिञ्जानमञ्जुमञ्जीरं प्रविवेश [3]निवेशनम् ॥७॥

सा राधा। ससाध्वसम् आनन्दो हर्षातिशयः सः [4]तं निकुञ्जमन्दिरं प्रविवेश। साध्वसं भयं तेन सह वर्तमानं ससाध्वसम् [5]सानन्दं च यत्कर्म तत्तथा। [? ससाध्वसमिति। आनन्दो हर्षातिशयः तेन सह वर्तमानं सानन्दम्। साध्वसं भयं तेन सह वर्तमानं ससाध्वसं सानन्दं च यत्कर्म तत्तथा, (निवेशनं) निकुञ्जमन्दिरं प्रविवेश।] कथम्भूता सा। गोविन्दे लोललोचना लोले चञ्चले लोचने यस्याः सा तथा पुनः कथं यथा स्यात्। सिञ्जानमञ्जुमञ्जीरं यथा स्यात्। सिञ्जानं शब्दायमानं मञ्जु सुन्दरं मञ्जीरं नूपुरं [6]यस्मिन् कर्मणि तत्तथा तत्। ननु रतिकोविदोऽसौ हरिः। अनेकनारीदीर्घरतेनाप्यसंतुष्टः कथं मया अबलयैकाकिन्या आराधनीयो रमणीय इति साध्वसध्वनिः। यद्यनेन नारायणेन सह सुरतक्रिया भवेत् तर्हि चतुःषष्टिकामकलानां सर्वासां त्रैलोक्यस्त्रीणामुपरि सर्वोत्कर्षरूपाढ्यगात्राणां मम यथार्थसाफल्यमिति सानन्दकरणध्वनिरिति स्वचेतसि मत्वा दूतीवचनात् राधा निकेतनं प्रविष्टेत्यर्थः।

[7]वैराडी रागे। यतिताले।

राधावदनेत्यादि।

राधावदन[8]विलोकनविकसितविविधविकारविभङ्गम्।
जलनिधिमिव विधुमण्डलदर्शनतरलिततुङ्गतरङ्गम् ॥१॥
हरिमेकरसं चिरमभिलषितविलासम्।
सा ददर्श गुरुहर्षवशंवदवदनमनङ्ग[9]निवासम् ॥

राधा हरिं ददर्श। किम्भूतं हरिम्। एकरसम् [10]एकोऽद्वितीयश्चासौ रसश्चेति वर्तते यस्मिन् स तथा तम्। अतिशयकामाभिलाषसंयुक्तमित्यर्थः। अथवा

1) B उत्तरगीतप्रसङ्गमाह। 2) A,B °मानन्दे। 3) B निकेतनम्। 4) A,B तेन। B °मन्दिरे। 5) A सानन्दं यथा स्यात्। 6) A यत्र यस्यां क्रियायां तत्। 7 A विराडीरागे; B विराडीरागेण गीयते एकतालीताले। अभिसारिकैव नायिका। 8) B °विलोकित° 9) A °विलासम्। 10) A एकोऽद्वितीयो रसो वर्तते यस्मिन् स तम्; B एकश्चासौ रसश्चेति वर्तते यस्मिन् स तथा तम् अतिशयकाभिलाषसंयुक्तम् इत्यर्थः। अथवा एकस्मिन् रतिसुखे रसो रागो यस्य तथा।

एकस्मिन् रतिसुखे रसो रागो यस्य स तथा तम्। पुनः किम्भूतम्। चिरमभिलषितविलासम्। चिरं चिरकालम् आसाद्य अभिलषितो विलासो रतिकेलिर्येन स तथा तम्। पुनः किम्भूतम्। राधावदनविलोकनविकसितविविधविकारविभङ्गम्। विविधो नानाप्रकारश्चासौ [1]खेदादिविकारश्चेति। राधायाः वदनं तस्य विलोकनं दर्शनं तेन विकसितः प्रकटितः स चासौ विविधविकारश्च तेन विभङ्गं जृम्भणादिर्यस्मिन् स तथा तम्। कमिव। जलनिधिमिव। किम्भूतम्। विधुमण्डलदर्शनतरलिततुङ्गतरङ्गं विधोश्चन्द्रस्य मण्डलं तेन तरलिता वर्धितास्तुङ्गाः। उच्चास्तरङ्गाः ऊर्मयो यस्मिन् स तथा तम्। पुनः किम्भूतं हरिम्। गुरुहर्षवशंवदवदनं गुरुर्गरिष्ठश्चासौ हर्ष आनन्दश्चेति तस्य वशंवदम् [2]अनुसारि वदनम् आननं यस्य स तथा तम्। [3]मुखं स्वकीयप्रसन्नताचिह्नवद्फलज्ञापकमित्यर्थः। पुनः किम्भूतम्। [4]अनङ्गनिवासं कन्दर्पवसतिस्थानम्। यद्वा अनङ्गविकाशं प्रवुद्धकन्दर्पमित्यर्थः।

हारममलेत्यादि।

हारममलतरतारमुरसि दधतं [5]परिरभ्य विदूरम्।
स्फुटतरफेनकदम्बकरम्बितमिव यमुनाजलपूरम् ॥२॥

पुनः किम्भूतम्। उरसि वक्षसि हारं दधतं वहन्तम्। किम्भूतम्। अमलतरतारम् अतिशयेनामलः अमलतरः स चासौ तारो [6]मुक्ताशुद्धिर्यस्मिन् स तथा तम्। किं कृत्वा दधतम्। परिलम्ब्य अवमुच्य। कथं यथा भवति। विदूरं अत्यधः यथा स्यात्तथा। कमिव। यमुनाजलपूरमिव यमुनायाः जलं तस्य पूरः समूहस्तम्। किम्भूतम्। स्फुटतरफेनकदम्बकरम्बितं स्फुटतराश्च ते फेनाश्च तेषां कदम्बः समूहः तेन करम्बितो युक्तस्तम्।

श्यामलेत्यादि।

श्यामलमृदुलकलेवरमण्डलमधिगतगौरदुकूलम्।
नीलनलिनमिव पीतपराग[7]पटलभरवलयितमूलम् ॥३॥

पुनः किम्भूतम्। श्यामलमृदुलकलेवरमण्डलं श्यामलं च तन्मृदुलं कोमलं च एवं विशिष्टं कलेवरस्य शरीरस्य मण्डलं यस्य स तथा तम्। पुनः किम्भूतम्। अधिगतगौरदुकूलम् अधिगतं परिहितं गौरं पीतं दुकूलं कौशेयं येन स तथा तम्। किमिव। नीलनलिनमिव नीलं च तत् नलिनं चेति। किम्भूतम्। पीतपरागपटलभरवलयितमूलं पीतश्चासौ परागश्चेति तस्य पटलं निकुरुम्बं तस्य भरः आधिक्यं तेन वलयितं परिवेष्टितं मूलं यस्य स तथा तम्। नीलोत्पलं यदा पीतपरागेण वेष्टितं भवति तदा नीलनलिनं भवतीत्याशयः। उपमालङ्कारः।

---

1) A स्वेदादि°। 2) B अनुकारि। 3) B drops from मुखं to यद्वा। 4) A drops from अनङ्ग° to यद्वा। 5) B परिलम्ब्य विदूरम्। 6) A,B मुक्ताबुद्धिर्यस्मिन्। 7) A °विमलतरवलयित°।

तरलेत्यादि ।

तरलदृगञ्चलचलनमनोहरवदनजनितरतिरागम् ।

स्फुटकमलोदर[1]खेलितखञ्जनयुगमिव शरदि तडागम् ॥४॥

पुनः किम्भूतम् । तरलदृगञ्चलचलनमनोहरवदनजनितरतिरागं मनोहरं वदनं चेति तरलौ च तौ चञ्चलौ दृगञ्चलौ नयनप्रान्तौ च तयोश्चलनं तेन मनोहरं वदनं च तेन जनितः उत्पादितो रतिरागो येन स तथा तम् । अर्थात् राधायाः । शरदि शरत्काले । तडागमिव सरोवरमिव । किम्भूतम् । स्फुटकमलोदरखेलितखञ्जनयुगं खञ्जनः पक्षिविशेषः तस्य युगं यस्मिन् तडागे तत्तथा तत् ।

वदनेत्यादि ।

वदनकमलपरिशीलनमिलितमिहिरसमकुण्डलशोभम् ।

स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभम् ॥५॥

पुनः किम्भूतम् । वदनकमलपरिशीलनमिलितमिहिरसमकुण्डलशोभं मिहिरः सविता तेन समे समाने कुण्डले मिलितवदनमेव कमले यस्या स तथा तम् । पुनः किम्भूतम् । स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभं समुल्लसितः सम्यग्विकसितश्चासौ अधरपल्लवश्च तस्मिन्निबद्धा स्मितरुचिः शोभा तया रुचिरः सुन्दरश्चासौ समुल्लसितोऽधरपल्लवश्च तेन कृतो रतिलोभो येन स तथा तम् ।

शशीत्यादि ।

शशिकिरणच्छुरितोदरजलधरसु[2]न्दरसकुसुमकेशम् ।

[3]तिमिरोदितविधुमण्डलनिर्मलमलयजतिलकनिवेशम् ॥६॥

पुनः किम्भूतम् । शशिकिरणच्छुरितोदरजलधरसुन्दरकुसुमसुकेशं सुष्ठु शोभना अतिसुलोलाश्च ते केशाश्च कुसुमैर्युक्ताः सुकेशाः, शशी चन्द्रमाः तस्य किरणा अंशवः तैः च्छुरितं संघृष्टं मिश्रितम् उदरं यस्य स तथा चासौ जलधरो मेघश्च तद्वत् [सुन्दराः] सुकुमाराः कुसुमसुकेशा यस्य स तथा तम् । पुनः किम्भूतम् । तिमिरोदितविधुमण्डलनिर्मलमलयजतिलकनिवेशं मलयजं चन्दनं तस्य तिलकः तिमिरे घने तमसि उदितं विधोश्चन्द्रस्य मण्डलं तद्वन्निर्मलश्चासौ मलयजतिलकश्च तस्य निवेशो यस्य स तथा तम् ।

विपुलेत्यादि ।

विपुलपुलकभरदन्तुरितं रतिकेलिकलाभिरधीरम् ।

मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरम् ॥७॥

पुनः किम्भूतम् । विपुलपुलकभरदन्तुरितं विपुलो महान् पुलकः तस्य भरो रोमाञ्चातिशयः तेन दन्तुरितः व्याप्तः स तथा तम् । पुनः किम्भूतम् । मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरं मणीनां गणो निचयः तस्य किरणाः अंशवः तेषां समूहः तेन [4]समुज्ज्वलानि च तानि भूषणान्यङ्गदवलयकिरीटादीनि

---

1) A °खेलन° । 2) A,B सुन्दरकुसुमसुकेशम् । 3) A तिमिरोधरविधुमण्डलमर्दित° । 4) A,B समुज्ज्वलितानि ।

तैः सुभगं सुन्दरं शरीरं यस्य स तथा तम् । [1]पाठान्तरे । किम्भूतम् । भूषणमणिगणकिरणविशङ्कितविरहदहनपरिवारं भूषणानां मणिगणः समूहः तस्य किरणाः अंशवः तैः विशङ्कितो विशेषेण शङ्कायुक्तो विरहदहनो विरहाग्निस्तस्य परिवारो यस्य स तथा तम् ।

श्रीजयदेवेत्यादि ।

श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारम् ।
प्रणमत हृदि विनिधाय हरिं सुकृतोदयसारम् ॥८॥

हे भक्तजनाः हरिं श्रीकृष्णं हृदि अन्तःकरणे सुचिरं विनिधाय प्रणमत । किम्भूतम् । [2]सुन्दरमतिशयेन अतिसुन्दरं शोभनं विभवविभूषणभारम् । भूषणानां भारः समूहो विभव ऐश्वर्यम् अतिशोभितो विभवविभूषणभारो यस्य स तथा तम् । पुनः किम्भूतम् । श्रीजयदेवभणितम् । अथवा श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारम् । श्रीजयदेवस्य भणितं गीतं तस्य विभवः तेन द्विगुणीकृतो भूषणभारो यस्य स तथा तम् । पुनः किम्भूतम् । सुकृतोदयसारं पुण्योद्गमस्य बलमित्यर्थः । सुकृतस्य पुण्यस्य उदयः उत्पत्तिः तस्य सारः सारभूतं कारणं ददर्शेत्युक्तम् ।

तत्र दर्शनान्तरं जातमर्थं श्लोकाभ्यां दर्शयन्नाह श्रीजयदेवकविः, अतिक्रम्येति ।

अतिक्रम्यापाङ्गं श्रवणपथपर्यन्तगमन-
प्रयासेनेवाक्ष्णोस्तरलतरतारं[3] पतितयोः ।
इदानीं राधायाः प्रियतमसमालोकसमये
[4]पपात स्वेदाम्बुप्रसर इव हर्षाश्रुनिकरः ॥८॥

इदानीं राधायाः अक्ष्णोः नयनयोः हर्षाश्रुनिकरः पपात । हर्षेण अश्रूणि तेषां निकरः आनन्दाश्रुसमूह इत्यर्थः । इदानीमिति किम् । इह प्रियतमसमालोकसमये अतिशयेन प्रियो वल्लभः प्रियतमः तस्य आलोको दर्शनं तस्य समयः क्षणः तस्मिन् । क इव । स्वेदाम्बुप्रसर इव । स्वेदरूपं अम्बु [5]पानीयं तस्य प्रसर इव । केनेव । अपाङ्गं नेत्रान्तम् अतिक्रम्य श्रवणपथपर्यन्तप्रयासेनेव । श्रवणयोः श्रोत्रयोः पन्थाः श्रवणपथः तस्य पर्यन्तः परिसमाप्तिः तत्र गमनं तेन प्रयासेनेव प्रयासजेनेव । कथम्भूतयोः अक्ष्णोः तरलतरतारं यथा स्यात्तथा पतितयोः प्राप्तयोः चञ्चलाक्षिकनीनिकम् । 'कूर्चमस्त्री भ्रुवोर्मध्यं तारकाक्ष्णः कनीनिका' इत्यमरः ।

---

1) B drops from पाठान्तरे to स तथा तम् । 2) B सुन्दरं शोभनविभवविभूषणभारम् । 3) A °तारमिति तयोः । B °भावं गमितयोः । 4) A प्रयातः स्वेदांप्रसर इव । 5) A drops पानीयं ।

भजन्त्यास्तल्पेत्यादि ।

भजन्त्यास्तल्पान्तं कृतकपटकण्डूति[1]पिहित-
स्मितं याते गेहाद् बहिर[2]वहितालीपरिजने ।
प्रियास्यं पश्यन्त्याः स्मरशर[3]समाकूतसुभगं
सलज्जा लज्जापि व्यगमदिव दूरं मृगदृशः ॥९॥

इति श्रीगीतगोविन्दे वास(? राधा)केशवयोर्वर्णने
सानन्ददामोदरो नामैकादशः सर्गः ।

सायंकाले कथितुं न शक्यते । पुनर्वदति कविः । मृगदृशो राधायाः लज्जापि सलज्जा दूरं व्यगमत् । लज्जया सह वर्तत इति सलज्जा । कथम्भूतायाः राधायाः । कृतकपटकण्डूति[4]पिहितस्मितं यथा स्यात्तथा । तल्पान्तं शय्यासमीपं भजन्त्याः । कपटेन धूर्तत्वेन कृता या कण्डूतिः श्रवणकण्डूयनं तया [5]पिहितं च स्मितं च तद् हास्यं यस्मिन्कर्मणि तत्तथा तत् । [6]अनेनोक्तेन किं प्रयोजनम् । कक्षामूलप्रकटशिथिलाञ्चलैकस्तनप्रदेशं दर्शयतीत्यर्थः । इङ्गितकामविकारध्वनिः । पुनः किम्भूतायाः । प्रियस्य श्रीकृष्णस्य आस्यं मुखं पश्यन्त्याः । किम्भूतमास्यम् । स्मरशर[7]समाकूतसुभगम् । स्मरस्य कन्दर्पस्य शरस्तेन [8]समाकूतः साभिप्रायविशेषः तेन सुभगं सुन्दरम् । तत् । [9]कस्मिन् सति । अवहितालीपरिजने [10]सालम्बने सखीसमूहे । गेहात् निकुञ्जमन्दिरात् बहिर्याति सति । अवहितश्चासौ आलीपरिजन[11]श्चेति तस्मिन् । आनन्देन सह वर्तमानः सानन्दो गोविन्दो गीयतेऽस्मिन् तत्तथा ।

इति श्रीगीतगोविन्दटीकायां वास(? राधा)केशवयोर्वर्णने
सानन्ददामोदरो नामैकादशः सर्गः ।

---

1) A °विहिता(त)स्मितं याते संगाद्बहिरवहितालीपरिजनौ । 2) B °रिवहितालीपरिजने । 3) A °शरसमाकृत°; B °स्मरपरवशाकूत° । 4) A °विहितं । 5) A विहितं 6) B drops from अनेनोक्तेन to °कामविकारध्वनिः । 7) A °स्रजाकूरु° । B °समाकुल° । 8) A । समाकूलः B समाकूलं । 9) A क्व सति । 10) A सावधानसखीसमूहे । 11) A °गोविन्दो ।

# द्वादशः सर्गः[1]

सुप्रीतपीताम्बरः ।

गीतावतारश्लोकमाह-गतवतीत्यादि ।

गतवति सखीवृन्देऽमन्दत्रपाभरनिर्भर-
स्मरपरवशाकूतस्फीतस्मितस्नपिताधराम् ।
सरसमलसं दृष्ट्वा [2]राधां मुहुर्नवपल्लव-
प्रसवशयने निक्षिप्ताक्षीमुवाच हरिः प्रियाम् ॥१॥

हरिः श्रीकृष्णः यदग्रे वक्ष्यमाणं प्रियां राधां प्रत्युवाच । किं कृत्वा । सरसं सरागं यथा स्यात्तथा सुरताभिलाषिणीं तां दृष्ट्वा । किम्भूतां राधाम् । अलसं सालसं यथा भवति तथा । मुहुर्वारंवारं नवपल्लवप्रसवशयने निक्षिप्ताक्षीं नवं च तत्पल्लवं चेति प्रसवाणि पुष्पाणि च तयोः शयनं शय्या तस्मिन् निक्षिप्ते [3]प्रोज्झिते अक्षिणी यया सा तथा ताम् । न केवलं दृष्ट्वा, एवम्भूतां स्पृष्ट्वा । आलिङ्गनादिकं विधाय च । पुनः कथम्भूताम् । [अ]मन्दत्रपाभरनिर्भरस्मरपरवशाकूतस्फीतस्मितस्नपिताधरां त्रपायाः लज्जायाः भरोऽतिशयः [अ]मन्दश्चासौ त्रपाभरश्च तेन निर्भरस्मरपरवशात् तदायत्तत्वं तच्च तत् आकूतं रत्याभिप्रायः तेन स्मितं तेन स्नपितः आर्द्रीभूतः अधरो यस्याः सा तथा ताम् । कस्मिन् सति । सखीवृन्दे गतवति सति । सखीनां वृन्दं समूहः तस्मिन् गतवति सति । उवाचेत्युक्तम् ।

[4]विभासरागेण गीयते । एकतालिताले ।

[5]तद् दर्शयति किसलयेत्यादि ।

किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशम् ।
तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशम् ॥१॥
क्षणमधुना नारायणमनुगतमनुसर [मां] राधिके ॥ ध्रुवपदम् ॥

[6]हे कामिनि, किसलयशयनतले चरणकमल (चरणनलिन) विनिवेशं कुरु । पल्लवरचितशय्यायां चरणारविन्दं निधेहि तव पदपल्लववैरिः पराभवमनुभवतु ।

---

1) P does not present the textual verses; it gives only the portion of the commentary. A gives only a fragment of the text and the commentary—and that too not satisfactorily-belonging to Canto XII. 2) A स्पृष्ट्वा । B भूयो । 3) A, B प्रेरिते । 4) A विभासरागेण गीयते; B विभासरागेण गीयते रागलक्षणात् । एकतालिताले । 2) A,B drop तद् । 6) P drops from हे कामिनि to कुरु इत्यादि ।

यद्वा। तव पदपल्लववैरि पल्लवशयनं तत् पराभवं पराजयं प्राप्नोतु मर्दनं प्राप्नोतु। कीदृशं शयनम्। सुवेशम्। सुन्दरं क्षणं क्षणमात्रं नारायणं मामनुगतमत्यादरतया प्राप्तमनुसर अनुसारं कुरु हे राधिके इति [1]सम्बोधनम्।

हे राधिके। रो मानाग्निः रागः तेनाधिके। इति सख्युपदेशं स्मारयती पूर्वाष्टपदीप्रतिपादितम्। त्वं माम् अनुसर सेव्यताविषयीकुरु। ननु मां प्रति सख्येवमुपचारश्चेति त्वया ज्ञातं तत्राह। नारायणमिति। नारं जीवसमूहः अयनमाश्रयो यस्य स तथा तम्। सर्वान्तर्यामिणमिति। तेन सर्वान्तर्यामितया मया ज्ञातमिति भावः। अनुगतमिति अनुसृतम्। क्षणमिति। राधा मामनुसरति वदति प्रत्युत्तरयति। हे कृष्ण त्वं सर इतो गच्छेत्यर्थः। ननु कामाग्निसंतप्तोऽहं क्व गच्छामि तत्राह। राधिकेति। रः कामस्तेनाधिव्यथा तस्य के प्रकाशे सतीति शेषः। नारायणं नारा आपस्तासामयनमाश्रयं निधिमिति यावत् जानीहीत्यर्थः। तथा चोपजलधिं नारायणं कामाग्निसन्तापहाराय याहीति भावः। नन्वग्नितापहारकत्वं भवतु जलधेः। कामाग्निनाशकत्वं तु कुतः। तत्राह। अनुगतमिति। अनुगता अनुसृता मा लक्ष्मीस्तत्पुत्री येन स तथा। तस्य संबोधनं लक्ष्मीकान्तेत्यर्थः। कृष्णो राधां प्रत्युपदिशति। हे कामिनि।

करकमलेनेत्यादि।

करकमलेन करोमि चरणमहमागमितासि विदूरम्।
क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतसूरम् ॥२॥

यदि त्वं दुःसख्या विदूरं दूरे आगमितासि आनीतासि तत्प्रत्युपकारं करकमलेन चरणं करोमि चरणसंवाहनं करोमि। अतस्त्वमपि क्षणं क्षणमात्रं शयनोपरि मां यथा नूपुरमुपकुरु। कथम्भूतं नूपुरम्। अनुगतसूरम् अनुगतः उपमानीकृतः सूर्यो येन।

वदनेत्यादि।

वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलम्।
विरहमिवापनयामि पयोधररोधकमुरसि दुकूलम् ॥३॥

अन्यच्च। तव वदनमेव सुधानिधिश्चन्द्रः तस्मात् अमृतम् अनुकूलं मधुरं वचनं वागमृतं वचनेन हृद्गतं विरहं परस्परवियोगजनितां हृदयव्यथां तथा पयोधररोधकम् आच्छादकं दुकूलम् उरसि यत्तदपनयामि दूरीकरोमि।

प्रियेत्यादि।

प्रियपरिरम्भणरभसवलितमिव पुलकितमन्यदुरापम्।
मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापम् ॥४॥

किञ्च। कुचकलशं मम वक्षसि स्थापय। मनसिजतापं कामज्वरदाहं शोषय शान्तं कुरु। कथम्भूतं कुचकलशम्। प्रियापरिरम्भणरभसवलितमिव पुलकितं

प्रियस्य नायकस्य परिरम्भणमालि[ङ्ग]नं तस्य वेगेन प्रेरितमिव रोमाञ्चितम्। पुनः कीदृशम्। अन्यदुरापम्। अन्यस्य दुरापं प्रियव्यतिरिक्तस्य कस्यापि न प्राप्तुं शक्यम्।

अधरेत्यादि।

अधरसुधारसमुपनय भामिनि जीवय मृतमिव दासम्।
त्वयि विरहितमनसं विरहानलदग्धवपुषमविलासम् ॥५॥

हे भामिनि, अधरसुधारसमुपनय। अधरामृतं देहि। तेन मूर्च्छितमिव दासं मां जीवय। कीदृशम्। विरहानलदग्धवपुषमत एव अविलासं विलासशून्यम्। पुनः कीदृशम्। त्वयि विरहितमनसम्। विरहानलदग्धशरीरमत अविलासं विलासशून्यम्।

शशिमुखीत्यादि।

शशिमुखि मुखरय मणिरशनागुणमनुगुणकण्ठनिनादम्।
श्रुतियुगले पिकरुतविकले मम शमय चिरादवसादम् ॥६॥

किञ्च। हे शशिमुखि, मम श्रुतियुगले मणिरशनागुणं मुखरय। कथम्भूते श्रुतियुगले। पिकरुतविकले। कीदृशं मणिरशनागुणम्। अनुगतं कण्ठनिनादम्। अनुरन्वये। पिकरुतेन विकलं विह्वलं यन्मम श्रुतियुगलं तस्मिन् मणिरशना मणिमयकटिमेखला तस्यानुगुणं शब्दं कण्ठनिनादानुगुणं कण्ठगं नादमनुकूलं मुखरय मुखरीकुरु। मम चिरकालविरहजनितमवसादं खेदं शमय नाशय।

मामित्यादि।

मामतिविफलरुषा विवशीकृतमवलोकितमधुनेदम्।
लज्जितमिव नयनं तव विरमति विसृज वृथा रतिखेदम् ॥७॥

किञ्च। अधुना मां प्रति अतिविफलरुषा निष्फलेन रोषेण इदमवलोकितम्। मीलितलज्जितमिव नयनं विरमतु। कथम्भूतं माम्। विवशीकृतम्। स्वतः त्वदधीनम्। रतिखेदं रत्यर्थं खेदं विसृज दूरीकुरु।

श्रीजयदेवेत्यादि।

श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदम्।
जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदम् ॥८॥

श्रीजयदेवस्य भणितं गीतम् अनुपदं निगदितः श्रीकृष्णस्य मधुरिपोर्मोदः आनन्दलीला यत्र एतादृशं गीतम् इदं रसिकजनेषु ऐकान्तिकरहस्ये विजनेषु मनोहरः रतिरसः तस्य भावविनोदं जनयतु प्रकटीकरोतु।

एवं रतिकेल्युपकरणसामग्रीं मुक्त्वा उपक्रमोक्तरहःकेलिपर्यवसायिमनोरमरतिरसभावविनोदमाह प्रत्यूहः पुलकान्तरेणेत्यादिभिः—

प्रत्यूहः पुलकान्तरेण निबिडाश्लेषे निमेषेण च
क्रीडाकूतविलोकितेऽधरसुधापाने कथानर्मभिः।
आनन्दाभिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभू-
दुद्भूतः स तयोर्बभूव सुरतारम्भः प्रियंभावुकः ॥२॥

स सुरताम्भः तयोः राधामाधवयोः बभूव। यस्मिन् सुरतारम्भे प्रत्यूहो विघ्नोपि प्रियंभावुकः प्रीतिजनकोऽभूत् स सुरतारम्भ उद्भूतः उद्भटो बभूव। यद्वा। यः पूर्वं सखि हे केशीमथनमुदारं मया सह रमयेति सखीं प्रति प्रार्थितं उत्कण्ठितया प्रार्थितः सः तथा अन्यत्र कार्यारम्भे मध्ये वा प्रत्यूहो दुःखजनको भवेदिहादौ मध्ये प्रत्यूहमुत्तरोत्तरं परस्परं प्रियंभावुकोऽभूदिति। कस्मिन् केन तत्राह। निर्विशेषे पुलकान्तरेण च। गाढालिङ्गने विपुलपुलकपृथुदन्तुरितमित्युक्तेन सात्त्विकाविर्भावत्वात्। क्रीडाकूतविलोकिते निमिषेण च अलसनिमीलितलोचनया पुलकावलिललितकपोलमिति पूर्वं प्रार्थितत्वेन स कथं प्रियंभावुकः तं काचिन्नेत्ररन्ध्रेण हृदिकृत्य निमील्य च। पुलकाङ्ग्युपगुह्यास्ते। किञ्च। असन्मुखावलोकनमाभिमुख्यमित्युक्तत्वाच्च तथा। क्रीडाविचाराविर्भावपूर्वकविलोकनेऽनुभवैकवेद्यानिर्वचनीयसुखातिशयजनकत्वात् तथोक्तं अधरसुधापाने कथानर्मभिः। पूर्वं प्रार्थिताधरसुधारसमुपनीय भामिनीतिदशम्यवस्था......

निवारिकाप्यधरसुधापाने कथानर्मभिः नानाप्रकारिका रसोत्पादिका पराङ्गनारमणविषयिणी "तदधरमधुरमधूनि पिबन्तम्" (सर्गः ६) इत्यादिरूपा श्लिष्यति कामपि चुम्बति कामपि(सर्गः १) इति दृष्टत्वादेवंविधाभिर्नर्मकथाभिः प्रत्यूहः प्रियंभावुकोऽभूत्। ततो मन्मथकलायुद्धेऽपि आनन्दाधिगमेन तथा। कामशास्त्रोक्तचतुरशीत्यासनरूपा मन्मथकलास्तासां युद्धे नखदन्तक्षतबाहुबन्धनादिभिर्विरतिममन्यमानः परस्परं जयाभिकाङ्क्षादिरूपे सुरतयुद्धे आनन्दाधिगमः अनिर्वचनीयानन्दरसार्णवधिगमस्तेन च तथा। एवंविधे तयोः सुरतारम्भे प्रत्यूहः प्रियंभावुकः प्रियंभवनशीलोऽभूदिति भावः।

न केवलं सुरतारम्भे प्रत्यूह एव प्रियंभावुकोऽभूत् किन्तु बन्धनादिकमपि काप्यनिर्वचनीयतृप्तिजनकं बभूव इत्यत्राह-दोर्भ्यां संयमित इति।

दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजै-
राविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः।

हस्तेनानमितः कचेऽधरमधुस्यन्देन संमोहितः
कान्तः कामपि तृप्तिमाप तदहो कामस्य वामा गतिः ॥३॥

अहो इत्याश्चर्यम् । कामस्य वामा गतिः कामस्य प्रेरणः वामाद्भुता गतिः । तद्गतेर्वामत्वं किमत आह । दोर्भ्यां संयमितः कान्तया बाहुभ्यां कान्तो बन्धितः । कं सुखम् आ समन्तात् अन्ति प्रापयति प्राप्नोति वा कान्तः । अन्त गतौ । स दोर्भ्यां दो अवखण्डने । तद्द्वाभ्यां बद्धः बन्ध पीडाजनकं कामपि तृप्तिजनकत्वादाश्चर्यमिति भावः । पयोधरभरेणापीडितः पयोधरभरातिशयेनासमन्तात् पीडितः । कामपि तृप्तिजनकत्वात् पयोधरोक्तः...शिनां नित्यानां तृप्तिजनको भवति कान्तस्यापीडनस्पर्शात्तथात्वादित्याश्चर्यमिति भावः । पाणिजैर्नखैरासमन्ताद् विद्धः दशनैः क्षताधरपुटः दन्तैः क्षतः अधरपुटो यस्य सः । श्रोणीतटेनाहतः रतिरमणे । आसनबन्धादिविशेषे श्रोणीतटेनासमन्ताद्धतस्ताडितः प्रापितो वा । हन हिंसागत्योः । हस्तेनानमितः कचेऽधरसुधापानेन संमोहितः । हस्तेन कृत्वा कचे शिखां गृहीत्वा ईषन्नमितः नम्रीकृत्वाधरपानेन अधरसुधापानं कारयित्वा सम्यक् मोहितः ।

"सत्यमेवासि यदि सुदति मयि कोपिनी देहि खरनखरशरघातम् ।
घटय भुजबन्धनं जनय रदखण्डनं येन वा भवति सुखजातम् ॥" ( सर्ग १० )

इत्यभीप्सितप्रार्थितत्वात् तथा कृतमिति भावः । इत्यादिभिः कान्तया परिभूतोऽपि कामप्यनिर्वचनीयां तृप्तिं सर्वेन्द्रियविषयिणीम् आप प्राप्तवान् । तस्मात् कामस्य वामा गतिरित्याश्चर्यमित्यर्थः ।

एवं बहुविधचटुलत्वेन बहु संप्रार्थितं ततो न ज्ञातं तदाह वामाङ्केत्यादिभिः—

वामाङ्के रतिकेलिसंकुलरणारम्भे तया साहस-
प्रायं कान्तजयाय किञ्चिदुपरि प्रारम्भि यत्संभ्रमात् ।
निष्पन्दा जघनस्थली शिथिलिता दोर्वल्लिरुत्कम्पितं
वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिध्यति ॥४॥

वामाङ्क इति । रतिकेलिरेव संकुलरणः परस्पराहतसंग्रामस्तस्यारम्भे तया श्रीराधया कान्तजयाय कान्तस्योपरि साहसप्रायम् उत्साहपूर्वकं किञ्चिदनिर्वचनीयं यत् प्रारम्भि तत् संभ्रमात् संभ्रमजनितानन्दातिशयादायासात् । तस्या जघनस्थली पूर्वमतिचपलाभूत् सा निष्पन्दा गतिरहिता जाता । शिथिलिता दोर्वल्लिः पूर्वं दोर्भ्यां संयमितः पयोधरभरेणापीडितस्तया तस्या दोर्वल्लिः शिथिलता जाता । वक्ष उत् अधिकं कम्पितं सात्त्विकाविर्भावाद्वेपथुयुक्तं जातम् । पूर्वमनिमेषे क्रीडाकूतविलोकनपरेऽक्षिण्यास्तां तदक्षि निमीलितम् । जातौ एकवचनम् । पूर्वमेवं पौरुषरसः । स्त्रीणां पुंभावप्राप्तिरूपो रसः कथं केन प्रकारेण सिद्ध्यतीति भावः । कीदृशे । रतिकेलिसंकुलरणारम्भे माराङ्के रतिरणसंकुल-

त्वात् मिश्रितत्वाद् द्वयोर्विशेषणम्। रतिपक्षे मारः कामस्तस्याङ्के चिह्ने दोर्भ्यां संयमितादिकैरङ्किते। रणपक्षेऽपि तथा। मारः मारणं ताडनं श्रोणीतटेनाहननादिकैरङ्किते चिह्निते इति भावः। जघनस्थलीपदोक्त्या रतिरणभूमिः सूचिता। पौरुषरसोक्त्या विपरीतरत्युक्तता। रतिविपरीते राजसे सुकृतविपाके सख्युक्तत्वात्तथा। एवंविधः स्त्रीणां पौरुषरसः कुतः सिद्ध्यतीत्यर्थः।

ततस्तस्या रसावेशावसरे प्रियोऽधरं पीतवानित्याह-ईषन्मीलितेत्यादि।

ईषन्मीलितदृष्टि मुग्धविलसत्सीत्कारधारावशा-
दव्यक्ताकुलकेलिकाकुविकसद्दन्तांशुधौताधरम्।
शान्तस्तब्धपयोधरं भृशपरिष्वङ्गात् कुरङ्गीदृशो
हर्षोत्कर्षविमुक्तिनिःसहतनोर्धन्यो धयत्याननम् ॥५॥

ईषन्मीलितदृष्टीति। धन्यः कुरङ्गीदृशः आननं पिबति। आत्मानं धन्यंमन्यमान इति धन्यः प्रियः श्रीकृष्णः कुरङ्गी मृगी तस्या दृशीव चपले दृशौ यस्याः सा कुरङ्गीदृक् तस्याः श्रीराधायाः आननपानमशक्यं तत् कथं पिबतीत्याह। कीदृश्याः। हर्षोत्कर्षविमुक्तिनिःसहतनोः हर्षादानन्दातिशयाद्विशिष्टाया मुक्तिः तया सुखदुःखात्यन्ताभावरहितया निःसहा सहः सहनं, निर्गतः सहः यस्याः सा निःसहा, निःसहा तनुर्यस्याः। एवंविधायाः स्थिरीभूताया आननम्। कीदृशम्। मीलितदृष्टि मीलतीति मीलन्ती दृष्टिर्यस्मिन् तत्। चाञ्चल्यरहितदृष्टियुक्तम्। पुनः कीदृशम्। सीत्कारधारावशादव्यक्ताकुलकेलिकाकुविलसद्दन्तांशुधौताधरं सीत्कारस्य धारा अविच्छिन्नता तस्या वशादव्यक्ता अस्पष्टा आकुला अनवस्था या केलिस्तस्यां काकुः तया विकसद्भिर्दन्तांशुभिर्धौतो उज्ज्वलीकृतोऽधरो यस्मिन् तत्। एवंविधरसावेशयुक्ताया आननं पिबति। एवंविधः सन्नेवंविधाया आननपानादात्मानं धन्यं मन्यमानो धन्य इत्यर्थः। आननं पिबतीत्यत्राननस्य पानं न संभवति पानमधरामृतस्येति चेत्तदाननपानशब्दस्तु लाक्षणिकः यथा गङ्गायां घोषः प्रतिवसति। यथा गोदोहनं करोतीत्यत्र लक्षणा गोः स्तनसकाशाद्दुग्धदोहनं, गङ्गायास्तीरे घोषनिवासः तथाननसकाशादधरामृतपानमित्यर्थः सूचितः।

अथ प्रियायाः सुरतचिह्नशोभितवपुर्दर्शनेन प्रियस्य प्रमोदोत्सवमाह—तस्या इति।

तस्याः पाटलपाणिजाङ्कितमुरो निद्राकषाये दृशौ
निर्धौतोऽधरशोणिमा विलुलितस्रस्तस्रजो मूर्धजाः।
काञ्चीदाम दरश्लथाञ्चलमिति प्रातर्निखातैर्दृशो-
रेभिः कामशरैस्तदद्भुतमभूत् पत्युर्मनः कीलितम् ॥६॥

इत्यमुना प्रकारेण प्रातर्निखातैः कामशरैः पत्युर्दृशोर्लग्नैर्मनः कीलितमित्यद्भुतमभूद् । तस्याः श्रीराधायाः उरः पाटलपाणिजाङ्कितं पाटलपुष्पतुल्यैर्नखैश्चिह्नितम् । दृशौ निद्राकषाये तस्याः नेत्रे रात्रिजागरणान्निद्रया कलुषीकृते। अधरशोणिमा निर्धौतः प्रतिक्षणाधरपानादारक्तता निर्धौता उज्ज्वलीकृता। सहजारक्तत्वाद् निर्गतधौतो निर्धूतोऽधरशोणिमा निर्गतधौतो जातः । प्रतिक्षणचुम्बनाद् धौतोऽपि न ज्ञात इति भावः । एवं सति पूर्वोक्तदन्तांशुधौताधरमित्युक्तौ विरोधापत्तिः तत्रायमाशयः । तत्र विकसद्दन्तांशुभिः अतिनैर्मल्यत्वात् कुन्दकलिकातुल्यविकसद्दन्तांशुभिः प्रतिबिम्बैः धौतः उज्ज्वलीकृतः । न तु धौत इति भावः । मूर्धजा विलुलितस्रस्तस्रजः विलुलिताः स्रस्ताः स्रजो येभ्यः, ग्रथितकुसुममालास्रंसनाद्विलुलिता इतस्ततः केशा जाताः । काञ्चीदाम दरश्लथाञ्चलं कटिमेखलाबन्धनमीषत् श्लथम् अञ्चलं प्रान्तभागं यत्र इत्येभिर्निखातैस्तीक्ष्णैः कामशरैः पत्युर्दृशोर्लग्नैः मनः कीलितम् । अन्यत्र लग्नैरन्यत् कीलितमित्याश्चर्यमित्यर्थः ।

ततोऽवस्थान्तररसविशेषमाह—व्यालोलः केशपाश इति ।

व्यालोलः केशपाशस्तरलितमलकैः स्वेदमोक्षौ कपोलौ
क्लिष्टा बिम्बाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः ।
काञ्चीकान्तिर्हताशा स्तनजघनपदं पाणिनाच्छाद्य सद्यः
पश्यन्ती सत्रपा सा तदपि विलुलिता मुग्धकान्तिर्धिनोति ॥७॥

पत्युर्मनः कीलितस्य भावनया विलुलितस्रग्धरेयं श्रीराधा मां धिनोति विशेषेण लुलिता स्रक् धरतीति तथाभूता मां पुनरत्युत्सुकं करोति । कीदृशी । स्तनजघनपदं सद्यः पाणिनाच्छाद्य सत्रपं मां पश्यन्ती । विलुलितस्रग्धरा केनैवंविधं करोति । स्तनं च जघनपदं च स्तनजघनपदं पाणिना एकेन स्तनमाच्छाद्य एकेन पाणिना जघनाग्रमाच्छाद्य । रसनादिव्यतिरेकेणानावृतत्वात् सलज्जं यथा स्यात् तथा मां पश्यन्ती धिनोति । केवलाङ्गदर्शनात् प्रीणयतीति भावः। किं कृत्वा । व्यालोलः केशपाशः विलुलितस्रक्तया विकीर्णकेशपाशः, अलकैस्तरलितं चूर्णकुन्तलैश्चञ्चलीभूतम्. कपोलौ स्वेदेन व्याप्तौ, बिम्बाधरश्री क्लिष्टा क्षता क्षतयुक्ता बिम्बवदधरश्रीः शोभा जाता । कुचकलशरुचा कान्त्यार्थात् मुक्ताहारालिङ्गनेऽन्तरायभूतत्वाद्यष्टिः सारिता तिरस्कृता । काञ्ची काञ्चिदाशां गता काञ्चिद्दिशं प्राप्ता सांनिध्याभावः स्तनजघनपदं सद्यः पाणिनाच्छाद्य सत्रपं रसावेशशैथिल्यादेवं निजाङ्गावलोकनान्मनः क्रीडाविशेषात् कलनात् सत्रपम् । एवंविधा सती मां पश्यन्ती तथा करोतीत्यर्थः ।

ततोऽवस्थान्तरमाह-इति मनसेति ।

इति मनसा सुप्रीतं सुरतान्ते सा नितान्तखिन्नाङ्गी ।
राधा जगाद सादरमिदमानन्देन गोविन्दम् ॥८॥

---

१ मुद्रितग्रन्थ 'अथ सहसेति' पाठः ।

इत्युक्तप्रकारेण मनसा निगदन्तं गोविन्दं सा सुरतान्ते सादरं जगाद । कीदृशी । नितान्तखिन्नाङ्गी । सा विलुलितस्रग्धरा पूर्वोक्तव्यालोलकेशपाशादियुक्ता श्रीराधा संसिद्धिरूपा पूर्वोक्तप्रकारयुक्ता पश्यन्ती सत्रपं मां विलुलितस्रग्धरेयं धिनोतीति मनसा नितरां गद्यन्तं कथयन्तं न तु मुखतः गोविन्दं स्वस्येन्द्रं सुरतान्ते नितान्तमतिशयेन खिन्नानि शिथिलिभूतान्यङ्गानि यस्याः सा सादरमिदं वक्ष्यमाणमानन्देन सोत्साहपूर्वकं नितरां जगाद ।

[1]रामकली (री) रागेण गीयते रूपकताले तथा गौडीरागे[2] ।

तदेवाह-कुरु यदुनन्दनेत्यादि ।

कुरु यदुनन्दन चन्दनशिशिरतरेण करेण पयोधरे ।
मृगमदपत्रकमत्र मनोभवमङ्गलकलशसहोदरे ॥१॥
निजगाद सा यदुनन्दने क्रीडति हृदयानन्दने ॥ ध्रुवम् ॥

कलशस्य सहोदरो भ्राता तस्मिन् कुम्भसमान इत्यर्थः । कथम्भूते यदुनन्दने । क्रीडति सति ।

अलिकुलेत्यादि ।

अलिकुलगञ्जनमञ्जनकं रतिनायकसायकमोचने ।
त्वदधरचुम्बनलम्बितकज्जल उज्ज्वलय प्रियलोचने ॥२॥

किञ्च हे प्रिय मम लोचने नयने अञ्जनकं कज्जलम् उज्ज्वलय व्यक्तं कुरु । पुनर्देहीति । किम्भूतम् । अलिकुलगञ्जनम् [3]अलीनां कुलं निचयस्तद्गञ्जयतीति तिरस्करोतीति तत्तथा । तत् । पुनः किम्भूतम् । त्वदधरचुम्बनलम्बितकज्जलं यस्मिन् तत् । अथवा केचिन्मते लोचने त्वदधरचुम्बनलम्बितकज्जले तव अधरस्त्वदधरः तेन चुम्बितं तेन लम्बितं प्रसृतं कज्जलं यस्मिन् तत्तथा तस्मिन् । पुनः किम्भूते लोचने । रतिनायकसायकमोचने रतिनायको [4]मदनः तस्य सायकाः कटाक्षा एव बाणाः [5]तेषां [6]मोचनं क्षेपणं येन धनुःस्वरूपेण तत्तथा । तस्मिन् ।

नयनकुरङ्गेत्यादि ।

नयनकुरङ्गतरङ्गविकासनिवासकरे श्रुतिमण्डले ।
मनसिजपाशविलासधरे शुभवेश निवेशय कुण्डले ॥

किञ्च । हे शुभवेश श्रीकृष्ण । शोभनो वेशः आकारो यस्य स तथा तस्य सम्बोधनं हे शुभवेश श्रीकृष्ण । त्वं कुण्डले विनिवेशय समारोपय । कस्मिन् । श्रुतिमण्डले कर्णप्रदेशे । पुनः किम्भूते । नयनकुरङ्गतरङ्गविकाशनिवासकरे ।

---

1) B opens thus:

अथ कान्ता रतिक्लान्ता मयि मण्डनवाञ्छया ।
निजगाद निराबाधा राधा स्वाधीनभर्तृका ॥

2) B adds अत्रापि स्वाधीनभर्तृका नायिका । 3) B अलीनां भ्रमराणां कुलं समूहम् । 4) B कामः । 5) B तेषां बाणानाम् । 6) B मोक्षणम् ।

नयन एव सुलोलचञ्चलत्वात् कुरङ्गौ [1]कृष्णमृगौ तयोस्तरङ्गः विसर्पणं तस्य विकाशः प्रकाशः [2]तस्य निवासो रोधनं सीमावधिस्तं करोतीति तत्तथा तस्मिन्। श्रुत्योः श्रवणयोः मण्डलं तस्मिन्। [3]पुनः किम्भूते। मनसिजपाश-विलासधरे मनसिजस्य मदनस्य पाशः तस्य विलासः शोभा तं धरतीति तथा तस्मिन्।

भ्रमरचयेत्यादि।

भ्रमरचयं रचयन्तमुपरि रुचिरं सुचिरं मम संमुखे।
जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे ॥४॥

किञ्च। हे प्रिय, मम संमुखे अग्रे स्थित्वा मुखे वदने अलकं कस्तूरिकादिपत्ररचनं [च] परिकर्मय प्रसाधय[4]। किम्भूतम्। नर्मजनकं नर्मलीलां जनयतीति संपादयतीति तथा तम्। किं कुर्वन्तमिव। उपरि मुखस्य उपरि सुचिरं सुविलम्बं यथा स्यात्तथा रुचिरं रमणीयं भ्रमरचयं रचयन्तमिव। इवशब्दस्य लोपो द्रष्टव्यः। किम्भूते मुखे। जितकमले सौन्दर्येण जितं कमलं येन तत्तथा तस्मिन्। पुनः किम्भूते। विमले निर्मले।

मृगमदेत्यादि।

मृगमदरसवलितं ललितं कुरु तिलकमलिकरजनीकरे।
विहितकलङ्ककलं कमलानन विश्रमितश्रमशीकरे ॥५॥

किञ्च। हे नाथ कमलानन। कमलवदाननं यस्य स तथा तस्य संबोधनं हे कमलानन। ममालिकरजनीकरे तिलकं कुरु। अलिकमेव रजनीकरश्चन्द्रः तस्मिन्। ललाटमलिकं गोधिरूर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियामित्यमरः। किम्भूते। विश्रमितश्रमशीकरे। श्रमः सुरतश्रमः तेन शीकरा नीरकणाः विश्रमिताः श्रमशीकरा यस्मिन् तत्तथा तस्मिन्। किम्भूतम्। मृगमदरसवलितं मृगमदः कस्तूरी तस्य रसोद्भवः तेन वलितः संवर्धितः समृद्धो वा तत्। पुनः किम्भूतम्। ललितं रमणीयम्। पुनः किम्भूतम्। विहितकलङ्ककलं कलङ्कस्य कला, विहिता कृता कलङ्ककला येन तत्तथा। श्यामत्वात्।

ममेत्यादि।

मम रुचिरे चिकुरे कुरु मानद मनसिजध्वजचामरे।
रतिगलिते ललिते कुसुमानि शिखण्डविखण्डकडामरे ॥६॥

किञ्च। हे मानद। [5]दोऽवखण्डने। मानं द्यति खण्डयतीति। [6]यद्वा। मानस्त्वात्माभिमानिता। सर्वोत्कर्षवर्तित्वमित्यर्थः। मानोन्नतिं ददातीति स तथा तस्य संबोधनं हे मानद। मम रुचिरे रमणीये चिकुरे कुन्तलनिचये कुसुमानि कुरु निवेशय। किम्भूते। मानसजध्वजचामरे मानसे हृदये जायत इति मानसजो

1) B कृष्णसारौ मृगौ 2) B तस्मिन्निवासे यस्मिन् तत्तथा। 3) B drops from पुनः to तथा तस्मिन्। 4) B adds रचय। 5) B drops दोऽवखण्डने धातुः। 6) B drops यद्वा ..मित्यर्थः।

[1]मदनस्तस्य ध्वजो केतुः ध्वजदण्डस्तस्य चामरं तस्मिन्। पुनः किम्भूते। रतिगलिते [2]रतौ सुरतसमये गलितः परिमुक्तस्तस्मिन्। पुनः किम्भूते। ललिते मनोहरे। पुनः किम्भूते। शिखण्डविखण्डकडामरे। शिखण्डस्य मयूरपिच्छजालस्य विखण्डकस्तिरस्कारी डामरः संभ्रमः शोभाविशेषो यस्य स तथा तस्मिन्।

सरसघनेत्यादि।

सरसघने जघने मम शम्बरदारणवारणकन्दरे।
मणिरसनावसनाभरणानि शुभाशय वासय सुन्दरे ॥७॥

किञ्च। हे शुभाशय। [3]शोभनः स्वच्छः आशयः अन्तःकरणं यस्यासौ तथा तस्य संबोधने हे शुभाशय। मम जघने मणिरसनाभरणानि वासयेति योजय। मणिभिर्युक्ता रसना मणिरसना च वसनं दुकूलं च तत् आभरणं च तानि। किम्भूते। सरसघने रसेन शृङ्गाररसेन सह वर्तत इति सरसं च तत् घनं निबिडं च तत् तस्मिन्। पुनः किम्भूते। शम्बरदारणवारणकन्दरे शम्बरं दैत्यं दारयतीति [4]शम्बरदारणः। 'शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः' इत्यमरः। स एव वारणो मत्तगजः तस्य कन्दरः क्रीडादरी तस्मिन्। पुनः किम्भूते। सुन्दरे मनोहरे।

श्रीजयदेवेत्यादि।

श्रीजयदेववचसि रुचिरे हृदयं सदयं कुरु [5]मण्डने।
हरिचरणस्मरणामृतनिर्मितकलिकलुषज्वरखण्डने ॥८॥

हे श्रीकृष्ण नारायण, त्वं हृदयं सदयं कुरु। [6]सह दयया (इति सदयम्)। कस्मिन्। श्रीजयदेववचसि। श्रीः शोभा [तया] युक्तस्य जयदेवस्य वचस्तस्मिन्। किम्भूते। रुचिरे रमणीये। पुनः किम्भूते। हरिचरणस्मरणामृतनिर्मितकलिकलुषज्वरखण्डने हरेश्चरणौ तयोः स्मरणं तदेवामृतं तेन [7]निर्मितं कलिकलुषं पापं तदेव ज्वरः संतापः तं खण्डयतीति तत्तथा तस्मिन्। [8]यद्वा तस्य खण्डनं निवर्तनं येन तत्तथा तस्मिन्। पुनः किम्भूते। मण्डने भूषणे। यद्वा हे जयदेव श्रीकृष्ण त्वं जय उत्कृष्टतया वर्तस्व। कस्मिन्। तस्मिन् जयदेवस्य वचसि। [9]ननु किमिति निवर्तितव्यमित्याशङ्क्य तत्र भक्तपराधीनत्वहेतुमाह। हे सदयहृदय। कस्मिन्। कुरुमण्डने कुरूणां यदुवंशानां मण्डनं युधिष्ठिरादि [10]अत्यन्तभक्तस्तस्मिन्। [11]किम्भूते। हरिचरणस्मरणामृतनिर्मितकलिकलुषज्वरखण्डने हरेश्चरणौ तयोः स्मरणं तदेवामृतं तेन निर्मितं कलिकलुषं पापं तदेव ज्वरः सन्तापः तस्य खण्डनं येन वचसा तत्तथा तस्मिन्।

---

1) B मारः तस्य। 2) B drops रतौ। 3) B drops from शोभनः to हे शुभाशय। 4) B शम्बरदारणः कामः स एव वारणो 5) B सज्जनमण्डने। 6) B drops सह दयया। 7) B कलियुगस्य कलुषं पापं तस्मात् ज्वरः 8) B drops यद्वा तस्य खण्डनं निवर्तनं येन तत्तथा तस्मिन्। 9) B drops ननु किमिति निवर्तितव्यमित्याशङ्क्य। 10) B भक्तस्तस्मिन्। 11) B drops from किम्भूते to वचसा तत्तथा तस्मिन्।

गीतार्थसंग्रहश्लोकमाह रचयेत्यादि ।

रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयो-
घटय जघने काञ्चीं मुग्धस्रजा [1]कबरीभरम् ।
कलय वलयश्रेणीं पाणौ पदे मणिनूपुरा-
विति निगदितः प्रीतः पीताम्बरोऽपि तथाकरोत् ॥९॥

राधया इति निगदितः उक्तः सन् पीताम्बरः श्रीकृष्णोऽपि तथा अकरोत् । किम्भूतः। प्रीतः हृष्टः । कथम् । इति। इतीति किम्। त्वं मम कुचयोः पत्रं मृगमदपत्रावलीं रचय कुरु । किञ्च । कपोलयोश्चित्रं कुरुष्व । [2]केन । करेण । किञ्च । जघने काञ्चीं घटय [3]नियोजय । किञ्च । कबरीभारं केशपाशं कुसुममालया अर्चय । अथवा कबरीभरे केशपाशे [4]स्रजं कुसुमसात्तीर्स (? कुसुमोत्तंसं) च बध्नामि (? बधानेति) किञ्च । पाणौ वलयश्रेणीं [5]वलयानां पङ्क्तिं कलय । [6]समारोपय । किञ्च । पादौ (? पदे) नूपुरौ पदे चरणयोः कुरु समारोपय ।

[7]यद्गान्धर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं
यच्छृङ्गारविवेकतत्त्वमखिलं काव्येषु लीलायितम् ।
तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतत्त्वात्मनः
सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः[8] ॥१०॥

[9]इति श्रीजयदेवकृता गीतगोविन्दे सुप्रीतपीताम्बरो नाम द्वादशः सर्गः ।

[10]इति श्रीगीतगोविन्दटीकायां स्वाधीनभर्तृकावर्णने सुप्रीतपीताम्बरो नाम द्वादशः सर्गः समाप्तः । श्रीकृष्णार्पणमस्तु । सं[व]त् १५६९ वर्षे शाके १४३४ प्रवर्तमाने लिखिता ।

---

पीताम्बरो नाम द्वादशः सर्गः १२ लिखितवान् जिरञ्जीववलदेवः । श्रीरस्तु ।

1) B कबरीभरे 2) B केन कारणेन । किञ्च । 3) B योजय । 4) B स्रजं कुसुमावलिसिञ्च वै बंधय (?) । 5) B वलयनां कङ्कणानां । 6) B समालोकय । 7) B यद्गन्धर्व ।
8) B adds the following stanza:—

सानन्दं नन्दसूनुर्दिशतु मितपरं संमदं मन्दमन्दं
राधामाधाय बाह्वोर्विवरमनु दृढं पीडयन् प्रीतियोगात् ।
तुङ्गौ तस्या उरोजावतनु-वरतनोर्निर्गतौ मा स्म भूतां
पृष्ठं निर्भिद्य तस्माद् बहिरिति वलितग्रीवमालोकयन् वः ॥

9) B इति श्रीगीतगोविन्दे सुप्रीतपीताम्बरो नाम द्वादशः सर्गः ॥१२॥

10) B इति श्रीगीतगोविन्दे महाकाव्ये कविश्रीजयदेवकृतौ टीकायां स्वाधीनभर्तृकावर्णने सुप्रीतपीताम्बरो नाम द्वादशः सर्गः । श्रीरस्तु ।

*

# ॥ परिशिष्टम्–१ ॥

## गीतगोविन्दस्थपद्यानां मातृकावर्णक्रमेणानुक्रमणी


| पद्यानि | पृष्ठानि | पद्यानि | पृष्ठानि |
|---|---|---|---|
| अक्ष्णोर्निक्षिपत् | ९५ | ईषन्मीलित | ११० |
| अङ्गेष्वाभरणं | ५९ | उन्मदमदन | १२ |
| अतिक्रम्यापाङ्गं | १०३ | उन्मीलन्मधु | १५ |
| अत्रान्तरे च कुलटा | ६० | उरसि मुरारे | ५२ |
| अत्रान्तरे मसृण | ८३ | कंसारिरपि | ३१ |
| अथ कथमपि | ७६ | कनकनिचय | ७२ |
| अथ तां गन्तुमशक्तां | ५६ | कति न कथितम् | ८१ |
| अथागतां | ६४ | कज्जलमलिन | ७७ |
| अथोत्सङ्ग | १९ | कथितसमयेऽपि | ६१ |
| अधरसुधा | १०७ | कन्दर्पज्वर | ४६ |
| अधिगतमखिल | ९३ | करकमलेन | १०६ |
| अनिलतरलकिसलय | ९३ | करतलताल | १८ |
| अनिलतरलकुवलय | ७१ | कापि विलासविलोल | १७ |
| अनेकनारी | १६ | कालियविषधर | ८ |
| अभिनवजलधरसुन्दर | १० | काश्मीरगौर | ९५ |
| अमलकमलदललोचन | ९ | किमिति विषीदसि | ८१ |
| अमृतमधुर | ७१ | किं करिष्यति | ३२ |
| अलसनिमीलित | २७ | किशलयशयन | २६ |
| अलिकुल | ११२ | कुरु यदुनन्दन | ११२ |
| अविरलनिपतित | ३९ | कुसुमचय | १७ |
| अहमिह निवसामि याहि | ६३ | कुसुमविशिख | ३९ |
| अहमिह निवसामि | ४८ | कुसुमसुकुमार | ६२ |
| अहह कलयामि | ६२ | केलिकला | १८ |
| आवासो विपिनायते | ४२ | कोकिलकलरव | २७ |
| आश्लेषादनु | ५४ | क्षणमपि विरहः | ४६ |
| इतस्ततस्ताम् | ३१ | क्षत्रियरुधिर | ५ |
| इति चटुलचाटु | ८७ | क्षम्यतामपरं | ३३ |
| इति मनसा सुप्रीतं | १११ | क्षितिरति | ४ |
| इह रसभणने | ७० | गणपति गुण | २५ |

| पद्यानि | पृष्ठानि |
|---|---|
| गतवति सखी | १०५ |
| गोपकदम्ब | २२ |
| घटयति सुघने | ६८ |
| घनचयरुचिरे | ६८ |
| घनजघन | ९२ |
| चञ्चलकुण्डल | ६५ |
| चन्दनचर्चित | १६ |
| चन्द्रकचारु | २२ |
| चरणकमल | ७७ |
| चरणरणित | २८ |
| चरणकिसलये | ६९ |
| चलमलय | ९७ |
| चिन्तयामि तदा | ३२ |
| छलयसि विक्रमणे | ५ |
| जनकसुता | ९ |
| जनयसि मनसि | ८१ |
| जलदपटल | २३ |
| जितबिस | ६८ |
| तरलदृगञ्चल | १०२ |
| तवेदं पश्यन्त्याः | ७९ |
| तव करकमलवरे | ४ |
| तत्किं कामपि | ६३ |
| तन्वि खिन्नम् | ३३ |
| तस्याः पाटल | ११० |
| त्यजति न पाणितलेन | ४४ |
| तानि स्पर्शसुखानि | ३६ |
| तामथ मन्मथखिन्नां | ८० |
| तामहं हृदि सङ्गताम् | ३३ |
| तालफलादपि | ८० |
| त्वदभिसरण | ५७ |
| त्वद्वाक्येन समं | ५४ |
| त्वमसि मम भूषणं | ८५ |
| त्वरितमुपैति | ५८ |
| त्वां चित्तेन | ९९ |
| दयितविलोकित | ६५ |
| दरविदलित | १५ |
| दशनपदं | ७८ |
| दहति शिशिर | ४९ |
| दिनमणिमण्डल | ८ |
| दिशि दिशि किरति | ४३ |
| दुरालोकस्तोक | ३० |
| दृशौ तव मदालसे | ८९ |
| दृश्यसे पुरतो | ३३ |
| दोर्भ्यां संयमितः | १०८ |
| ध्यानलयेन | ४१ |
| ध्वनति मधुप | ४९ |
| नयनकुरङ्ग | ११२ |
| नयनविषयमपि | ८३ |
| नवभवदशोक | ९७ |
| नामसमेतं | ५१ |
| नायातः सखि | ७० |
| निन्दति चन्दनम् | ३८ |
| निन्दसि यज्ञविधे | ६ |
| निभृतनिकुञ्जगृहं | २५ |
| नीलनलिनाभमपि | ८५ |
| पतति पतत्रे | ५१ |
| परिहर कृतातङ्के | ८७ |
| पाणौ मा कुरु | ३४ |
| पीनपयोधर | १७ |
| पूर्वं यत्र समं | ५० |
| पद्मापयोधर | १० |
| पश्यति दिशि दिशि | ५६ |
| प्रतिपदमिदमपि | ४१ |
| प्रत्यूहः पुलकान्तरेण | १०८ |
| प्रथमसमागम | २६ |
| प्रलयपयोधि | ३ |
| प्रविशतु हरिरपि | ७३ |
| प्रसरति शशधर | ६१ |
| प्रियपरिरम्भण | १०६ |
| प्रिये चारुशीले | ८४ |
| बन्धूकद्युति | ८९ |

| पद्यानि | पृष्ठानि |
| --- | --- |
| बहिरिव | ७८ |
| बाधां विधेहि | ७४ |
| भणति कविजयदेवे | ५० |
| भजन्त्यास्तालूपान्तं | १०४ |
| भवति विलम्बिनि | ५८ |
| भ्रमति भवान् | ७८ |
| भ्रमरचयं | ११३ |
| भ्रूचापे निहितः | ३५ |
| भ्रूपल्लवं | ३६ |
| मञ्जुतरकुञ्ज | ९६ |
| मणिमयमकर | २३ |
| मदनमहिपति | १३ |
| मधुतरल | ९८ |
| मधुमुदित | ९८ |
| मधुमुरनरक | ९ |
| मनोभवानन्दन | ७३ |
| मम मरणमेव | ६२ |
| मम रुचिरे | ११३ |
| माधविकापरिमल | १४ |
| मामतिविफल | १०७ |
| मामहह | ६२ |
| मामियं चलिता | ३२ |
| मुखरमधीरं | ५१ |
| मुग्धे मधुमथनम् | ९१ |
| मुग्धे विधेहि | ८८ |
| मुहुरवलोकित | ५७ |
| मृगमदरस | ११३ |
| मृगमदसौरभ | १३ |
| मेघैर्मेदुर | १ |
| म्लेच्छनिवह | ६ |
| यदनुगमनाय | ६१ |
| यदि हरिस्मरणे | ३ |
| यद्गान्धर्वकलासु | ११५ |
| यमुनातीर | ३८ |
| रचय कुचयोः | ११५ |
| रजनिजनित | ७६ |
| रतिगृहजघने | ६९ |
| रतिसुखसमय | २८ |
| रतिसुखसारे | ५० |
| रमयति सुदृशं | ७० |
| राधावदन | १०० |
| रासोल्लास | २० |
| रिपुरिव सखी | ७४ |
| ललितलवङ्ग | ११ |
| वदनकमल | १०२ |
| वदनसुधानिधि | १०६ |
| वदसि यदि किञ्चिदपि | ८३ |
| वपुरनुहरति | ७७ |
| वर्णितं जयदेवकेन | ३३ |
| वसति दशन | ४ |
| वसति विपिन | ४९ |
| वसन्ते वासन्ती | ११ |
| वहति च | ४० |
| वहति मलय | ४८ |
| वहसि वपुषि | ६ |
| वाग्देवता | २ |
| वाचः पल्लवय | ३ |
| वामाङ्के रतिकेलि | १०९ |
| विकचजलज | ६१ |
| विकसितसरसिज | ७१ |
| विकिरति मुहुः | ५४ |
| विगलितलज्जित | १३ |
| विगलितवसनं | ५२ |
| विततबहुवल्लि | ९९ |
| वितरसि दिक्षु | ५ |
| विपुलपुलकपालिः | ५९ |
| विपुलपुलकपृथु | ६६ |
| विपुलपुलकभर | १०२ |
| विपुलपुलकभुज | २३ |
| विरचितचाटुवचन | ९१ |
| विरहपाण्डुमुरारि | ६६ |
| विलिखति रहसि | ४० |

| पद्यानि | पृष्ठानि | पद्यानि | पृष्ठानि |
|---|---|---|---|
| विशदकदम्बतले | २४ | सकलभुवन | ७३ |
| विश्वेषामनुरञ्जनेन | १९ | सजलजलद | ७२ |
| विहितपद्मा | ९९ | सजलनलिनी | ८१ |
| विहरति वने | २१ | सञ्चरदधर | २१ |
| विहितविशद | ५७ | सत्यमेवासि यदि | ८४ |
| वृष्टिव्याकुल | ४७ | सभयचकितं | ५५ |
| वेदानुद्धरते | ७ | समुदितमदेन | ६७ |
| व्यथयति वृथा | ८८ | सरसघने | ११४ |
| व्यालोलः केशपाशः | १११ | सरसमसृणमपि | ४२ |
| शशिकिरण | १०२ | सा मां द्रक्ष्यति | ९४ |
| शशिमुखि | १०७ | सा रोमाञ्चति | ४४ |
| शृणु रमणीयतरं | ९२ | सा विरहे | ३८ |
| श्यामलमृदुल | १०१ | सा ससाध्वस | १०० |
| श्रमजलकणभर | ६६ | सुचिरमनुनयेन | ९१ |
| श्रितकमला | ८ | स्तनविनिहितमपि | ४२ |
| श्रीजयदेवभणित | १०७ | स्थलकमल | ८६ |
| श्रीजयदेवकवेरिदम् | ५८ | स्थलजलरुह | ७२ |
| श्रीजयदेवकवेरिदमुदित | ७ | स्निग्धे यत्परुषासि | ८२ |
| श्रीजयदेवकवेरिदं कुरुते | १० | स्फुरतु कुच | ८५ |
| श्रीजयदेवे | ५३ | स्फुरदतिमुक्त | १४ |
| श्रीजयदेवभणितमतिसुन्दर | २४ | स्फुरितमनङ्ग | ९३ |
| श्रीजयदेवभणितमतिललितम् | ८२ | स्मरगरलखण्डनं | ८६ |
| श्रीजयदेवभणितमधरीकृत | ९४ | स्मरशरसुभग | ९४ |
| श्रीजयदेवभणितमिदमतिशय | २९ | स्मरसमरोचित | ६४ |
| श्रीजयदेवभणितमिदमधिकं | ४१ | स्मरातुराम् | ४५ |
| श्रीजयदेवभणितमिति गीतम् | ४४ | हरिचरणशरण | ६३ |
| श्रीजयदेवभणितमिदमद्भुत | १८ | हरिपरिरम्भण | ६४ |
| श्रीजयदेवभणितमिदमुदयति | १५ | हरिरभिमानी | ५३ |
| श्रीजयदेवभणितरतिवञ्चित | ७८ | हरिरभिसरति | ८० |
| श्रीजयदेवभणितविभव | १०३ | हरिरिति हरिरिति | ४४ |
| श्रीजयदेवभणितहरिरमितम् | ६६ | हरिरुपयातु | ८२ |
| श्रीजयदेववचसि रुचिरे | ११४ | हस्तस्रस्तविलास | २९ |
| श्लिष्यति कामपि | १८ | हारममल | १०१ |
| श्लिष्यति चुम्बति | ५८ | हारावली | ९६ |
| श्वसितपवनम् | ४३ | हृदि बिशलता | ३४ |

# परिशिष्टम्–२ ॥

## टिप्पणिकाकृन्मानाङ्कोद्धृतकातन्त्रव्याकरणसूत्रवृत्तिगतवचनानां सूची

( प्रथमा संख्या पृष्ठाङ्कं निर्दिशति, अपरा पङ्क्तिं च । )

पृ. पं.

१ · २० "व्यभिचरति च" इतिवशात् अर्चितपदस्य [न] पूर्वनिपातः । यथा–"नरनारायणौ
*उमामहेश्वरौ काकमयूरौ" इत्यादि । —कातन्त्र ( २·५·१३·) वृत्ति*

१ · २२ आधारे सप्तमी ।

य आधारस्तदधिकरणम्—कातन्त्र (२·४·११·)
आधारोऽधिकरणम्—पाणिनि (१·४·४५·)
सप्तम्यधिकरणे च—पाणिनि (२·३·३६·)
ईबाधारे (? ईबधिकरणे)च—जैनेन्द्र (१·४·४४·)
एतानि सूत्राणि मनसिकृत्य मानाङ्केनेदं वाक्यं स्वयमेव विरचितं स्यात् ।

१ · २३ वीप्सायामव्ययीभावः ।

पूर्वं वाच्यं भवेद्यस्य सोऽव्ययीभाव इष्यते । इति कातन्त्र (२·५·१४·)सूत्रवृत्तौ...यथार्थे । ....अर्थमर्थम् प्रति । प्रत्यर्थम् । इति व्याख्यानम् । तदनुसृत्य मानाङ्केनेदं वाक्यं स्वयमेव विरचितं भवेत् ।

३ · १७ विपूर्वो लस कान्तौ धातुः ।

—लष कान्तौ इति पाणिनीयधातुपाठे ।

८ · २ एकैकस्य वीप्सायाम् ।

इदं वाक्यं 'संख्यैकार्थाभ्यां वीप्सायाम् इत्येतत्कातन्त्रसूत्र(२·६·४०·)वृत्तिगतवचनानुसारेण मानाङ्केन विरचितं स्यात् ।

११ · १२ क्रियाविशेषणं द्वितीयान्तं नपुंसकम् ।

इदं वाक्यं 'स नपुंसकलिङ्गं स्यात्' इति कातन्त्रसूत्र (२·५·१५·)मवधार्य मानाङ्केनोक्तं स्यात् ।

१२ · ६ जात्यभिप्रायेण एकवचनम् ।

'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' इति पाणिनि(१·२·५८·)सूत्रमनुलक्ष्य मानाङ्कस्येदं वाक्यं स्यात् ।

१२ · ७ तृतीया सहयोगे । –कातन्त्र २·४·२९.

१४ · ११ जनी प्रादुर्भावे । –पाणिनीयधातुपाठे ।

१४ · २३ कर्तरि षष्ठी ।

'कर्तृकर्मणोः कृति नित्यम्' । कातन्त्र (२·४·४१·) इति सूत्राभिप्रायमनुसृत्येदमुक्तं स्यात् ।

पृ. पं.

१६ : ९ ध्या(? ध्यै)चिन्तनेत्यर्थे ।
पाणिनीयधातुपाठे 'ध्यै चिन्तायाम्' इति पाठ उपलभ्यते । उक्तपाठेन कातन्त्रानुसारेण भाव्यम् ।

२० • १ कर्तरि षष्ठी ।
१४ • २३ संबन्धिनी प्रागुक्ता टिप्पणिका द्रष्टव्या ।

२२ • १० वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
भोजदीक्षितादिवैयाकरणैरुद्धृतमपीदं वाक्यं कुत्रत्यमिति नोपलभ्यते ।

२३ • १४ समाहारद्वन्द्वेनैकत्वम् ।

२३ • १६ प्राण्यङ्गमिति च--
'द्वन्द्वैकत्वम्' इति कातन्त्र(२·५·१६·)सूत्रानुसारीत्यवधारितव्यम् ।

२४ • ४ प्राचुर्यविकारप्राधान्यादिषु मयट् ।
प्रस्तुतवृत्तेर्मयट् ।
प्रकृतेर्विकारेऽवयवे वाभक्षाच्छादनयोः । इति कातन्त्रसूत्र(२·६·४०·)वृत्तिगतवचनद्वय-मनुलक्ष्य मानाङ्कस्येयमुक्तिः भवेत् ।

३९ • ११ तादर्थ्ये चतुर्थी ।
'तादर्थ्ये इति कातन्त्रसूत्रं(२·४·२७·)मनसिकृत्य मानाङ्कस्येदं वाक्यं स्यात् ।

४९ • १० प्रकृष्टार्थे तरतमौ प्रत्ययौ भवतः ।
इत्येतद्वाक्यं कातन्त्रव्याकरणसूत्र(२·६·४०·)वृत्तिगत--आख्यातिकमेकारान्ताव्ययेभ्यः क्रियागुणप्रकर्षवृत्तिभ्य एव तराम् तमाम्—इति वाक्यानुसारि स्यात् ।

५१ • २ अनुमत्यर्थे पञ्चमी ।
'पञ्चम्यनुमतौ' इति कातन्त्रसूत्र(३·१·१८·)मनुसृत्य मानाङ्कस्येयमुक्तिः स्यात् ।

५२ • १० भविष्यदर्थे वर्तमानासामीप्ये वर्तमानवद्धातुः ।
'वर्तमानसामीप्ये वर्तमानवद्वा' इति पाणिनिसूत्र(३·३·१३१·)मनुरुध्य मानाङ्केनेदं वाक्यं विरचितं स्यात्, तादृगभिप्रायप्रतिपादकसूत्रस्य कातन्त्रेऽदर्शनात, वर्तमाना (कातन्त्र ३·१·२४·) इति वर्तमानकालसंज्ञायाः कातन्त्र एव दर्शनाच्च ।

५२ • २४ याकारौ स्त्रीकृतौ ह्रस्वौ क्वचित् । कातन्त्र२·५·२७·

५३ • ७ भविष्यत्सामीप्ये वर्तमानकालः ।
'वर्तमानसामीप्ये वर्तमानवद्वा' इति पाणिनिसूत्र(३·३·१३१·)मनुरुध्यैषोऽभिप्रायः मानाङ्केन प्रकटीकृतः स्यात् ।

५८ • २२ तदस्यास्तीति मन्त्वन्त्वीन् । कातन्त्र २·६·१५·
[तदिति प्रथमान्तात् । अस्यास्तीत्यस्मिन्नर्थे मन्तु । । वन्तु । विन् । इन । इत्येते प्रत्यया भवन्ति ।–कातन्त्रवृत्ति]

५८ • ३० भावे क्तप्रयोगे कर्तरि वा षष्ठी भवति ।
वाक्यमिदं 'कर्तृकर्मणोः कृति नित्यम्' इति कातन्त्र(२·४·४१·)सूत्रानुसारीति मन्तव्यम् ।

पृ. पं.

६२ • ३ इच्छायामपि चतुर्थी । [?]

६४ • २५ विनासहसमयोगे तृतीया ।

'तृतीया सहयोगे' इति कातन्त्र(२·४·२९·)सूत्राभिप्रायमनुरुध्येदमुक्तं भवेत् ।

६८ • १७ आधारे सप्तमी ।

१·२२ संबन्धिनी पूर्वोक्ता टिप्पणिका द्रष्टव्या ।

७१ • २ सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । यथा दीर्घजङ्घः ।

दीर्घजङ्घेति पुंवद्भावे निर्दिष्टोदाहरणवत् 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति कात्यायनवार्तिकमत्र नोपपन्नं भवति ।

७२ • २ प्रकृष्टार्थे तरतमौ प्रत्ययौ भवतः ।

४९ • १० संबन्धिनी पूर्वनिर्दिष्टा टिप्पणिका द्रष्टव्या ।

७३ • ७ निर्धारणे षष्ठी ।

'निर्धारणे च' इति कातन्त्रसूत्रानुसारेण मानाङ्केनेदमुक्तं स्यात् ।

७८ • २२ तादर्थ्ये चतुर्थी ।

'तादर्थ्ये' इति कातन्त्र (२·४·२७·)सूत्रानुसारेण मानाङ्कस्येयमुक्तिः स्यात् ।

८४ • १५ रुच्यर्थे चतुर्थी ।

'यस्मै दित्सा रोचते धारयते वा तत् संप्रदानम्' इति कातन्त्रसूत्रं(२·४·१०·)-मनसिकृत्य मानाङ्केनेदमुक्तं स्यात् ।

८४ • २४ दन्तस्य दत् बहुव्रीहौ ।

एतद्विषयकं सूत्रं कातन्त्रे नोपलभ्यते । 'वयसि दन्तस्य दतृ' (पाणिनि ५·४·१४१·)-इत्येतत्सूत्रमनुरुध्येदमुक्तं स्यात् मानाङ्केन ।

८७ • २७ स्वरेऽक्षरविपर्ययः । कातन्त्र २·५·२३·

८८ • ५ त्वतौ भावे । कातन्त्र २·६·१३·

९३ • २ असु क्षेपणे । पाणिनीयधातुपाठे ।

९७ • २ प्रकृष्टार्थे तरतमौ प्रत्ययौ भवतः ।

४९ • १० संबन्धिनी पूर्वोक्ता टिप्पणिका द्रष्टव्या ।

१०९ • ३१ जातौ एकवचनम् ।

१२ • ६ संबन्धिनी पूर्वनिर्दिष्टा टिप्पणिका द्रष्टव्या ।

# परिशिष्टम्–३ ॥

"B" संज्ञकमातृकायां टिप्पणिकाकारेण प्रदत्तानां रागतालनायिकालक्षणानां लेखकप्रमादबहुलानां समुद्धारः यथामति संशोध्यात्रास्माभिः प्रदर्शितः ।

पृ. पं.

३ · २४ गौडमालवरागेण गीयते । रागलक्षणात् ।
नितम्बिनीचुम्बितवक्त्रपद्मः शुक्लद्युतिः कुण्डलवान् प्रसन्नः ।
सङ्केतशालां(? सङ्गीतशालां)प्रविशन्प्रदोषे मालाधरो मालवरागराजः ॥
रूपकताले तालक्षणात् ।

८ · ४ गुर्जरीरागेण गीयते । रागलक्षणात् ।
श्यामा सुकेशी मलयद्रुमाणां मध्ये लसत्पल्लवतल्पमाला
(पाठान्तरम् : मृदूल्लसत्पल्लवतल्पमध्ये) ।
श्रुतिस्वराणां दधती विभागं तन्त्रीमुखा दक्षिणगुर्जरीयम् ॥
परिमठे ताले । तालक्षणात् ।
प्लुतमात्रेण वृद्धि स्याद्यत्र ताले निरन्तरा परिमठे सशृङ्गारे गीयते रसे ।

११ · २३ वसन्तरागेण गीयते रूपकताले । रागलक्षणात् ।
शिखण्डिबर्होच्चयबद्धचूडः पुष्णाति कां चूतलताङ्कुरेण ।
भ्रमन्मुदाराममनङ्गमूर्तेर्मतो मतङ्गस्य वसन्तरागः ॥
तत्र प्रोषितप्रेयसी नायिका । तल्लक्षणात् ।
कुतश्चित्कारणाद्यस्याः पतिर्देशान्तरं गतः ।
दत्त्वावधिं भृशार्ता सा प्रोषितप्रेयसी यथा ॥ [शृङ्गारतिलक १·८१]

१६ · २५ रामकलीरागेण गीयते । रागलक्षणात् ।
स्वर्णप्रभा भास्वरभूषणा च नीलं निचोलं सुतनौ वहन्ती ।
कान्ते पदोपान्तमधिस्थितेऽपि मानोन्नाता रामकली प्रदिष्टा ॥
रूपकताले । अत्रापि प्रोषितप्रेयसी नायिका ।

२१ · १८ गुर्जरीरागेण गीयते । रूपकताले । अत्रापि प्रोषितप्रेयसी नायिका ।

२५ - १७ गौडमालवरागेण गीयते । एकताली ताले ।
चन्द्रिका विपुलारामा एकताली त्रिधा मता ।
एकतालीत्रयं मध्यविपुला नाम सा मता ॥
तल्लक्षणात् । गुरुत्रयेण विपुला शृङ्गारे गीयते रसे इति ।
अत्रोत्कण्ठिता नाम नायिका । तल्लक्षणात् ।
उत्का भवति सा यस्या वासके नागतः प्रियः ।
तस्यानागमने हेतुं चिन्तयन्त्याकुला यथा ॥ [शृङ्गारतिलक १·७५]

३२ . १ गुर्जरीरागेण गीयते । रागलक्षणात् । परिमठताले तल्लक्षणात् ।
(अत्र कलहान्तरिता नायिका ।) तल्लक्षणात् ।
प्राणेश्वरं प्रणयकोपविशेषभीतं या नाम चाटुमनिरीक्ष्य विकुप्य याता ।
संतप्यतेऽनुनयवह्निशिखासहस्रैः मुग्ध्याकुलेव कलहान्तरिता हि सा स्यात् ॥

पृ. प.

[ कुम्भनृपतिप्रणीतटीकायां ( पृ. १२३ ) समुद्धृतो लभ्यते श्लोकोऽयम् ।
शङ्करमिश्रव्याख्यायां तु श्लोकोऽयं पाठभेदेन दृश्यते—
प्राणेश्वरं प्रणयकोप[1]विशेषभीतं या चाटुकारमवधीर्य विशेषवाग्भिः ।
संतप्यते मदनवह्निशिखा[1] समूहे[6]बाष्पाकुलेह कलहान्तरिता हि सा स्यात् ॥
पाठान्तराणि: १ °भरेण भीतं २ °सहस्र ३ बाष्पाकुला च ]

३७ . १० कर्णाटरागेण गीयते । एकताले । रागलक्षणात् ।
कृपाणपाणिर्गजदन्तपत्रमेकं वहन् दक्षिणकर्णपूरे ।
संस्तूयमानः सुरचारणौघैः कर्णाटरागः शिखिकण्ठनीलः ॥

[ सङ्गीतदर्पणे पाठभेदेन दृश्यते श्लोकोऽयम्—
कृपाणपाणिर्गजदन्तपात्रं(°खण्डं)
एकं वहन् दक्षिणहस्तकेन ।
संस्तूयमानः सुरचारणौघैः
कर्णाटरागः क्षितिपालमूर्तिः ॥ ]

४२ . १८ देशाख्यरागेण गीयते । एकतालीताले । रागलक्षणात् ।
आस्फोटनाविष्कृतरोमहर्षो निबद्धसन्नद्धविशालबाहुः ।
प्रांशुप्रचण्डोन्नत इन्दुगौरो देशाख्यरागः किल मल्लमूर्तिः ॥
अत्राप्युत्कण्ठिता नायिका ।

४८ . १२ गौडीरागेण गीयते । परिमंठताले । रागलक्षणात् ।
विनोदयन्ती दयितं सुकेशी सुकङ्कणा चामरचारुहस्ता ।
कर्णे दधाना सुरपुष्पगुच्छं वराङ्गनैषा कथिता वराला ॥

[ गायनप्रकाशे श्लोकोऽयं स्वल्पपाठभेदेन लभ्यते—
विनोदयन्ती दयितं सुकेशी सुकङ्कणा चामरचारुहस्ता ।
कर्णे दधाना सुरवृक्षपुष्पं वराङ्गनेयं कथिता वराटी ॥
गौडी, वराली, वराटी, वराडी–इत्येतानि नामानि एकस्यैव रागस्येति प्रतिभाति । ]

अत्रापि अभिसारिका नाम नायिका । तल्लक्षणात् ।
या निर्लज्जीकृता बाढं मदने मदनेन च ।
अभियाति प्रियं साभिसारिकेति मता यथा ॥ [ शृङ्गारतिलक १·८० ]

५६ . १६ नटरागेण गीयते रूपकताले । रागलक्षणात् ।
तुरङ्गमस्कन्धनिषक्तबाहुः स्वर्णप्रभः शोणितशोणगात्रः ।
संग्रामभूमौ विचरन् धृतासिर्नटोऽयमुक्तःकिल कश्यपेन ॥
[ तुरङ्गमस्कन्धनिबद्धबाहुः स्वर्णप्रभः शोणितशोणगात्रः ।
संग्रामभूमौ विचरन् प्रतापी नटोऽयमुक्तः किल रागमूर्तिः ॥ ]
अत्र वासकशय्या( ? सज्जा )नायिका । तल्लक्षणात् ।
भवेद् वासकशय्या(०सज्जा)सौ सज्जिताङ्गरतालया ।

पृ. प.

निश्चित्यागमनं भर्तुर्द्वारेक्षणपरा यथा [शृङ्गारतिलक १.७६ ]

६१ · १४ मालवरागेण गीयते । परिमठताले । विप्रलब्धा नायिका । तल्लक्षणात् ।

प्रेष्य दूतीं स्वयं गत्वा(पाठान्तरं : दत्त्वा) सङ्केतं नागतः प्रियः ।
यस्यास्तेन विना दुःस्था विप्रलब्धा तु सा यथा ।। [ शृङ्गारतिलक १.७८ ]

६४ · १९ वसन्तरागेण गीयते । यतिताले । अत्र स्वाधीनभर्तृका नाम नायिका । तल्लक्षणात्

यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति ।
विचित्रविभ्रमासक्तः सा स्वाधीनपतिर्यथा ।।
[ यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति ।
विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्तृका ।। [ शृङ्गारतिलक १.७४ ]

७१ · ११ देशाख्यरागेण गीयते । एकतालीतले । अत्राप्युत्कण्ठितैव नायिका ।

७६ · ११ भैरवीरागेण गीयते । रूपकताले । रागलक्षणात् ।

श्यामा सुकेशी प्रियवादिनी च संलेपिता लोहितचन्दनेन ।
पीतास्रगन्धासितकेशपाशा प्रोक्ता मुनीन्द्रैः किल भैरवीयम् ।।
अत्र खण्डिता नायिका । तल्लक्षणात् ।
निद्राकषायमुकुलीकृतताम्रनेत्रो
नारीनखव्रणविशेषविचित्रिताङ्गः ।
यस्याः कुतोऽपि पतिरेति गृहं प्रभाते
सा खण्डितेति कथिता कविभिः पुराणैः ।।
श्लोकोऽयं कुम्भनृपतिप्रणीतटीकायां समुद्धृतो लभ्यते (पृ. १२०) ।
शङ्करमिश्रोऽपि'तदुक्तं भरते'—इति अभिधायेदमवतरणं प्रददाति ।

८० · १० गुर्जरीरागेण गीयते रूपकताले । अत्र कलहान्तरिता नायिका ।

८३ · १९ रामकरावराडीरागेण गीयते । रागलक्षणात् ।

प्रारब्धगमनमुद्रा निद्राघूर्णायमानमुग्धा ।
सुखशायिनि निजदयिते रागवराली भवेद्गौरी ।।
अड (ठ)तालीताले । तल्लक्षणात् ।
द्रुतद्वन्द्वं लघुयुग्मा (?) दृष्टतालः स उच्यते ।
अत्रापि कलहान्तरिता नायिका ।

९१ · १६ वसन्तरागेण गीयते रूपकताले । अत्रापि अभिसारिकैव नायिका ।

१०० · २३ वराडीरागेण गीयते । एकतालीताले । अभिसारिकैव नायिका ।

१०५ १७ विभासरागेण गीयते । रागलक्षणात् ।

स्वच्छन्दसम्मानितपुष्पचापः
प्रियाधरस्वादुसुधाभितृप्तः ।
पर्यङ्कमध्यास्य कृतोपवेशो
विभासनिद्रान्वितहेमगौरः ।।

११२ ७ रामकरीरागेण गीयते रूपकताले तथा गौडीरागे । अत्रापि स्वाधीनभर्तृका नायिका ।

## परिशिष्टम्–४ ॥

### टिप्पणिकागतविशिष्टशब्दनिरुक्तिः ।

| क्रमाङ्कः | पृष्ठाङ्कः | निरुक्तिः |
|---|---|---|
| १ | ४ | जगन्ति ईष्टे नियमयतीति जगदीशः । |
| २ | ४ | हरति संसारक्लेशमिति हरिः । |
| ३ | १९ | अहरहः अविद्यां तत्कार्यंसंसारं [च] हरतीति हरिः । |
| ४ | २० | रोगशोकसन्तापादिकं हरतीति हरिः । |
| ५ | २८ | मधुं दैत्यं सूदितवानिति मधुसूदनः । |
| ६ | २८ | मनसि जायत इति मनसिजः । |
| ७ | ३१ | कलिं पापं द्यति खण्डयतीति कलिन्दः (सूर्यः) । |
| ८ | ३९ | मनसि जातः मनसिजः । |
| ९ | ४० | विधुं चन्द्रं तुदति व्यथयतीति विधुन्तुदः । |
| १० | ६० | कुलान्यटन्तीति कुलटाः । |
| ११ | ६७ | मनसि भवतीति मनोभूः । |
| १२ | ७० | अपवृणोतीति आच्छादयतीति अपवरणम् । |
| १३ | ७१ | मनसि (अधिकरणे) जायत इति मनसिजः । |
| १४ | ७३ | मनसि भवतीति मनोभवः । |
| १५ | ८० | स्वप्रेयसीनां कामव्यथां हरतीति हरिः । |
| १६ | १०६ | राधिकेति । रः कामस्तेनाधिर्व्यथा तस्य के प्रकाशे सतीति शेषः [?] । |
| १७ | १०६ | नारायणं नारा आपस्तासामयनमाश्रयं निधिमिति यावत् [?] आपः अयनं=स्थानं यस्य सः नारायणः इतीयं निरुक्तिः अत्र समीचीना दृश्यते । |
| १८ | ११३ | मानं द्यति खण्डयतीति मानदः । मानोन्नतिं ददातीति मानदः । |
| १९ | ११३ | मानसे हृदये जायत इति मानसजः । |
| २० | ११४ | शम्बरं दैत्यं (? दैत्यनाम) दारयतीति (? दारितवान् इति) शम्बरदारणः । |

## परिशिष्टम्–५ ॥

### टिप्पणिकाकृन्मानाङ्केन निर्दिष्टानां ग्रन्थकाराणां ग्रन्थानां चाकाराद्यनुक्रमणी ।


| | |
|---|---|
| अनेकार्थः | (पृष्ठाङ्कः) ८७, ९८ |
| अमरः | ३, १२, २०,२७, २८, २९, ४० ४२, ५५, ५७, ६३, ६८, ६९, ८७, ८८, ९३, १०३, ११४, |
| आचार्यो गोवर्धनः | ३ |
| उमापतिधरः | ३ |
| कोकः | ६५ |
| गीतगोविन्दकम् | १ |
| जयदेवः | १ , ३ |
| धोयी | ३ |
| पञ्चसायकः | ६५ |
| पद्मपुराणम् | ६९ |
| पाणिनीयव्याकरणम् | २४ |
| बौद्धागमशास्त्रम् | ६ |
| भागुरिः | २२ |
| महर्षि (व्यासः) | ६९ |
| मानाङ्कः | १ |
| वात्स्यायनकामशास्त्रम् | ५३ |
| विश्वलोचनः | ५२, ६९ |
| विस्तरः (?) | २३, २४, ३३, ३४ |
| शरणः | ३ |
| हारावली | ६७ |

# परिशिष्टम्–६ ॥

## टिप्पणिकायामुद्धृतानि वाक्यानि ।

पृ॰ पं॰

४॰५ यो ब्रह्माणं विदधाति पूर्वं योऽसौ वेदांश्च प्रहिणोति तस्मै ।

—श्वेताश्वतरो(६॰१८)पनिषदि ।

६॰२६ अहिंसा परमो धर्मः । —बौद्धागमशास्त्रे

७॰१७-१८ कृषिर्भूवाचकः शब्दो नश्च निर्वृतिवाचकः ।

तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥ —इति व्यासः

हरिवंशे तु व्यासः—

कृषिर्भूवाचकः शब्दो नश्च निर्वृतिवाचकः ।

विष्णुस्तद्भावयोगाच्च कृष्णो भवति शाश्वतः ॥

४५॰२३ दैवतं देववैद्ययोः ।

५२॰२१ विशेषणेन विशेष्यप्रतिपत्तिः ।

५३॰१४–१६ संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा ।

अवगुण्ठनमन्वीता त्रस्तविन्यस्तलोचना ॥

वेपमानोरुयुगला प्रस्खलन्ती समेऽसमे ।

—वात्स्यायनकामशास्त्रमतम् (?)

६९॰१० पाथोजपत्त्रायतलोचनो युवा

—पद्मपुराणे

८५॰१० जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षते ।

## शुद्धिपत्रम् ।

| पृ. | पं. | एवं पठितव्यम् |
| --- | --- | --- |
| ९ | ३ | °नलिन° |
| १८ | १६ | °वंशो |
| १९ | ११ | अविद्यां तत्कार्यं संसारं [च] |
| २१ | ११ | शब्दयुक्तं |
| २२ | ८ | मौलिकपोल° |
| २२ | १० | °रुपसर्गयोः |
| २२ | १७ | चन्द्राकाराश्च ते च चारवः |
| २३ | २१ | वलन् प्रकटीभवन् |
| २४ | २० | किं वितर्के परिप्रश्ने |
| २९ | २२ | नेत्रो° |
| ३० | ६ | कासारोपवनपवनोऽपि |
| ३२ | ३ | मयापि |
| ३६ | १२ | तज्जातीयै° |
| ३९ | ११ | विशालं |
| ४१ | २३ | किम् । हरि...सखी, तस्याः |
| ४२ | १२–१३ | 'चिन्तातिवर्तते' इत्येतद् नात्रावश्यकम् । |
| ४२ | २१ | कृशतनुरिव भारम् |
| ४३ | १ | °पङ्कं |
| ४३ | ५ | °पवन° |
| ४३ | २५ | °विषयं |
| ४४ | ८ | °रित्यादि । |
| ४८ | १८ | °जनकत्वोद्योतनाय । |
| ४९ | २६ | °गन्धादिकं |
| ५० | २ | विरह° |
| ५० | १८ | अधिष्ठानं स्थानम् |
| ५४ | २२–२३ | सह । मनोरथः तव |
| ५५ | १२ | जानतः |
| ५८ | १२ | अन्धकारं श्लिष्यति |
| ५९ | २७ | °विकल्प |
| ६० | ५ | ध्यायती° |
| ६१ | २२ | न ययौ |
| ६५ | १८ | हृतौ |
| ६६ | २४ | ॥५॥ |
| ६९ | ७ | व्योमसिन्धुसरोवरे |
| ७१ | २ | दीर्घजङ्घः |
| ७१ | २३ | मनसिजो |
| ७३ | ७ | श्रेष्ठः, निर्धारणे षष्ठी,स....तेन । |
| ७८ | ७ | शरीरं |
| ७८ | २४ | वधनिर्दयं |
| ७९ | १ | चासौ |
| ७९ | ४ | सौख्यकरम् |
| ८० | ३ | रतिरसभिन्नां |
| ८३ | ३ | मसृणरोष° |
| ८४ | ६ | चारु मनोज्ञं |
| ८४ | ११ | कौमुदी |
| ८४ | १५ | स्फुरँश्चासौ |
| ८५ | १९ | रक्तो– |
| ८६ | ५ | °गञ्जनं |
| ८६ | १२ | लसंश्च |
| ८६ | २९ | अरुणोऽस्फुटरागे |
| ८८ | १ | °विपर्ययो |
| ८८ | ५ | तत्वौ भावे ।(कातन्त्र२.६.१३.) भावे तप्रत्ययः । |
| ९१ | २२ | नुकूला भव । |
| ९२ | १५ | मञ्जीरौ |
| ९३ | २० | तेजनत्वात् तत |
|  | २१ | मनोहरहार |
| ९५ | १० | °युक्ता |
|  | ११ | °युक्ता |
| ९६ | ४–५ | रुचि–मञ्जरीभिः |
| ९८ | १४ | मधुदैत्यो |
| १०५ | १३ | रत्यभिप्रायः |
| १०६ | ४ | स्मारयन्ती |

| पृ. | पं. | एवं पठितव्यम् |
| --- | --- | --- |
| १०७ | ९ | °मतो |
| | २० | विवशो° |
| १०८ | ७ | सुरतारम्भः |
| | ९ | केशि° |
| १०९ | ६ | बन्धः पीडाजनकः |
| | ११ | रमणे आसन° |
| | १३ | नम्रीकृत्या° |
| ११० | ४ | विपरीतरतिरुक्ता |
| | १४ | हर्षा...घ्दा या |
| १११ | ११ | अञ्चलः |
| | २६ | °श्रीः |
| ११३ | ३० | मानमुन्नतिं |